(४) भाव भाव मनुष्यो मनुष्यः । (५) माधविके माधविके ।

(६) भाव भाव स्त्रियमन्विच्छति ।

संस्थानकः । ईत्थिआणं शदं मोडेमि । शूले हगे ।

वसन्तसेना । (शून्यमवलोक्य) हैद्धी हद्धी । कधं परिअणो वि परिब्भट्टो । एत्थ मए अप्पा सअं जेव्व रक्खिदव्वो ।

विटः । अन्विष्यतामन्विष्यताम् ।

संस्थानकः । वैशन्तशेणिए विलव विलव परहुदिअं वा पल्लवअं वा शव्वं वा वशन्तमाशं । मए अहिशालिअन्तीं तुमं को पलित्ताइशदि ।

किं भीमशेणे जमदग्गिपुत्ते कुन्तीशुदे वा दशकन्धले वा ।
एशे हगे गेण्हिय केशहत्थे दुश्शाशणश्शाणुकिदिं कलेमि ॥२९

णं पेक्ख पेक्ख ।

अशी शुतिक्खे वलिदे अ मत्थके कप्पेध शीशं उद मालएध वा ।
अलं तवेदेण पलाइदेण मुमुक्खु जे होदि ण शे क्खु जीअदि ॥३०

वसन्तसेना । अज्ज अबला क्खु अहं ।

विटः । अत एव ध्रियसे ।

संस्थानकः । अदो जेव्व ण मालीअसि ।

वसन्तसेना । (स्वगतम्) कधं अणुणओ वि से भअं उप्पादेदि ।

---

(१) स्त्रीणां शतं मारयामि शूरोऽहम् ।

(२) हा धिक् हा धिक् कथं परिजनोऽपि परिभ्रष्टः । अत्र मयात्मा स्वयमेव रक्षितव्यः ।

(३) वसन्तसेनिके विलप विलप परभृतिकां वा पल्लवकं वा सर्वं वा वसन्तमासम् । मयाभिसार्यमाणां त्वां कः परित्रास्यते ।

किं भीमसेनो जमदग्निपुत्रः कुन्तीसुतो वा दशकन्धरो वा ।
एषोऽहं गृहीत्वा केशहस्तं दुःशासनस्यानुकृतिं करोमि ॥

ननु प्रेक्षस्व प्रेक्षस्व ।

असिः सुतीक्ष्णो वलितं च मस्तकं छिन्त्त शीर्षमुत मारयत वा ।
अलं तवैतेन पलायितेन मुमुर्षुर्यो भवति न स खलु जीवति ॥

(४) आर्य अबला खल्वहम् । (५) अत एव न मार्यसे ।

(६) कथमनुनयोऽप्यस्य भयमुत्पादयति ।

भोदु एव्वं दाव । (प्रकाशम्) । अज्ज इमादो किंपि अलंकरणं तक्कीयदि ।

विटः । शान्तं (शान्तम्) भवति वसन्तसेने न पुष्पभोषमर्हत्युद्यानलता । तत् कृतमलंकरणैः ।

वसन्तसेना । तो किं क्खु दाणिं ।

संस्थानकः । हंगे देवपुलिशे मणुश्शे वासुदेवके कामइदव्वे ।

वसन्तसेना । (सक्रोधम्) । सैन्तं सन्तं । अवेहि । अणज्जं मन्तेसि ।

संस्थानकः । (सहस्ततालं विहस्य) । भोवे भावे पेक्ख दाव । अन्तलेण शुशिणिद्धा एशा गणिआदालिआ णं । जेण मं भणादि एहि शन्ते शि किलिन्ते शि त्ति । हगे ण ग्गामन्तलं गडे ण णगलन्तलं वा । अज्जके शवामि भावश्श शीशं अत्तणकेहिं पादेहिं । तव जेव्व पश्चाणुपश्चिआए आहिंडन्ते शन्ते किलिन्ते म्हि शंवुत्ते ।

विटः । (स्वगतम्) अये कथं शान्तमित्यभिहिते श्रान्त इत्यवगच्छति मूर्खः । (प्रकाशम्) । वसन्तसेने वेशवासविरुद्धमभिहितं भवत्या । पश्य

तरुणजनसहायाश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव ।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे सुप्रियं चाप्रियं च ॥३१

अपि च । **वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः**
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा ।

भवत्येवं तावत् । (१) आर्य अस्मात् किमप्यलंकरणं तर्क्यते ।

(२) तत्किं खल्विदानीम् ।

(३) अहं देवपुरुषो मनुष्यो वासुदेवः कामयितव्यः ।

(४) शान्तं शान्तम् । अपेहि । अनार्यं मन्त्रयसे ।

(५) भाव भाव प्रेक्षस्व तावत् । अन्तरेण सुस्निग्धैषा गणिकादारिका ननु । येन मां भणति एहि श्रान्तोसि क्लान्तोऽसीति । अहं न ग्रामान्तरं न नगरान्तरं वा गतः । आर्यिके शपे भावस्य शीर्षमात्मीयाभ्यां पादाभ्याम् । तवैव पृष्ठानुपृष्ठिकयाहिण्डमानः श्रान्तः क्लान्तोऽस्मि संवृत्तः ।

ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज ॥३२

वसन्तसेना। गुणो क्खु अणुराअस्स कारणं ण उण बलक्कारो।

संस्थानकः। भावे भावे एशा गब्भदासी कामदेवायदणुज्जाणादो पहुदि ताह दलिद्दचारुदत्ताह अनुलत्ता ण मं कामेदि। वामदो तश्श घलं। जधा तव मम अ हत्थादो एशा ण पलिब्भंशदि तधा कलेदु भावे।

विटः। (स्वगतम्) यदेव परिहर्तव्यं तदेवादाहरति मूर्खः। कथं वसन्तसेनार्यचारुदत्तमनुरक्ता। सुष्ठु खल्विदमुच्यते रक्तं रक्तेन संगच्छत इति। तद्गच्छतु। किमनेन मूर्खेण। (प्रकाशम्) काणेलीमातः वामतस्तस्य सार्थवाहस्य गृहम्।

संस्थानकः। अंध इं। वामदो तश्श घल।

वसन्तसेना। (स्वगतम्) अम्महे वामदो तश्श गेहं त्ति जं सच्चं अवरज्झन्तेण वि दुज्जणेण उवकिदं जेण पिअसंगमं पाविदा।

संस्थानकः। भावे भावे बलिए क्खु अन्धआले मासलासिपविट्ठा विअ मशिगुडिआ दीशन्दी जेव्व पणट्ठा वशन्तशेणिआ।

विटः। अहो बलवानन्धकारः। तथा हि

आलोकविशाला मे सहसा तिमिरप्रवेशविच्छिन्ना।
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण ॥३३

(१) गुणः खल्वनुरागस्य कारणं न पुनर्बलात्कारः।

(२) भाव भाव एषा गर्भदासी कामदेवायतनोद्यानात् प्रभृति तस्य दरिद्रचारुदत्तस्यानुरक्ता न मां कामयते। वामतस्तस्य गृहम्। यथा तव मम च हस्तादेषा परिभ्रश्यति तथा करोतु भावः।

(३) अथ किम्। वामतस्तस्य गृहम्।

(४) अम्महे वामतस्तस्य गृहमिति यत्सत्यमपराध्यतापि दुर्जनेनोपकृतं येन प्रियसङ्गमं प्रापिता।

(५) भाव भाव बलीयसि खल्वन्धकारे मापराशिप्रविष्टेव मशीगुटिका ह्रियमाणेव प्रनष्टा वसन्तसेना।

अपि च । **लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।**
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥३४

संस्थानकः । भावे भावे अण्णेशामि वशन्तशेणिअं ।

विटः । काणेलीमातः आस्ति किंचिच्चिह्नं यदुपलक्षयसि ।

संस्थानकः । भावे भावे किं विअ ।

विटः । भूषणशब्दं सौरभ्यानुविद्धं माल्यगन्धं वा ।

संस्थानकः । सुणामि मल्लगन्धं । अन्धआलपूलिदाए उण णाशिआए ण शुव्वत्तं पेक्खामि भूषणशद्दं ।

विटः । (जनान्तिकम्) वसन्तसेने

कामं प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामिनीव जलदोदरसन्धिलीना ।
त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु मुखराणि च नूपुराणि ॥३५

शुतं वसन्तमेने ।

वसन्तसेना । (स्वगतम्) सुंदं गहिदं च । (नाट्येन नूपुराण्युत्सार्य माल्यानि चापनीय किंचित्परिक्रम्य हस्तेन परामृश्य) अम्मो भित्तिपरामरिस-सूहदं पक्खदुआरअं क्खु एदं । जाणामि अ संजोएण गेहस्स संवुदं पक्खदु-आरअं ।

चारुदत्तः । वयस्य समाप्तजपोऽस्मि । तत् सांप्रतं गच्छ मातृभ्यो बलिमुपहार ।

मैत्रेयः । मो ण गमिस्सं ।

---

(१) भाव भाव अन्विष्यामि वसन्तसेनिकाम् । (२) भाव भाव किमिव ।

(३) शृणोमि माल्यगन्धम् । अन्धकारपूरितया पुनर्नासिकया न सुव्यक्तं प्रेक्षे भूषणशब्दम् ।

(४) श्रुतं गृहीतं च । (५) अहो भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत् । जानामि च संयोगेन गेहस्य संवृतं पक्षद्वारकम् ।

(६) मो न गमिष्यामि ।

चारुदत्तः । धिक्कष्टम् ।

दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य संभाव्यते ॥३६

अपि च । रुद्धं नैव हि कश्चिदस्य कुरुते संभाषते नादरात्
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥३७

अपि च। दारिद्र्य शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क गमिष्यसि
त्वम् ॥३८

मैत्रेयः । (सवैलक्ष्यम्) भो वअस्स जइ मए गन्तव्वं ता एसा वि मे सहाइणी रदणिआ भोदु ।

चारुदत्तः । रदनिके मैत्रेयमनुगच्छ ।

चेटी । [1]जं अज्जो आणवेदि ।

मैत्रेयः । भोदि रदणिए गेण्ह बलिं पदीवं च । अहं अवावुदं पक्खदुआरअं करेमि । (तथा करोति)

वसन्तसेना । [2]मम अब्भुववत्तिणिमित्तं विअ अवावुदं पक्खदुआरअं । ता जाव पविसामि । (दृष्ट्वा) [3]हद्धी हद्धी । कधं पदीवो । (पटान्तेन निर्वाप्य प्रविष्टा ।)

चारुदत्तः । मैत्रेय किमेतत् ।

---

(१) भो वयस्य यदि मया गन्तव्यं तदेषापि मे सहायिनी रदनिका भवतु ।
(२) यदार्य आज्ञापयति ।
(३) भवति रदनिके गृहाण बलिं प्रदीपं च । अहमपावृतं पक्षद्वारकं करोमि ।
(४) ममाभ्युपपत्तिनिमित्तमिवापावृतं पक्षद्वारकम् । तद्यावत् प्रविशामि ।
(५) हा धिक् हा धिक् । कथं प्रदीपः ।

मैत्रेयः। [1]अवावुदपक्खदुआरएण पिण्डीकदेण वादेण णिव्वाविदो पदीवो। मोदि रदणिए णिक्कम तुमं पक्खदुआरएण। अहं पि अब्भन्तरचदुस्सालादो पदीवं पज्जालिअ आअच्छामि। (इति निष्क्रान्तः)

संस्थानकः। [2]भावे भावे अण्णेशामि वशन्तशेणिअं।

विटः। अन्विष्यतामन्विष्यताम्।

संस्थानकः। (तथा कृत्वा) [3]भावे भावे गहिदा गहिदा।

विटः। मूर्ख नन्वहम्।

संस्थानकः। [4]इदो दाव भविअ एअन्ते भावे चिट्ठदु। (पुनरन्विष्य चेटं गृहीत्वा) [5]भावे भावे गहिदा गहिदा।

चेटः। [6]भट्टके चेडे हगे।

संस्थानकः। [7]इदो भावे इदो चेडे। भावे चेडे चेडे भावे। तुम्हे दाव एअन्ते चिट्ठ। (पुनरन्विष्य रदनिकां केशेषु गृहीत्वा) [8]भावे भावे शंपदं गहिदा गहिदा वशन्तशेणिआ।

अन्धआले पलाअन्ती मल्लगन्धेण शूइदा।
केशहश्ते पलाभिट्ठा चाणक्केणेव्व दोव्वदी ॥३९

विटः। एषासि वयसो दर्पात् कुलपुत्रानुसारिणी।
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता ॥४०

---

(१) अपावृतपक्षद्वारेण पिण्डीकृतेन वातेन निर्वापितः प्रदीपः। मयवि रदनिके निष्क्रम त्वं पक्षद्वारकेण। अहमप्यभ्यन्तरचतुःशालतः प्रदीपं प्रज्वाल्यागच्छामि।

(२) भाव भाव अन्विष्यामि वसन्तसेनिकाम्।

(३) भाव भाव गृहीता गृहीता।

(४) इतस्तावद् भूत्वैकान्ते भावस्तिष्ठतु। (५) भाव भाव गृहीता गृहीता।

(६) भट्टारक चेटोऽहम्।

(७) इतो भाव इतश्चेटः। भावश्चेटश्चेटो भावः। युवां तावदेकान्ते तिष्ठतम्।

(८) भाव भाव सांप्रतं गृहीता गृहीता वसन्तसेनिका।

अन्धकारे पलायमाना माल्यगन्धेन सूचिता।
केशहस्ते परामृष्टा चाणक्येनेव द्रौपदी ॥

संस्थानकः ।

एशाशि वाशू शिलाशि ग्गहीदा केशेशु बालेशु शिलोलुहेशु ।
अक्कोश विक्कोश लपाहिचण्डं शंभुं शिवं शंकलमीशलं वा ॥४१

रदनिका । (सभयम्) [2]किं अज्जमिस्सेहिं ववसिदं ।

विटः । काणेल्लीमातः अन्य एवैष स्वरयोगः ।

संस्थानकः । [3]भावे भावे जधा दहिछल्लिपलिलुद्धाए मज्जालीए शलपलिवत्ते होदि तधा दासीए धीए कडे ।

विटः । कथं स्वरपरिवर्तः कृतः । अहो चित्रम् । अथवा किमत्र चित्रम् ।

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।
बञ्चनापण्डितत्वेन स्वरै[4]पुण्यमाश्रिता ॥४२

मैत्रेयः । (प्रविश्य) [5]ही ही भो । पदोसमन्दमारुदेण पसुबन्धोवणीदस्स विअ छागलस्स हिअअं फुरफुराअदि पदीवो । (उपसृत्य रदनिकां तथा दृष्ट्वा) [6]भो रदणिए ।

संस्थानकः । [7]भावे भावे मणुस्से मणुस्से ।

मैत्रेयः । [8]जुत्तं णेदं सरिसं णेदं जं अज्जचारुदत्तस्स दालिद्दाए संपदं परपुरिसा गेहं पवेसीअन्ति ।

रदनिका । [9]अज्ज मित्तेअ पेक्ख मे परिहवं ।

---

(१) एषासि वासु शिरसि गृहीता केशेषु बालेषु शिरोरुहेषु ।
आक्रोश विक्रोश लपाधिचण्डं शंभु शिवं शंकरमीश्वरं वा ॥

(२) किमार्यमिश्रैरत्र्यवसितम् ।

(३) भाव भाव यथा दधिसरपरिलुब्धाया मार्जार्याः स्वरपरिवर्तो भवति तथा दास्याः पुत्र्या कृता ।

(४) ही ही भोः । प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागलस्य हृदयं फुरफुरायते प्रदीपः । (५) भो रदनिके ।

(६) भाव भाव मनुष्यो मनुष्यः ।

(७) युक्तं नेदं सदृशं नेद यदार्यचारुदत्तस्य दरिद्रतया सांप्रतं परपुरुषा गेहं प्रवेशन्ते ।

(८) आर्य मैत्रेय प्रेक्षस्व मे परिभवम् ।

RESEARCH INSTITUTE,
84, R. H ROAD, MADRAS-4

मैत्रेयः । [1]किं तव परिहवो आदु अम्हाणं ।

रदनिका । [2]णं तुम्हाणं जेव्व ।

मैत्रेयः । [3]किं एसो बलक्कारो ।

रदनिका । [4]अध इं ।

मैत्रेयः । [5]सच्चं ।

रदनिका । [6]सच्चं ।

मैत्रेयः । (सक्रोधं दण्डकाष्ठमुद्यम्य) मा दाव । भो सके गेहे कुक्कुरोवि दाव चण्डो भोदि। किं उण अहं बम्हणो । ता एदिणा अम्हारिसजणभाअधेअकुडिलेण दण्डकट्ठेण दुट्ठस्स विअ सुक्खाणवेणुअस्स मत्थअं दे पहारेहिं कुट्टइस्सं ।

विटः । महाब्राह्मण मर्षय मर्षय ।

मैत्रेयः । (विटं दृष्ट्वा) [7]णं एत्थ एसो अवरज्झदि । (संस्थानकं दृष्ट्वा) [8]ऐसो क्खु एत्थ अवरज्झदि । अरे रे राअसालअ संठाणअ दुज्जण दुम्मणुस्स जुत्तं णेदं । जइ वि णाम तत्तभवं अज्जचारुदत्तो दलिद्दो संवुत्तो ता किं तस्स गुणेहिं ण अलंकिदा उज्जइणी जेण तस्स गेहं पविसिअ परिअणस्स ईदिसो उवमद्दो करीअदि ।

---

(१) किं तव परिभवोऽथवास्माकम् ।

(२) ननु युष्माकमेव । (३) किमेष बलात्कारः ।

(४) अथ किम् । (५) सत्यम् । (६) सत्यम् ।

(७) मा तावत् । भो स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति । किं पुनरहं ब्राह्मणः । तदेतेनास्मादृशजनभागधेयकुटिलेन दण्डकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टिष्यामि ।

(८) नात्रैषोऽपराध्यति । (९) एष खल्वत्रापराध्यति। अरे रे राजश्यालक संस्थानक दुर्जन दुर्मनुष्य युक्तं नेदम् । यद्यपि नाम तत्रभवानार्यचारुदत्तो दरिद्रः संवृत्तस्तत् किं तस्य गुणैर्नालंकृतोज्जयिनी येन तस्य गेहं प्रविश्य परिजनस्येदृश उपमर्दः क्रियते ।

मा दुग्गदो त्ति परिहवो णत्थि कदन्तस्स दुग्गदो णाम ।
चारित्तेण विहीणो अड्ढो वि अ दुग्गदो होइ ॥४३

विटः । (सवैलक्ष्यम्) महाब्राह्मण मर्षय मर्षय । अन्यजनशङ्कया खल्वि-दमनुष्ठितं न दर्पात् । पश्य

सकामान्विष्यतेऽस्माभिः

मैत्रेयः । [1]किं इअं ।

विटः । शान्तं पापम् ।

काचित् स्वाधीनयौवना ।
सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥४४

सर्वयेदमनुनयसर्वस्वं गृह्यताम् । (इति खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति)

मैत्रेयः । [2]सप्पुरिस उट्ठेहि उट्ठेहि । अआणन्तेण मए तुमं उवालद्धे सम्पदं उण जाणन्तो अणुणेमि ।

विटः । ननु भवानेवात्रानुनेयः । तदुत्तिष्ठामि समयतः ।

मैत्रेयः । [3]भणादु भवं ।

विटः । यदीमं वृत्तान्तं चारुदत्तस्य नाख्यास्यसि ।

मैत्रेयः । [4]णं कधइस्सं ।

विटः । एष ते प्रणयो विप्र शिरसा धार्यते मया ।
गुणशत्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिताः ॥४५

संस्थानकः । (सासूयम्) [5]किंणिमित्तं उण भावे एदस्श दुट्ठवदुअस्श विणअञ्जलिं कदुअ पाएसु णिवडिदे ।

मा दुर्गत इति परिभवो नास्ति कृतान्तस्य दुर्गतो नाम ।
चारित्र्येण विहीन आढ्योऽपि च दुर्गतो भवति ॥

(१) किमियम् ।

(२) सत्पुरुष उत्तिष्ठोत्तिष्ठ । अजानता मया त्वमुपालब्धः । सांप्रतं पुनर्जानन्ननुनयामि ।

(३) भणतु भवान् । (४) न कथयिष्यामि ।

(५) किंनिमित्तं पुनर्भाव एतस्य दुष्टवटुकस्य विनयाञ्जलिं कृत्वा पादयोर्निपतितः ।

विटः । भीतोऽस्मि ।

संस्थानकः । [1]कश्श तुमं भीदे ।

विटः । तस्य चारुदत्तस्य गुणेभ्यः ।

संस्थानकः । [2]के विअ तश्श गुणा जश्श गेहं पविशिअ अशिदव्वं पि णत्थि ।

विटः । मा मैवम् ।

सोऽस्मद्विधानां प्रणयैः कृशीकृतो न तेन कश्चिद्विभवैर्विमानितः ।
निदाघकालेष्विव सोदको ह्रदो नृणां स तृष्णामपनीय शुष्कवान् ॥४६

संस्थानकः । (सामर्षम्) [3]के शे गब्भदाशीए पुत्ते ।

शूले विक्रन्ते पण्डवे शेदकेदू पुत्ते लाधाए लावणे इन्दउत्ते ।
आहो कुन्तीए तेण लामेण जादे अश्शत्थामे धम्मपुत्ते जडाऊ ॥४७

विटः । मूर्ख आर्यचारुदत्तः खल्वसौ ।

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
आदर्शः शिक्षितानां शुचरितनिकषः शीलवेलासमुद्रः ।
सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
श्लोकः श्लाघ्यः स जीवत्यधिकगुणतया चोल्लसन्तीव चान्ये ॥४८

तदितो गच्छामः ।

संस्थानकः । [4]अगेण्हिअ वशन्तशेणिअं ।

विटः । नष्टा वसन्तसेना ।

संस्थानकः । [5]कधं विअ ।

विटः । अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य
मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य ।

---

(१) कस्मात् त्वं भीतः ।

(२) क इव तस्य गुणा यस्य गृहं प्रविश्याशितव्यमपि नास्ति ।

(३) कः स गर्भदास्याः पुत्रः ।
शूरो विक्रान्तः पाण्डवः श्वेतकेतुः पुत्रो राधाया रावण इन्द्रपुत्रः ।
आहो कुन्त्यां तेन रामेण जातोऽश्वत्थामा धर्मपुत्रो जटायुः ॥

(४) अगृहीत्वा वसन्तसेनाम् । (५) कथमिव ।

स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥४९

संस्थानकः। [1]अगेण्हिअ वशन्तशेणिअं ण गमिश्शं।

विटः। एतदपि न श्रुतं त्वया।

आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते।
हृदये गृह्यते नारी यदिदं नास्ति गम्यताम् ॥५०

संस्थानकः। [2]जेइ गच्छशि गच्छ तुमं। हगे ण गमिश्शं।

विटः। एवम्। गच्छामि। (इति निष्क्रान्तः)

संस्थानकः। [3]गैडे क्खु भावे अभावं। (विदूषकमुद्दिश्य) [4]अले काकपद-मत्थकशीशका दुट्ठवडुअका उवविश उवविश।

मैत्रेयः। [5]उवविसिदा जेव्व अम्हे।

संस्थानकः। [6]केण।

मैत्रेयः। [7]कैंअन्तेण।

संस्थानकः। [8]उट्ठेहि उट्ठेहि।

मैत्रेयः। [9]उट्ठिस्सामो।

संस्थानकः। [10]कदा।

मैत्रेयः। [11]जदा पुणो वि देव्वं अणुऊलं भविस्सदि।

संस्थानकः। [12]अले लोद लोद।

मैत्रेयः। [13]रोदाविदा जेव्व अम्हे।

---

(१) अगृहीत्वा वसन्तसेनां न गमिष्यामि।

(२) यदि गच्छसि गच्छ त्वम्। अहं न गमिष्यामि।

(३) गतः खलु भावोऽभावम्। (४) अरे काकपदमस्तकशीर्ष दुष्टवटुक उपविशोपविश।

(५) उपवेशिता एव वयम्। (६) केन। (७) कृतान्तेन।

(८) उत्तिष्ठोत्तिष्ठ। (९) उत्थास्यामः। (१०) कदा।

(११) यदा पुनरपि दैवमनुकूलं भविष्यति।

(१२) अरे रुदिहि रुदिहि।

(१३) रोदिता एव वयम्।

संस्थानकः । [1]केण ।
मैत्रेयः । [2]दुग्गदीए ।
संस्थानकः । [3]अले हश हश ।
मैत्रेयः । [4]हंसिस्सामो ।
संस्थानकः । [5]कदा ।
मैत्रेयः । [6]पुणोवि रिद्धीए चारुदत्तस्स ।
संस्थानकः । [7]अले ले दुट्ठबटुका भणेशि मम वअणेण तं दलिद्दचारुदत्तकं । एशा शशुवण्णा शहिलण्णा णवणाडअदंशणुट्ठिदा शुत्तधालिव्व वशन्तशेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुअ गेहं पविट्ठा । ता जइ मम हत्थे शअं जेव्व पट्ठाविअ एणं शमप्पेशि तदो अधिअलणे ववहालं विणा लहुं णिज्जादमाणाह तव मए अणुबद्धा पीदी हुविश्शदि । आदु अणिज्जादमाणाह आमलणन्तिके वेले हुविश्शदि । अवि अ पेक्ख पेक्ख ।

कक्कालुका गोछडलित्तवेण्टा शाके अ शुक्खे तलिदे हु मंशे ।
भत्ते अ हेमन्तिअलत्तिशिद्धे लीणे अ वेले ण हु होदि पूदी ॥५१

शीट्ठकं भणेशि । लहुकं भणेशि । तधा भणेशि जधा हगे अत्तणकेलिकाए

(१) केन । (२) दुर्गत्या ।
(३) अरे हस हस । (४) हसिष्यामः ।
(५) कदा । (६) पुनरपि ऋद्धयाचार्यचारुदत्तस्य ।
(७) अरे रे दुष्टबटुक भणिष्यसि मम वचनेन तं दरिद्रचारुदत्तकम् । एषा ससुवर्णा सहिरण्या नवनाटकदर्शनात्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात् प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा । तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति । अथवानिर्यातयत आमरणान्तिकं वैरं भविष्यति । अपि च प्रेक्षस्व प्रेक्षस्व ॥

कर्कारुको गोमयलिप्तवृन्तः शाकं च शुष्कं तलितं खलु मांसम् ।
भक्तं च हैमन्तिकरात्रिसिद्धं ऋणं च वैरं न खलु भवति पूति ॥

(८) स्वस्तिकं भणिष्यसि लघुकं भणिष्यसि । तथा भणिष्यसि यथाहमात्मीयावां

पासादबालग्गकवोदवाडिआए उवविट्ठे शुणामि । अण्णधा जदि ण भणीशि ता कवालतलपविट्ठकवित्थगुडिअं विअ मत्थअं दे मडमडाइश्शं ।

मैत्रेयः । [1]भणिस्सं ।

संस्थानकः । (अपवार्य) [2]चेडे गडे शच्चकं जेव्व भावे ।

चेटः । [3]अध इं ।

संस्थानकः । [4]ता शिग्घं अवक्कमम्ह ।

चेटः । [5]ता गेण्हेदु भट्टके आशिं ।

संस्थानकः । [6]तेव जेव्व हत्थे चिट्ठदु ।

चेटः । [7]ऐशे भट्टालके । गेण्हदु णं भट्टके आशिं ।

संस्थानकः । (विपरीतं गृहीत्वा)

णिव्वक्कलं मूलकपेशिवण्णं खन्देण घेत्तूण अ कोशशुत्तं ।
कुक्कोहि कुक्कीहिं अ बुक्कअन्ते जधा शिआले शलणं पलामि ॥५२

(परिक्रम्य निष्क्रान्तौ ।)

मैत्रेयः । [8]भोदि रदणिए ण हु दे अअं अवमाणो तत्थभवदो चारुदत्तस्स णिवेदइदव्वो । दोग्गच्चपीडिअस्स मण्णे दिउणदरा पीडा हुविस्सदि ।

रदनिका । [9]अंज मित्तेअ रअणिआ खु अहं सञ्जदमुही ।

प्रासादबालाग्रकपोतवाटिकायामुपविष्टः शृणोमि । अन्यथा यदि न भणसि तदा कपाटतलप्रविष्टं कपित्थगुडिकमिव मस्तकं ते मडमडायिष्ये ।

(१) भणिष्यामि ।

(२) चेट गतः सत्यमेव भावः । (३) अथ किम् ।

(४) तच्छीघ्रमपक्रमावः ।

(५) तद् गृह्णातु भट्टारकोऽसिम् । (६) तवैव हस्ते तिष्ठतु ।

(७) एष भट्टारक । गृह्णात्वेनं भट्टारकोऽसिम् ।

(८) निर्वल्कलं मूलकपेशिवर्णं स्कन्धेन गृहीत्वा च कोषसुप्तम् ।
कुक्कुरैः कुक्कुरीभिश्च बुक्कयमानो यथा शृगालः शरणं प्रयामि ॥

(९) भवति रदनिके न खलु तेऽयमपमानस्तत्रभवते चारुदत्ताय निवेदयितव्यः । दौर्गत्यपीडितस्य मन्ये द्विगुणतरा पीडा भविष्यति ।

(१०) आर्य मैत्रेय रदनिका खल्वहं संयतमुखी ।

मैत्रेयः । एवं ण्णेदं ।

चारुदत्तः । (वसन्तसेनामुद्दिश्य) रदनिके मारुताभिलाषी प्रदोषसमयः । शीतार्तो रोहसेनः । ततः प्रवेश्यतामभ्यन्तरमयम् । अनेन प्रावारकेण छादयैनम् । (इति प्रावारकं प्रयच्छति)

वसन्तसेना । (स्वगतम्) केधं परिअणोत्ति मं अवगच्छदि । (प्रावारकं गृहीत्वा समाघ्राय च स्वगतं सस्पृहम्) अम्महे जादीकुसुमवासिदो पावारओ । अणुदासीणं से जोव्वणं पडिहासेदि । (अपवारितकेन प्रावृणोति ।)

चारुदत्तः । ननु रदनिके रोहसेनं गृहीत्वाभ्यन्तरं प्रविश ।

वसन्तसेना । (स्वगतम्) मन्दभाइणी खु अहं तुअ अब्भन्तरस्स ।

चारुदत्तः । ननु रदनिके प्रतिवचनमपि नास्ति । कष्टम् ।

यदा तु भाग्यक्षयपीडितां दशां नरः कृतान्तोपहितां प्रपद्यते ।
तदास्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोपि विरज्यते जनः॥५३

(उपसृत्य रदनिका मैत्रेयश्च)

मैत्रेयः । भो इअं सा रअणिआ ।

चारुदत्तः । इयं सा रदनिका । इयमपरा का ।

अविज्ञातावसक्तेन दूषिता मम वाससा ।

वसन्तसेना । (स्वगतम्) णं भूसिदा ।

चारुदत्तः । छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते ॥५४

अथवा न युक्तं परकलत्रदर्शनम् ।

मैत्रेयः । भो अलं परकलत्तदंसणसङ्काए । एसा वसन्तसेणा कामदेवाअदणुज्जाणादो पहुदि भवन्तमणुरत्ता ।

---

(१) एवं न्विदम् ।

(२) कथं परिजन इति मामवच्छति । (३) अम्महे जातीकुसुमवासितः प्रावारकः । अनुदासीनमस्य यौवनं प्रतिभासते ।

(४) मन्दभागिनी खल्वहं तवाभ्यन्तरस्य ।

(५) भो इयं सा रदनिका । (६) ननु भूषिता ।

(७) भो अलं परकलत्रदर्शनशङ्कया । एषा वसन्तसेना कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ता ।

चारुदत्तः । अये इयं वसन्तसेना । (स्वगतम्)

यया मे जनितः कामः क्षीणे विभवविस्तरे ।
क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति ॥५५

मैत्रेयः । भो वअस्स एसो खु राअसालो भणादि ।

चारुदत्तः । किम् ।

मैत्रेयः । ऐसा ससुवण्णा सहिलण्णा णवणाडअदंसणुट्ठिदा सुत्तधालिव्व वसन्तसेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्काराणुणीअमाणा तुह गेहं पविट्ठा ।

वसन्तसेना । (स्वगतम्) बलक्काराणुणीअमाणोत्ति जं सच्चं अलंकिदम्हि एदेहिं अक्खरेहिं ।

मैत्रेयः । तँा जइ मम हत्थे सअं जेव्व पट्ठाविअ एणं समप्पेसि ता अधिअरणे ववहारं विणा लहुअं णिज्जादमाणाह तव मए अणुबद्धा पीदी हुविस्सदि । अण्णधा आमरणं वेरं हुविस्सदि ।

चारुदत्तः । (सावज्ञम्) अज्ञोऽसौ । (स्वगतम्) अये कथं देवतोपस्थानयोग्या युवतिरियम् । तेन खलु तस्यां वेलायां

प्रविश गृहमिति प्रतोद्यमाना न चलति भाग्यकृतां दशामवेक्ष्य ।
पुरुषपरिचयेन च प्रगल्भं न वदति यद्यपि भाषते बहूनि ॥५६

(प्रकाशम्) भवति वसन्तसेने अनेनाविज्ञानादपरिज्ञातपरिजनोपचारेणापराद्धोऽस्मि । शिरसा भवतीमनुनयामि ।

---

(१) भो वयस्य एष खलु राजश्यालो भणति ।

(२) एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात् प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गेहं प्राविष्टा ।

(३) बलात्कारानुनीयमानेति यत्सत्यमलंकृतास्म्येतैरक्षरैः ।

(४) तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोधिकरणे व्यवहारं विना लघुकं निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति । अन्यथामरणं वैरं भविष्यति ।

वसन्तसेना । एदिणा अनुचिदभूमिआरोहणेण अवरद्धा अज्जं सीसेण पणमिअ पसादेमि ।

मैत्रेयः । भो दुवेवि तुम्हे सुखं पणमिअ कलमकेदारा अण्णोण्णं सीसेण सीसं समाअदा । अहं पि इमिणा करहजाणुसरिसेण सीसेण दुवेवि पसादेमि उट्ठेध त्ति ।

चारुदत्तः । भवतु । तिष्ठतु प्रणयः ।

वसन्तसेना । (स्वगतम्) चेदुरो मधुरो अ अअं उवण्णासो । ण जुत्तं अज्ज ईदिसेण इध आअदाए मए पडिवसिदुं । भोदु । एव्वं दाव भणिस्सं । (प्रकाशम्) अज्ज जइ एव्वं अहं अज्जस्स अणुगेण्हा ता इच्छे अहं इमं अलंकारअं अज्जस्स गेहे णिक्खिविदुम् । अलंकारस्स णिमित्तं एदे पापा अणुसरन्ति ।

चारुदत्तः । अयोग्यमिदं न्यासस्य ग्रहम् ।

वसन्तसेना । अज्ज अलिअं । पुरुसेसु णासा णिक्खिविअन्ति ण उण गेहेसु ।

चारुदत्तः । मैत्रेय गृह्यतामयमलंकारः ।

वसन्तसेना । अणुग्गहिदम्हि । (इत्यलंकारानर्पयति)

मैत्रेयः । (गृहीत्वा) सोत्थि भोदिए ।

चारुदत्तः । धिङ् मूर्ख न्यासः खल्वयम् ।

---

(१) एतेनानुचितभूमिकारोहणेनापराद्धार्यै शीर्षेण प्रणम्य प्रसादयामि ।

(२) भो द्वावपि युवां सुखं प्रणम्य कलमकेदारावन्योन्यं शीर्षेण शीर्षं समागतौ । अहमप्यमुना करभजानुसदृशेन शीर्षेण द्वावपि युवां प्रसादयामि । उत्तिष्ठतमिति ।

(३) चतुरो मधुरश्चायमुपन्यासः । न युक्तमद्येदृशेनेहागतया मया प्रतिवस्तुम् । भवत्वेवं तावद् भणिष्यामि । (४) आर्य यद्येवमहमार्यस्यानुग्राह्या तदिच्छाम्यहमिमलंकारकमार्यस्य गेहे निक्षेप्तुम् । अलंकारस्य निमित्तमेते पापा अनुसरन्ति ।

(५) आर्य अलीकम् । पुरुषेषु न्यासा निक्षिप्यन्ते न पुनर्गेहेषु ।

(६) अनुगृहीतास्मि । (७) स्वस्ति भवत्यै ।

मैत्रेयः । (अपवार्य) जइ एव्वं ता चोरेहिं अवहरीअदु ।

चारुदत्तः । अचिरेणैव कालेन —

मैत्रेयः । ऐसो से अम्हाणं विण्णासो–

चारुदत्तः । निर्यातयिष्ये ।

वसन्तसेना । अज्ज इच्छे अहं इमिणा अज्जेण अणुगच्छिज्जन्ती सकं गेहं गन्तुं ।

चारुदत्तः । मैत्रेय अनुगच्छ तत्रभवतीम् ।

मैत्रेयः । तुमं जेव्व एदं कलहंसगामिणीं अणुगच्छन्तो राअहंसो विअ सोहसि । अहं उण बम्हणो तहिं जणेहिं चउप्पहोवणीदो विअ उवहारो कुक्कुरेहिं विअ खज्जमाणो विवज्जिस्सं ।

चारुदत्तः । एवं भवतु । स्वयमेवानुगच्छामि भवतीम् । तद्राजमार्ग-विश्रासयोग्याः प्रज्वाल्यन्तां प्रदीपिकाः ।

मैत्रेयः । वड्ढमाणअ पज्जालेहि पदीविआओ ।

चेटः । (जनान्तिकम्) अले तेल्लेण विणा पदीविआओ पज्जालीअन्ति ।

मैत्रेयः । (जनान्तिकम्) भो ताओ क्खु अम्हाणं पदीविआओ अव-माणिदनिद्धणकामुआ विअ गणिआ णिस्सिणेहाओ दाणिं संवुत्ता ।

चारुदत्तः । मैत्रेय भवतु । कृतं प्रदीपिकाभिः । पश्य

---

(१) यद्येवं तदा चौरैरपाह्रियताम् ।

(२) एषोऽस्या अस्माकं विन्यासः–

(३) आर्य इच्छाम्यहमनेनार्येणानुगम्यमाना स्वकं गेहं गन्तुम् ।

(४) त्वमेवैतां कलहंसगामिनीमनुगच्छन् राजहंस इव शोभसे । अहं पुनर्ब्राह्मणो यत्र तत्र जनैश्चतुष्पथोपनीत इवोपहारः कुक्कुरैरिव खाद्य-मानो विपत्स्ये ।

(५) वर्धमानक प्रज्वालय प्रदीपिकाः ।

(६) अरे तैलेन विना प्रदीपिका प्रज्वाल्यन्ते ।

(७) भो ताः खल्वस्माकं प्रदीपिका अवमानितनिर्धनकामुका इव गणिका निःस्नेहा इदानीं संवृत्ताः ।

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
र्ग्रहगणपरिवारो राजमार्गप्रदीपः ।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति ॥५७

(उत्थाय सानुरागम्) भवति वसन्तसेने इदं भवत्या गृहम् । प्रविशतु भवती ।

(वसन्तसेना सानुरागमवलोकयन्ती निष्क्रान्ता)

चारुदत्तः । वयस्य गता वसन्तसेना । तदेहि । गृहमेव गच्छावः ।

राजमार्गो हि शून्योऽयं रक्षिणः संचरन्ति च ।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी ॥५८

(परिक्रम्य) इदं च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ वर्द्धमानकेनापि दिवा ।

मैत्रेयः । जधा भवं आणवेदि ।[1]

(इति निष्क्रान्तौ)

इति मृच्छकटिकेऽलंकारन्यासो नाम प्रथमोऽङ्कः ।

---

(१) यथा भवानाज्ञापयति ।

द्वितीयोऽङ्कः ।

(प्रविश्य) **चेटी** । [1]अत्ताए अज्जआसआसं सन्देसेण पेसिदम्हि । ता जाव पाविसिअ अज्जआसआसं गच्छामि । (परिक्रम्यावलोक्य च) [2]ऐसा अज्जआ हिअएण कंपि आलिहन्ती चिट्ठदि । ता जाव उपसप्पामि ।

(ततः प्रविशत्यासनस्था सोत्कण्ठा वसन्तसेना मदनिका च ।)

वसन्तसेना । [3]हञ्जे तदो तदो ।

मदनिका । [4]अज्जए ण किंपि मन्तेसि । किं तदो तदो ।

वसन्तसेना । [5]किं मए भणिदं ।

मदनिका । [6]तदो तदो त्ति ।

वसन्तसेना । (सभूक्षेपम्) [7]आं एव्वं ।

(उपसृत्य) **प्रथमा चेटी** । [8]अज्जए अत्ता आदिसदि ण्हादा भविअ देवदाणं पूअं णिव्वत्तेहि त्ति ।

वसन्तसेना । [9]हञ्जे विण्णवेहि अत्तं अज्ज ण ण्हाइस्सं । ता बम्हणो लेव्व पूअं निव्वत्तेदु त्ति ।

चेटी । [10]जं अज्जआ आणवेदि । (इति निष्क्रान्ता ।)

(१) मात्रा आर्यासकाशं संदेशेन प्रेषितास्मि । तद्यावत् प्रविश्यार्यासकाशं गच्छामि । (२) एषार्या हृदयेन कमप्यालिखन्ती तिष्ठति । तद्यावदुपसर्पामि ।

(३) हञ्जे ततस्ततः ।

(४) आर्ये न किमपि मन्त्रयसे । किं ततस्ततः ।

(५) किं मया भणितम् ।

(६) ततस्तत इति । (७) आमेवम् ।

(८) आर्ये मातादिशति स्नाता भूत्वा देवतानां पूजा निर्वर्तयेति ।

(९) हञ्जे विज्ञापय मातरमद्य न स्नास्यामि । तद् ब्राह्मण एव पूजां निर्वर्तयत्विति ।

(१०) यदार्याज्ञापयति ।

मदनिका। [1]अज्जए सिणेहो पुच्छदि ण पुरोभाइदा। ता किं णेदं।

वसन्तसेना। [2]मैदणिए केरिसिं मं पेक्खसि।

मदनिका। [3]अज्जआए सुण्णहिअअत्तणेण जाणामि हिअअगदं [4]किंपि अज्जआ अहिलसदि त्ति।

वसन्तसेना। [5]सुट्ठु तुए जाणिदं। परहिअअग्गहणपण्डिआ मदणिआ क्खु तुमं।

मदनिका। [6]पिअं मे पिअं। कामो क्खु णाम एसो भअवं अनुग्गहिदो महूसवो तरुणजणस्स। ता कधेदु अज्जआ किं राआ राअवल्लहो वा सेवीअदि।

वसन्तसेना। [7]हंजे रमिदुमिच्छामि ण सेविदुं।

मदनिका। [8]विज्जाविसेसालंकिदो किं कोवि बम्हणो जुआ कामीअदि।

वसन्तसेना। [9]पूअणीओ मे बम्हणो जणो।

मदनिका। [10]किं अणेअणअराहिगमणजणिदविहववित्थारो वाणिअजुआ वा कामीअदि।

वसन्तसेना। [11]हंजे उवारूढसिणेहं पि पणइजणं परिच्चइअ देसन्तरगमणेण वाणिअजणो महन्तं विओअदुक्खं उप्पादेदि।

---

(१) आर्ये स्नेहः पृच्छति न पुरोभागिता। तद् किं न्विदम्।

(२) मदनिके कीदृशीं मां प्रेक्षसे।

(३) आर्यायाः शून्यहृदयत्वेन जानामि हृदयगतं कमप्यार्याभिलषतीति।

(४) सुष्ठु त्वया ज्ञातम्। परहृदयग्रहणपण्डिता मदनिका खलु त्वम्।

(५) प्रियं मे प्रियम्। कामः खलु नामैष भगवाननुगृहीतो महोत्सवस्तरुणजनस्य। तत्कथयत्वार्या किं राजा राजवल्लभो वा सेव्यते।

(६) हञ्जे रन्तुमिच्छामि न सेवितुम्।

(७) विद्याविशेषालंकृतः किं कोऽपि ब्राह्मणो युवा काम्यते।

(८) पूजनीयो मे ब्राह्मणो जनः।

(९) किमनेकनगराभिगमनजनितविभवविस्तरो वाणिजयुवा वा काम्यते।

(१०) हञ्जे उपारूढस्नेहमपि प्रणयिजनं परित्यज्य देशान्तरगमनेन वाणिजजनो महद्वियोगजं दुःखमुत्पादयति।

मदनिका । [1]अज्जए ण राआ ण राअवल्लहो ण बम्हणो ण वाणिअजणो। ता को दाणिं सो भट्टिदारिआए कामीअदि ।

वसन्तसेना । [2]हंजे तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि ।

मदनिका । [3]अज्जए गदम्हि ।

वसन्तसेना । [4]हंजे तधा वि मं उदासीणा विअ पुच्छसि ।

मदनिका। [5]जाणिदं। किं सो जेव्व जेण अज्जआ सरणाअदा अब्भुववण्णा।

वसन्तसेना । [6]किंणामहेओ क्खु सो ।

मदनिका । [7]सो क्खु सेट्ठिचत्तरे पडिवसदि ।

वसन्तसेना । [8]अइ णामं से पुच्छिदासि ।

मदनिका । [9]सो क्खु अज्जए सुग्गहिदणामहेओ अज्जचारुदत्तो णाम ।

वसन्तसेना । (सहर्षम्) [10]साहु मदणिए साहु । सुट्ठु तुए जाणिदं ।

मदनिका । (स्वगतम्) [11]एव्वं दाव । (प्रकाशम्) [12]अज्जए दलिद्दो क्खु सो सुणीअदि ।

वसन्तसेना । [13]अदो जेव्व कामीअदि । दलिद्दपुरिससंकन्तमणा क्खु गणिआ लोए अवअणीआ भोदि ।

---

(१) आर्ये न राजा न राजवल्लभो न ब्राह्मणो न वाणिजजनस्तत्क इदानीं स भर्तृदारिकया काम्यते ।

(२) हञ्जे त्वं मया सह कामदेवायतनोद्यानं गतासीः ।

(३) आर्ये गतास्मि । (४) हञ्जे तथापि मामुदासीनेव पृच्छसि ।

(५) ज्ञातम् । किं स एव येनार्या शरणागताभ्युपपन्ना ।

(६) किंनामधेयः खलु सः ।

(७) स खलु श्रेष्ठिचत्वरे प्रतिवसति ।

(८) अयि नामास्य पृष्टासि ।

(९) स खलु आर्ये सुगृहीतनामधेय आर्यचारुदत्तो नाम ।

(१०) साधु मदनिके साधु । सुष्ठु त्वया ज्ञातम् ।

(११) एवं तावत् । (१२) आर्ये दरिद्रः खलु स श्रूयते ।

(१३) अत एव काम्यते । दरिद्रपुरुषसक्रान्तमनाः खलु गणिका लोकेऽवचनीया भवति ।

मदनिका । अज्जए किं झीणकुसुमं सहआरपादवं महुअरीओ उण सेवन्ति ।

वसन्तसेना । अदो जेव्व ताओ महुअरीओ वुच्चन्ति ।

मदनिका । अज्जए जइ सो मणीसिदो ता कीस दाणिं सहसा णाहिसारीअदि ।

वसन्तसेना । हैञ्जे सहसा अहिसारिअन्तो पच्चुअआरदुब्बलदाए मा दाव जणो दुल्लहदंसणो पुणो भविस्सदि ।

मदनिका । किं अदो जेव्व सो अलंकारओ तस्स हत्थे णिक्खित्तो ।

वसन्तसेना । हैञ्जे सुट्ठ दे जाणिदं ।

(नेपथ्ये) अले भट्टा दशसुवण्णाह लुद्धु जूदकरु पपलीणु पपलीणु । ता गेण्ह गेण्ह । चिट्ठ चिट्ठ । दूलात् पदिट्ठोसि ।

(प्रविश्यापटीक्षेपेण संभ्रान्तः)

संवाहकः । कट्टे एशे जूदिअलभावे । हीमाणहे ।

णवबन्धणमुक्काए विअ गद्दहीए हा ताडिदोम्हि गद्दहीए ।
अक्कलाअमुक्काए विअ शत्तीए घडुक्को विअ घादिदोम्हि शत्तीए ॥१

---

(१) आर्ये किं हीनकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते ।

(२) अत एव ता मधुकर्य उच्यन्ते ।

(३) आर्ये यदि स मनीषितस्तत् किमर्थमिदानीं सहसा नाभिसार्यते ।

(४) हञ्जे सहसाभिसार्यमाणः प्रत्युपकारदुर्बलतया मा तावज्जनो दुर्लभदर्शनः पुनर्भविष्यति ।

(५) किमत एव सोऽलंकारस्तस्य हस्ते निक्षिप्तः ।

(६) हञ्जे सुष्ठु त्वया ज्ञातम् ।

(७) अरे भट्टारक दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः । तद् गृहाण गृहाण । तिष्ठ तिष्ठ । दूरात् प्रदृष्टोऽसि ।

(८) कष्ट एष द्यूतकरभावः ।

नवबन्धनमुक्तयेव गर्दभ्या हा ताडितोऽस्मि गर्दभ्या ।
अक्षराजमुक्तया शक्त्या घटोत्कच इव घातितोऽस्मि शक्त्या ॥

लेखअवावडहिअअं शहिअं दट्ठूण झत्ति पब्भट्ठे ।
एण्हिं मग्गणिवडिदे कं णु हु शलणं पवज्जामि ॥२

ता जाव एदे शहिअजूदिअला अण्णदो मं अण्णेशन्ति ताव **इदो विप्पडीवेहिं** पादेहिं एदं शुण्णदेउलं पविशिअ देवीहुविश्शं ।

(बहुविधं नाट्यं कृत्वा तथा स्थितः । ततः प्रविशति माथुरो द्यूतकरश्च ।)

माथुरः । अले भट्टा दशसुवण्णाह लुद्धु जूदकरु पपलीणु पपलीणु । गेण्ह गेण्ह । चिट्ठ चिट्ठ । दूलात् पदिट्ठोसि ।

द्यूतकरः । **जइ वज्जसि पाआलं इन्दं शलणं च संपदं जासि ।**
साहिअं वज्जिअ एक्कं रुद्दो वि ण रक्खिदुं तरइ ॥३

माथुरः । **कहिं कहिं सुसहिअविप्पलम्भआ**
पलासि ले भअपलिवेविदङ्गआ ।
पदे पदे समविसमं खलन्तआ
कुलं जसं अइकसणं कलेन्तआ ॥४

द्यूतकरः । (पदं वीक्ष्य) ऐसो वज्जदि । इअं पणट्ठा पदवी ।

माथुरः । (आलोक्य सवितर्कम्) अले विप्पदीवु पादु । पडिमाशुण्णु

लेखकव्याप्तहृदयं सभिकं दृष्ट्वा झटिति प्रभ्रष्टः ।
इदानीं मार्गनिपतितः कं नु खलु शरणं प्रपद्ये ॥

तत्रावदेतौ सभिकद्यूतकारावन्यतो मामन्विष्यतस्तावदितो विप्रतीपाभ्यां पादाभ्यामेतच्छून्यं देवकुलं प्रविश्य देवीभविष्यामि ।

(१) अरे भट्टारक दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः । गृहाण गृहाण । तिष्ठ तिष्ठ । दूरात् प्रदृष्टोऽसि ।

यदि व्रजसि पातालमिन्द्रं शरणं च सांप्रतं यासि ।
सभिकं वर्जयित्वैकं रुद्रोऽपि न रक्षितुं तरति ॥

(२) कुत्र कुत्र सुसभिकविप्रलम्भक पलायसे रे भयपरिवेपिताङ्गक ।
पदे पदे समविषमं स्खलन् कुलं यशोऽतिकृष्णं कुर्वन् ॥

(३) एष व्रजति । इयं प्रनष्टा पदवी ।

(४) अरे विप्रतीपौ पादौ प्रतिमाशून्यं देवकुलम् ।

देउल। (विचिन्त्य) धुत्तु जूदिअरु विप्पदीवेहिं पादेहिं देउलं पविट्ठु।

द्यूतकरः। ता अणुसरेम्ह।

माथुरः। एव्वं भोदु।

(उभौ देवकुलप्रवेशं निरूपयतः। दृष्ट्वान्योन्यं संज्ञाप्य)

द्यूतकरः। कधं कट्ठमयी पडिमा।

माथुरः। अले ण हु ण हु। शेलप्पडिमा। (इति बहुविधं चालयति। संज्ञाप्य च) एव्वं भोदु। एहि जूदं किलेम्ह। (बहुविधं द्यूतं क्रीडतः।)

संवाहकः। (द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा स्वगतम्) अले

कत्ताशद्दे णिण्णाणअस्श हलइ हडकं मणुस्शस्श।
ढक्काशद्दे व्व णडाधिवस्श पब्भट्ठलज्जस्श ॥५
जाणामि ण कीलिस्शं शुमेलुशिहलपडणशण्णिहं जूअं।
तह वि हु कोइलमहुले कत्ताशद्दे मणं हलदि ॥६

द्यूतकरः। मम पाठे मम पाठे।

माथुरः। णं हु मम पाठे मम पाठे।

संवाहकः। (अन्यतः सहसोपसृत्य) णं मम पाठे।

द्यूतकरः। लद्धे गोहे।

---

(१) धूर्तौ द्यूतकरौ विप्रतीपाभ्यां पादाभ्यां देवकुलं प्रविष्टः।
(२) तदनुसरावः। (३) एवं भवतु।
(४) कथं काष्ठमयी प्रतिमा।
(५) अरे न खलु न खलु। शैलप्रतिमा।
(६) एवं भवतु। एहि द्यूतेन क्रीडावः।
(७) अरे। कत्ताशब्दो निर्नाणकस्य हरति हृदयं मनुष्यस्य।
ढक्काशब्द इव नराधिपस्य प्रभ्रष्टराज्यस्य ॥
जानामि न क्रीडिष्यामि सुमेरुशिखरपतनसंनिभं द्यूतम्।
तथापि खलु कोकिलमधुरः कत्ताशब्दो मनो हरति ॥
(८) मम पाठो मम पाठः। (९) न खलु। मम पाठो मम पाठः।
(१०) ननु मम पाठः। (११) लब्धः पुरुषः।

माथुरः । (गृहीत्वा) [1]अले पेदण्डा गहीदोसि । पअच्छ तं दशसुवण्णं ।
संवाहकः । [2]अज्ज दइस्सं ।
माथुरः । [3]अहुणा पअच्छ ।
संवाहकः । [4]दइस्सं । पशादं कलेहि ।
माथुरः । [5]अले णं संपदं पअच्छ ।
संवाहकः । [6]शिलु पडदि । (इति भूमौ पतति। उभौ बहुविधं ताडयतः।)
माथुरः । [7]एंसु तुमं हु जूदिअरमण्डलीए बद्धो सि ।
संवाहकः । (उत्थाय सविषादम्) कधं जूदिअलमण्डलीए बद्धोम्हि । ही । एशे अम्हाणं जूदिअलाणं अलङ्घणीए शमए । ता कुदो दइस्सं ।
माथुरः । [8]अले गन्थु कुलु कुलु ।
संवाहकः । [9]एव्वं कलेमि । (द्यूतकरमुपस्पृश्य) [10]अद्धं ते देमि । अद्धं मे मुञ्चदु ।
द्यूतकरः । [11]एव्वं भोदु ।
संवाहकः । (सभिकमुपसृत्य) [12]अद्धदश गन्थु कलेमि । अद्धं पि मे अज्जो मुञ्चदु ।
माथुरः । [13]को दोसु । एव्वं भोदु ।

---

(१) अरे लुप्तदण्डक गृहीतोऽसि । प्रयच्छ तद्दशसुवर्णम् ।
(२) आर्य दास्यामि । (३) अधुना प्रयच्छ ।
(४) दास्यामि । प्रसादं कुरु ।
(५) अरे ननु साम्प्रतं प्रयच्छ । (६) शिरः पतति ।
(७) एष त्वं खलु द्यूतकरमण्डल्या बद्धोऽसि ।
(८) कथं द्यूतकरमण्डल्या बद्धोऽस्मि । कष्टम् । एषोऽस्माकं द्यूतकराणामलङ्घनीयः समयः । तत्कुतो दास्यामि ।
(९) अरे गण्डः क्रियतां क्रियताम् ।
(१०) एवं करोमि । (११) अर्धं तुभ्यं ददामि । अर्धं मे मुञ्चतु ।
(१२) एवं भवतु ।
(१३) अर्धस्य गण्डं करोमि । अर्द्धमपि मह्यमार्यो मुञ्चतु ।
(१४) को दोषः । एवं भवतु ।

संवाहकः । (प्रकाशम्) [1]अज्ज अद्धं तुए मुक्के ।
माथुरः । [2]मुक्के ।
संवाहकः । (द्यूतकरं प्रति) [3]अद्धं तुए वि मुक्के ।
द्यूतकरः । [4]मुक्के ।
संवाहकः । [5]सम्पदं गमिश्शं ।
माथुरः । [6]पअच्छ तं दशसुवण्णं । कहिं गच्छसि ।
संवाहकः । [7]पेक्खध पेक्खध भट्टालआ । हा । शम्पदं जेव्व एक्काह अद्धे गन्धु कडे । अवलाह अद्धे मुक्के । तहवि मं अवलं शम्पदं जेव्व मग्गह ।
माथुरः । (गृहीत्वा) [8]धुत्त माथुरु अहं णिउणु । एहिं ण अहं धुत्तिज्जामि । ता पअच्छ तं पेण्डआ सव्वं सुवण्णं सम्पदं ।
संवाहकः । [9]कुदो दइश्श ।
माथुरः । [10]पिदरं विक्किणिअ पअच्छ ।
संवाहकः । [11]कुदो मे पिदा ।
माथुरः । [12]मादरं विक्किणिअ पअच्छ ।
संवाहकः । [13]कुदो मे मादा ।
माथुरः । [14]अप्पाणं विक्किणिअ पअच्छ ।
संवाहकः । [15]केलेध पशादं । णेध मं लाजमग्गं

(१) आर्य अर्धं त्वया मुक्तम् । (२) मुक्तम् ।
(३) अर्धं त्वयापि मुक्तम् । (४) मुक्तम् । (५) सांप्रतं गमिष्यामि ।
(६) प्रयच्छ तद्दशसुवर्णम् । कुत्र गच्छसि ।
(७) प्रेक्षध्वं प्रेक्षध्वं भट्टारकाः । हा । सांप्रतमेवैकस्यार्धे गण्डः कृतः । अपरस्यार्धे मुक्तम् । तथापि मामबलं सांप्रतमेव याचते ।
(८) धूर्त माथुरोऽहं निपुणः । अत्र नाहं धूर्ये । तत् प्रयच्छ तल्लुसदण्डक सर्वं सुवर्णं सांप्रतम् ।
(९) कुतो दास्यामि । (१०) पितरं विक्रीय प्रयच्छ ।
(११) कुतो मे पिता । (१२) मातरं विक्रीय प्रयच्छ ।
(१३) कुतो मे माता । (१४) आत्मानं विक्रीय प्रयच्छ ।
(१५) कुरुत प्रसादम् । नयत मां राजमार्गम् ।

माथुरः । पशरु पशरु ।

संवाहकः । [1]एव्वं भोदु । (परिक्रामति) [2]अज्जा क्किणिध मं इमश्श शहिअश्श हत्थादो दशेहिं शुवण्णकेहिं । (दृष्ट्वा आकाशे) [3]किं भणाध । किं कलहस्ससि त्ति । गेहे दे कम्मकले हुविश्शं । कधं अदइअ पडिवअणं गदे । भोदु एव्वं । इमं अण्णं भणइश्शं । (पुनस्तदेव पठति) [4]कधं एशे वि मं अवधीलिअ गदे । आः । अज्जचालुदत्तश्श विहवे विहडिदे एशे बद्दामि मन्दभाए ।

माथुरः । [5]णं देहि ।

संवाहकः । [6]कुदो दइश्शं । (इति पतति । माथुरः कर्षति)

संवाहकः । [7]अज्जा पलित्ताअध । (ततः प्रविशति दर्दुरकः ।)

दर्दुरकः । भो द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम् ।

न गणयति पराभवं कुतश्चिद्धरति ददाति च नित्यमर्थजातम् ।
नृपतिरिव निकाममायदर्शी विभववता समुपास्यते जनेन ॥७

अपि च । द्रव्यं लब्धं द्यूतेनैव दारामित्रं द्यूतेनैव ।
दत्तं भुक्तं द्युतेनैव सर्वं नष्टं द्यूतेनैव ॥८

अपि च । त्रेता हृतसर्वस्वः पावरपतनाच्च शोषितशरीरः ।
नर्दितदर्शितमार्गः कटेन विनिपातितो यामि ॥९

(अग्रतोऽवलोक्य) अयमस्माकं पूर्वसभिको माथुर इत एवाभिवर्तते । भवतु । अपक्रमितुं न शक्यते । तदवगुण्ठयाम्यात्मानम् । (बहुविधं नाट्यं

---

(१) प्रसर प्रसर ।

(२) एवं भवतु । (३) आर्याः । क्रीणीध्वं मामस्य सभिकस्य हस्ताद् दशभि सुवर्णकैः । (४) किं भणत । किं करिष्यसीति । गेहे ते कर्मकरो भविष्यामि । कथमदत्त्वा प्रतिवचनं गतः । भवत्वेवम् । इममन्यं भणिष्यामि । (५) कथमेषोऽपि मामवधीर्य गतः । आः आर्यचारुदत्तस्य विभवे विघटित एषोऽहं वर्धे मन्दभाग्यः ।

(६) ननु देहि । (७) कुतो दास्यामि ।

(८) आर्याः परित्रायध्व परित्रायध्वम् ।

कृत्वा स्थितः । उत्तरीयं निरीक्ष्य)

अयं पटः सूत्रदरिद्रतां गतः अयं पटश्छिद्रशतैरलंकृतः ।
अयं पटः प्रावरितुं न शक्यते अयं पटः संवृत एव शोभते ॥१०

अथवा किमयं तपस्वी करिष्यति । यो हि

पादेनैकेन गगने द्वितीयेन च भूतले ।
तिष्ठाम्युल्लम्बितस्तावद्यावत्तिष्ठति भास्करः ॥११

माथुरः । दापय दापय ।

संवाहकः । कुदो[1] दइस्सं । (माथुरः कर्षति ।)

दर्दुरकः । अये किमेतदग्रतः । (आकाशे) किं भवानाह । अयं द्यूतकरः सभिकेन खलीक्रियते न कश्चिन्मोचयतीति । नन्वयं दर्दुरो मोचयति । (उपसृत्य) अन्तरमन्तरम् । (दृष्ट्वा) अये कयं माथुरो धूर्तः । अयमपि तपस्वी संवाहकः ।

यः स्तब्धं दिवसान्तमानतशिरा नास्ते समुल्लम्बितो
यस्योद्घर्षणलोष्टकैरपि सदा पृष्ठे न जातः क्षिणः ।
यस्यैतच्च न कुक्कुरैरहरहर्जङ्घान्तरं चर्व्यते
तस्यात्यायतकोमलस्य सततं द्यूतप्रसङ्गेन किम् ॥१२

भवतु । माथुरं तावत् सान्त्वयामि । (उपगम्य) माथुर अभिवादये । (माथुरः प्रत्यभिवादयते ।)

दर्दुरकः । किमेतत् ।

माथुरः । अअं[2] दशसुवण्णं धालेदि ।

दर्दुरकः । ननु कल्यवर्तमेतत् ।

माथुरः । (दर्दुरस्य कक्षातललुण्ठीकृतं पटमाकृष्य) भट्टा[3] पश्यत पश्यत जज्जरपडप्पावुदो अअं पुलिसो दशसुवण्णं कलत्तं भणादि ।

---

(१) कुतो दास्यामि ।

(२) अयं दशसुवर्णकं धारयति ।

(३) भट्टारकाः पश्यत पश्यत । जर्जरपटप्रावृतोऽयं पुरुषो दशसुवर्णं कैल्यवत भणति ।

दर्दुरकः । अरे मूर्ख नन्वहं दशसुवर्णान् कटकरणेन प्रयच्छामि । तत् किं यस्यास्ति धनं स किं क्रोडे कृत्वा दर्शयति । अरे

दुर्वर्णोऽसि विनष्टोऽसि दशस्वर्णस्य कारणात् ।
पञ्चेन्द्रियसमायुक्तो नरो व्यापाद्यते त्वया ॥१३

माथुरः । भट्टा तुए दशसुवण्णु कल्लवत्त । मए एसु विहवु ।

दर्दुरकः । यद्येवं श्रूयतां तर्हि । अन्यांस्तावद्दशसुवर्णानस्यैव प्रयच्छ। अयमपि द्यूतं शीलयतु ।

माथुरः । तेत् किं भोदु ।

दर्दुरकः । यदि जेष्यति तदा दास्यति ।

माथुरः । अह ण जिणादि ।

दर्दुरकः । तदा न दास्यति ।

माथुरः । अह ण जुत्तं जम्पिदुं । एव्वं अक्खन्तो तुहं पअच्छ धुत्तआ । अहं पि णाम माथुरु धुत्तु जूअं मिच्छा आदंसआमि । अण्णस्स वि अहं ण बिभेमि । धुत्ता खण्डिअवुत्तोसि तुहं ।

दर्दुरकः । अरे कः खण्डितवृत्तः ।

माथुरः । तुंहं खण्डिदवुत्तो ।

दर्दुरकः । पिता ते खण्डितवृत्तः । (संवाहकस्यापक्रमितुं संज्ञां ददाति ।)

माथुरः । गोसाविआपुत्त णं एव्वं जेव्व जूदं तुए सेविदं ।

दर्दुरकः । मया एवं द्यूतमासेवितम् ।

माथुरः । अले संवाहआ पअच्छ तं दशसुवण्णं ।

---

(१) भट्टारक तव दशसुवर्णं कल्यवर्तम् । ममैष विभवः ।

(२) तत् किं भवतु । (३) अथ न जयति ।

(४) अथ न युक्तं जल्पितुन् । एवमाचक्षाणस्त्वं प्रयच्छ धूर्तक । अहमपि नाम माथुरो धूर्तो द्यूतं मिथ्या दर्शयामि । अन्यस्मादपि अहं न बिभेमि । धूर्त खण्डितवृत्तोसि त्वम् । (५) त्वं खलु खण्डितवृत्तः ।

(६) वेश्यापुत्र नन्वेवमेव द्यूतं त्वया सेवितम् ।

(७) अरे संवाहक प्रयच्छ तद्दशसुवर्णम् ।

संवाहकः। अज्ज दइस्सं दाव दइस्सं। (माथुरः कर्षति।)

दर्दुरकः। मूर्ख परोक्षे खलीकर्तुं शक्यते न ममाग्रतः खलीकर्तुम्। (माथुरः संवाहकमाकृष्य घोणायां मुष्टिप्रहारं ददाति। संवाहकः सशोणितं मूर्च्छां नाटयन् भूमौ पतति। दर्दुरक उपसृत्यान्तरयति। **माथुरो** दर्दुरं ताडयति। दर्दुरो विप्रतीपं ताडयति।)

माथुरः। अले अले दुट्ठछिणालिआपुत्तअ फलं पि पाविहसि।

दर्दुरकः। अरे मूर्ख अहं त्वया मार्गगत एव ताडितः। श्वो यदि राजकुले ताडयिष्यसि तदा द्रक्ष्यसि।

माथुरः। एसु पेक्खिस्सं।

दर्दुरकः। कथं द्रक्ष्यसि।

माथुरः। (प्रसार्य चक्षुषी) एव्वं पेक्खिस्सं।

(दर्दुरो माथुरस्य पांशुना चक्षुषी पूरयित्वा संवाहकस्यापक्रमितुं संज्ञां ददाति। माथुरोऽक्षिणी निगृह्य भूमौ पतति। संवाहकोऽपक्रामति।)

दर्दुरकः। (स्वगतम्) प्रधानसभिको माथुरो मया विरोधितः। तन्नात्र युज्यते स्थातुम्। कथितं च मम प्रियवयस्येन शार्विलकेन यथा किल आर्यकनामा गोपालदारकः सिद्धादेशेन समादिष्टो राजा भविष्यतीति। सर्वश्चास्मद्विधो जनस्तमनुसरति। तदहमपि तत्समीपमेव गच्छामि। (इति निष्क्रान्तः)

संवाहकः। (सत्रासं परिक्रम्य दृष्ट्वा) एसे कस्स वि अपलावुदपक्खदुआलके गेहे। ता एत्थ पविशिश्सं। (प्रवेशं रूपयित्वा वसन्तसेनामालोक्य) अज्जे शलणागदेम्हि।

वसन्तसेना। अभअं सरणागदस्स। हञ्जे ढक्केहि पक्खदुआरअं। (चेटी तथा करोति।)

(१) अद्य दास्यामि तावदास्यामि।

(२) अरे अरे दुष्ट पुंश्चलीपुत्रक फलमपि प्राप्स्यसि।

(३) एष प्रेक्षिष्ये। (४) एवं प्रेक्षिष्ये।

(५) एतत्कस्याप्यपरावृतपक्षद्वारकं गेहम्। तदत्र प्रविशामि। (६) आर्ये शरणागतोऽस्मि। (७) अभयं शरणागतस्य। चेटि पिधेहि पक्षद्वारकम्।

वसन्तसेना । कुदो दे भअं ।

संवाहकः । अज्जे धणिकादो ।

वसन्तसेना । हैञ्जे संपदं अवावुणु पक्खदुआरअं ।

संवाहकः । (आत्मगतम्) कथं धणिकादो तुलिदं शे भअकालणम् । शुट्ठु क्खु एव्वं वुच्चदि ।

जे अत्तबलं जाणिअ भालं तुलिदं वहेइ माणुश्शे ।
ताह खलणं ण जाअदि ण अ कन्तालगडे विवज्जदि ॥१४

एत्थ लक्खिदम्हि ।

माथुरः । (अक्षिणी प्रमृज्य द्यूतकरं प्रति) अले देहि देहि ।

द्यूतकरः । भट्टा जावच्चिअ अम्हे दहुरेण कलहाविदा तावच्चिअ सो गोहो अवक्कन्तो ।

माथुरः । तस्स जूदिअरस्स मुट्ठिप्पहारेण णासिका भग्गा आसि । ता एहि रुहिरपहं अणुसरेम्ह ।

(अनुसृत्य) **द्यूतकरः** । भट्टा वसन्तसेणागेहं पविट्ठो सो ।

माथुरः । भूदाइ सुवण्णाइ ।

द्यूतकरः । लाउलं गदुअ निवेदेम्ह ।

---

(१) कुतस्ते भयम् । (२) आर्ये धनिकात् ।

(३) चेटि सांप्रतमपावृणु पक्षद्वारकम् ।

(४) कथं धनिकात् तुलितमस्या भयकारणम् । सुष्ठु खल्वेवमुच्यते ।

य आत्मबलं ज्ञात्वा भारं तुलितं वहति मनुष्यः ।
तस्य स्खलनं न जायते न च कान्तारगतो विपद्यते ॥

अत्र रक्षितोस्मि । (५) अरे देहि देहि ।

(६) भर्तः । यावदेव वयं दर्दुरेण कलहायितास्तावदेव स पुरुषोऽपक्रान्तः ।

(७) तस्य द्यूतकरस्य मुष्टिप्रहारेण नासिका भग्नासीत् । तदेहि रुधिरपथमनुसरावः ।

(८) भर्तः वसन्तसेनागेहं प्रविष्टः सः ।

(९) भूतानि सुवर्णानि । (१०) राजकुलं गत्वा निवेदयावः ।

माथुरः। एस धुत्तो इदो णिक्कमिअ अण्णत्त गामिस्सदि। ता उअरोधेणेव गण्हेम्ह।

(वसन्तसेना मदनिकायाः संज्ञां ददाति।)

मदनिका। कुदो अज्जो। को वा अज्जो। कस्स वा अज्जो। कं वा वित्तिं अज्जो उवजीअदि। कुदो वा भअं।

संवाहकः। सुणादु अज्जआ। अज्जए पाडलिउत्ते मे जम्मभूमा। गहवइदालके हग्गे शंवाहअश्श वित्तिं उवजीआमि।

वसन्तसेना। सुउमारा क्खु कला सिक्खिदा अज्जेण।

संवाहकः। अज्जए कलेत्ति शिक्खिदा। आजीविआ दाणिं शंवुत्ता।

मदनिका। आदिणिव्विअं अज्जेण पाडवअणं दिण्णं। तदो तदो।

संवाहकः। तदो अज्जए एशे णिजगेहे आहिण्डकाणं मुहादो शुणिअ अपुव्वदेशदंशणकुदूहलेण इह आगदे। इधवि मए पविशिअ उज्जइणिं एक्के अज्जे शुश्शूशिदे। जे तालिशे पिअदंशणे पिअवादी। दइअं ण कित्तेदि। अवकिदं विशुमलेदि। किं बहुणा उत्तेण। दक्खिणदाए पलकेलअं विअ अत्ताणअं अवगच्छदि। शलणागदवच्छले अ।

---

(१) एष धूर्त इतो निष्क्रम्यान्यत्र गमिष्यति। तस्मादुपरोधेनैव गृह्णीवः।

(२) कुत आर्यः। को वा आर्यः। कस्य वा आर्यः। कां वा वृत्तिमार्य उपजीवति। कुतो वा भयम्।

(३) शृणोत्वार्या। आर्ये पाटलिपुत्रं मे जन्मभूमिः। गृहपतिदारकोऽहम्। संवाहकस्य वृत्तिमुपजीवामि।

(४) सुकुमारा खलु कला शिक्षिता आर्येण।

(५) आर्ये कलेति शिक्षिता। आजीविकेदानीं संवृत्ता।

(६) अतिनिर्विण्णमार्येण प्रतिवचनं दत्तम्। ततस्ततः।

(७) तत आर्ये एष निजगेह आहिण्डकानां मुखाच्छ्रुत्वाऽपूर्वदेशदर्शन-कुतूहलेनेहागतः। इहापि मया प्रविश्योज्जयिनीमेक आर्यः शुश्रूषितः। यस्तादृशः प्रियदर्शनः प्रियवादी। दत्त्वा न कीर्तयति। अपकृतं विस्मरति। किं बहुनोक्तेन। दक्षिणतया परकीयमिवात्मानमवगच्छति। शरणागत-वत्सलश्च।

मदनिका । [1]को दाणिं अज्जआए मणोरहन्तरस्स गुणाइं चोरिअ उज्जइणिं अलंकरेदि ।

वसन्तसेना । [2]साहु हञ्जे साहु । मए वि एव्वं जेव्व हिअएण मन्तिदं ।

मदनिका । [3]अज्ज तदो तदो ।

संवाहकः । [4]अज्जए शे दाणिं अणुक्कोशकिदेहिं पदाणेहिं —

वसन्तसेना । [5]किं उवरदविहवो संवुत्तो ।

संवाहकः । [6]अणाचक्खिदे जेव्व कधं अज्जआए विण्णादं ।

वसन्तसेना । [7]किं एत्थ जाणीअदि । दुल्लहा गुणा विहवा अ । अपेएसु तडाएसु बहुदरं उदअं भोदि ।

मदनिका । [8]अज्ज किंणामधेओ क्खु सो ।

संवाहकः । [9]अज्जे के दाणिं तश्श भूदलमिअंकश्श णामं ण आणादि । शो क्खु शेट्ठिचत्तले पडिवशदि । शलाहणिज्जणामधेए अज्जचालुदत्ते णाम ।

वसन्तसेना । (सहर्षमासनादवतीर्य) [10]अज्जस्स अत्तणकेरकं एदं गेहं । हञ्जे देहि से आसणं । तालवेण्टअं गेण्ह । परिस्समो अज्जस्स बाधेदि । (मदनिका तथा करोति ।)

---

(१) क इदानीमार्याया मनोरथान्तरस्य गुणांश्चोरयित्वोज्जयिनीमलंकरोति ।

(२) साधु हञ्जे साधु । मयाप्येवमेव हृदयेन मन्त्रितम् ।

(३) आर्य ततस्ततः ।

(४) आर्ये स इदानीमनुक्कोशकृतैः प्रदानैः—

(५) किमुपरतविभवः संवृत्तः ।

(६) अनाख्यातमेव कथमार्यया विज्ञातम् ।

(७) किमत्र ज्ञातव्यम् । दुर्लभा गुणा विभवाश्च । अपेयेषु तडागेषु बहुतरमुदकं भवति ।

(८) आर्य किंनामधेयः खलु सः ।

(९) आर्ये क इदानीं तस्य भूतलमृगाङ्कस्य नाम न जानाति । स खलु श्रेष्ठिचत्वरे प्रतिवसति । श्लाघनीयनामधेय आर्यचारुदत्तो नाम ।

(१०) आर्यस्यात्मीयमेतद्गृहम् । हञ्जे देह्यस्यासनम् । तालवृन्तकं गृहाण । परिश्रम आर्यस्य बाधते ।

संवाहकः। (स्वगतम्) [1]कधं अज्जचालुदत्तश्श णामसंकित्तणेण ईदिशे मे आदले। शाहु अज्जचालुदत्त शाहु। पुहवीए तुमं एक्के जीवशि। शेशे उण जणे शशदि। (इति पादयोर्निपत्य) [2]भोदु अज्जए भोदु। आशणे णिशीददु अज्जआ।

वसन्तसेना। (आसने समुपविश्य) [3]अज्ज कुदो सो धणिओ।

संवाहकः। [4]शङ्कालधणे क्खु शज्जणे काह ण होइ चलाचले धणे।
जे पूइदुं पि आणादि शे पूआविशेशं पि आणादि॥१५

वसन्तसेना। [5]तदो तदो।

संवाहकः। [6]तदो तेण अज्जेण शावित्ती पलिचालके कदम्हि। चालित्तावशेशे अ तस्शि जूदोवजीविदम्हि शंवुत्ते। तदो भाअधेअविशमदाए दशशुवण्णअं जूदे हालिदं।

माथुरः। उच्छादिदोम्हि मूसिदोम्हि।

संवाहकः। [7]एदे दे शाहिअज्जदिअला मं अणुशन्धअन्ति। शंपदं शुणिअ अज्जआ पमाणं।

वसन्तसेना। [8]मैदणिए वासपादवविसण्ठुलदाए पक्खिणो इदो

---

(१) कथमार्यचारुदत्तस्य नामसंकीर्तनेनेदृशो म आदरः। साधु आर्यचारुदत्त साधु। पृथिव्यां त्वमेको जीवसि। शेषः पुनर्जनः श्वसिति। (२) भवत्वार्ये भवतु। आसने निषीदत्वार्या। (३) आर्य कुतः स धनिकः।

(४) सत्कारधनः खलु सज्जनः कस्य न भवति चलाचलं धनम्।
यः पूजयितुमपि जानाति स पूजाविशेषमपि जानाति॥

(५) ततस्ततः।

(६) ततस्तेनार्येण सवृत्तिः परिचारिकः कृतोऽस्मि। चारित्र्यावशेषे च तस्मिन् द्यूतोपजीविताऽस्मि संवृत्तः। ततो भागधेयविषमतया दशसुवर्णं द्यूते हारितम्।

(७) उत्सादितोऽस्मि। मुषितोऽस्मि।

(८) एतौ तौ सभिकद्यूतकरौ मामनुसंधत्तः। सांप्रतं श्रुत्वार्या प्रमाणम्।

(९) मदनिके वासपादपविसंष्ठुलतया पक्षिण इतस्ततोऽप्याहिण्डन्ते।

तदो वि आहिण्डन्ति। हञ्जे ता गच्छ। एदाणं सहिअजूदिअराणं अअं अज्जो जेव्व पडिवादेदि त्ति इमं हत्थाभरणअं तुमं देहि। (इति हस्तात्कटकमाकृष्य चेट्याः प्रयच्छति।)

मदनिका। (गृहीत्वा) [1]जं अज्जआ आणवेदि। (इति निष्क्रान्ता।)

माथुरः। [2]उच्छादिदोम्हि मूसिदोम्हि।

मदनिका। जैधा एदे उद्धं पेक्खन्ति दीहं णीससन्ति विसूरअन्ति अ आहिलहन्ति अ दुआराणिहिदलोअणा तधा तक्केमि एदे दे सहिअजूदिअरा हुविस्सान्ति। (उपगम्य) [3]अज वन्दामि।

माथुरः। [4]सुहं तुह होदु।

मदनिका। [5]अज्ज कदमो तुम्हाणं सहिओ।

माथुरः। [6]कँश तुहं तणुमज्झे अहरेण रददट्ठदुव्विणीदेण।
जम्पसि मणहरवअणं आलोअन्ती कडक्खेण ॥१६

णत्थि मम विहवो। अण्णत्त वज।

मदनिका। [7]जइ ईदिसाइं णं मन्तेसि ता ण होसि जूदिअरो। अत्थि कोवि तुम्हाणं धारओ।

माथुरः। [8]अत्थि। दशसुवण्णं धालेदि। किं तस्स।

हञ्जे तद्वच्छ। एतयोः सभिकद्यूतकरयोरयमार्य एव प्रतिपादयतीतीदं हस्ताभरणं त्वं देहि। (१) यदार्याज्ञापयति।

(२) उत्सादितोऽस्मि। मुषितोऽस्मि।

(३) यथैतावूर्ध्वं प्रेक्षेते दीर्घं निश्वसितो विचारयतश्चाभिलषतश्च द्वारनिहितलोचनौ तथा तर्कयाम्येतौ तौ सभिकद्यूतकरौ भविष्यतः।

(४) आर्य वन्दे। (५) सुखं तव भवतु।

(६) आर्य कतरो युवयोः सभिकः।

(७) कस्य त्वं तनुमध्ये अधरेण रतदष्टदुर्विनीतेन।
जल्पसि मनोहरवचनमालोकयन्ती कटाक्षेण ॥

नास्ति मम विभवः। अन्यत्र व्रज।

(८) यदीदृशानि ननु मन्त्रयसे तदा न भवसि द्यूतकरः। अस्ति कोऽपि युष्माकं धारकः। (९) **अस्ति। दशसुवर्णं धारयति। किं तस्य।**

मदनिका। तस्य कारणादो अजआ इमं हत्थाभरणं पडिवादेदि। णहि णहि। सो जेव्व पडिवादेदि।

माथुरः। (सहर्षं गृहीत्वा) अले भणेशि तं कुलवुत्तं भूदं तुए गन्थु। आअच्छ। पुणो जूदं रमह। (इति निष्क्रान्तौ)

मदनिका। (*वसन्तसेनामुपसृत्य*) अज्जए पडितुट्ठा गदा सहिअजूदिअरा **वसन्तसेना**। तेा गच्छदु अज्जो बन्धुअणं समस्ससिदुं।

संवाहकः। अज्जए जइ एव्वं ता इअं कला पलिअणहत्थगदा कलीअदु।

वसन्तसेना। अज्ज जस्स कारणादो इअं कला सिक्खीअदि सो जेव्व अज्जेण मुस्सूसिदपुरुव्वो मुस्सूसिदव्वो।

संवाहकः। (स्वगतम्) अज्जआए णिउणं पच्चादिट्ठोम्हि। कधं पच्चुवकलिश्शं। (प्रकाशम्) अज्जए अहं एदिणा जूदिअलावमाणेण शक्कशमणके हुविश्शं। ता शंवाहके जूदिअले शक्कशमणके शंवुत्तेत्ति शुमलिदव्वा अज्जआए एदे अक्खलु।

वसन्तसेना। अज्ज अलं साहसेण।

संवाहकः। अज्जए कले णिच्चए। (इति परिक्रम्य)

(१) तस्य कारणादार्येदं हस्ताभरणं प्रतिपादयति। नहि नहि। स एव प्रतिपादयति।

(२) अरे भणसि तं कुलपुत्र भूतस्तव गण्डः। आगच्छ पुनर्द्यूतं रमस्व।

(३) आर्ये परितुष्टौ गतौ सभिकद्यूतकरौ।

(४) तद्गच्छत्वार्यो बन्धुजनं समाश्वासयितुम्।

(५) आर्ये यद्येवं तदियं कला परिजनहस्तगता क्रियताम्।

(६) आर्ये यस्य कारणादियं कला शिक्ष्यते स एवार्येण शुश्रूषितपूर्वः शुश्रूषितव्यः।

(७) आर्यया निपुणं प्रत्यादिष्टोऽस्मि। कथं प्रत्युपकरिष्ये। (८) आर्ये अहमेतेन द्यूतकरापमानेन शाक्यश्रमणको भविष्यामि। तत् संवाहको द्यूतकरः शाक्यश्रमणकः संवृत्त इति स्मर्तव्यान्यार्ययैतान्यक्षराणि।

(९) आर्य अलं साहसेन। (१०) आर्ये कृतो निश्चयः।

जूदेण तं कदं मे जं वेंहत्थं जणस्श शव्वस्श ।
एण्हिं पाअडशीशे णलिन्दमग्गेण विहलिश्शं ॥१७

(नेपथ्ये कलकलः ।)

संवाहकः । (आकर्ण्य) [1]अले किं ण्णेदं । (आकाशे) [2]किं भणाघ । **एशे क्खु** वशन्तशेणाकेलके खुण्टमोडके णाम दुट्ठहत्थी विहलेदि त्ति । **अहो अज्जआए** गन्धगअं पेक्खिश्शं गदुअ । अह वा किं मम एदिणा । जधा-**वधादिदं** अणुचिट्ठिश्शं । (इति निष्क्रान्तः)

(ततः प्रविशत्यपटीक्षेपेण प्रहृष्टो विकटोज्ज्वलवेशः कर्णपूरकः ।)

कर्णपूरकः । [3]कहिं कहिं अज्जआ ।

मदनिका । [4]दुम्मणुस्स किं ते उव्वेअकारणं । जं अग्गदोवट्ठिदं अज्जअं **न पेक्खसि** ।

कर्णपूरकः । (दृष्ट्वा) [5]अज्जए वन्दामि ।

वसन्तसेना । [6]कण्णऊरअ परितुट्ठमुहो लक्खीअसि । ता किं ण्णेदं ।

कर्णपूरकः । (सविस्मयम्) अज्जए वञ्चिदासि जाए अज्ज कण्णऊर-**अस्स** परक्कमो ण दिट्ठो ।

वसन्तसेना । [7]कर्णऊरअ किं किं ।

कर्णपूरकः । [8]सुणादु अज्जआ । जो सो अज्जआए खुण्टमोडओ णाम

द्यूतेन तत्कृतं मे यद् विहस्तं जनस्य सर्वस्य ।
इदानीं प्रकटशीर्षो नरेन्द्रमार्गेण विहरिष्यामि ॥

(१) अरे किं न्विदम् । (२) किं भणत । एष खलु वसन्तसेनायाः खुण्ट-मोडको नाम दुष्टहस्ती विहरतीति । अहो आर्यायाः गन्धगजं प्रेक्षिष्ये गत्वा । अथवा किं ममैतेन । यथाव्यवसितमनुष्ठास्यामि । (३) कुत्र कुत्रार्या ।

(४) दुर्मनुष्य किं ते उद्वेगकारणम् । यदग्रतोऽवस्थितामार्यां न प्रेक्षसे ।

(५) आर्ये वन्दे । (६) कर्णपूरक परितुष्टमुखो लक्ष्यसे । तत् किं न्विदम् ।

(७) आर्ये वञ्चितासि यया[9]द्य कर्णपूरकस्य पराक्रमो न दृष्टः ।

(८) कर्णपूरक किं किम् ।

(९) शृणोत्वार्या । य सः आर्यायाः खुण्टमोडको नाम दुष्टहस्ती स

दुट्ठहत्थी सो आलाणत्थम्भं भञ्जिअ महमेत्थं वावादिअ महन्तं संखोहं करन्तो राअमग्गं ओदिण्णो । तदो एत्थन्तरे उग्घुट्टं जणेण ।

अवणेध बालअजणं तुरिदं आरुहध वुक्खपासादं ।
किं ण हु पेक्खध पुरदो दुट्ठो हत्थी इदो एदि ॥१८

अपि अ ।

विअलइ णेउरजुअलं छिज्जन्ति अ मेहला मणिक्खइआ ।
वलआ अ सुन्दरदरा रअणङ्कुरजालपडिबद्धा ॥१९

तदो तेण दुट्ठहत्थिणा कलचलणरदणेहिं फुल्लणलिणिं विअ णअरिं उज्जहाणिं अवगाहमाणेण समासादिदो परिव्वाजओ । तं च परिभट्टदण्डकुण्डिआभाअणं सीअरेहिं सिञ्चिअ दन्तन्तरे क्खित्तं पेक्खिअ पुणोवि उग्घुट्टं जणेण हा परिव्वाजओ वावादीअदि त्ति ।

वसन्तसेना । (ससंभ्रमम्) अहो पमादो अहो पमादो ।

कर्णपूरकः । अलं सम्भमेण । सुणादु दाव अज्जआ । तदो विच्छिण्णविसण्टुलसङ्खलाकलावअं उव्वहन्तं दन्तन्तरपरिग्गहिदं परिव्वाजअं उव्वहन्तं

आलानस्तम्भं भङ्क्त्वा महामात्रं व्यापाद्य महान्तं संक्षोभं कुर्वत् राजमार्गमवतीर्णः । ततोऽत्रान्तर उद्घुष्टं जनेन ।

अपनयत बालकजनं त्वरितमारोहत वृक्षप्रासादम् ।
किं न खलु प्रेक्षध्वं पुरतो दुष्टो हस्तीत एति ॥

अपि च । विचलति नूपुरयुगलं छिद्यन्ते च मेखला मणिखचिताः ।
वलयाश्च सुन्दरतरा रत्नाङ्कुरजालप्रतिबद्धाः ॥

ततस्तेन दुष्टहस्तिना करचरणरदनैः फुल्लनलिनीमिव नगरीमुज्जयिनीमवगाहमानेन समासादितः परिव्राजकः । तं च परिभ्रष्टदण्डकुण्डिकाभाजनं शीकरैः सिक्त्वा दन्तान्तरे क्षिप्तं प्रेक्ष्य पुनरप्युद्घुष्टं जनेन हा परिव्राजको व्यापाद्यत इति ।

(१) अहो प्रमादः । अहो प्रमादः ।

(२) अलं संभ्रमेण । शृणोतु तावदार्या । ततो विच्छिन्नविसंष्ठुलशृङ्खलाकलापमुद्वहन्तं दन्तान्तरपरिगृहीतं परिव्राजकमुद्वहन्तं तं प्रेक्ष्य कर्णपूरकेण

*तं पेक्खिअ कण्णऊरएण मए–णहि णहि अज्जआए अण्णपिण्डोवपुट्टेण दासेण–वामचलणेण जूदलेक्खअं उग्घुसिअ उग्घुसिअ तुरिदं आवणादो लोह-*दण्डं गेण्हिअ आआरिदो सो दुट्ठहत्थी ।

वसन्तसेना । तँदो तदो ।

कर्णपूरकः । आहणिऊण सरोसं तं हत्थिं विन्झसेलसिहराभं ।
मोआविओ मए सो दन्तन्तरसंठिओ परिव्वाजओ ॥२०

वसन्तसेना । सुट्ठु दे किदं । तदो तदो ।

कर्णपूरकः । तँदो अज्जए साहु रे कण्णऊरअ साहु त्ति एत्तिअमेत्तं भणन्ती विसमभरक्कन्ता विअ णावा एक्कदो पल्हत्था सअला उज्जइणी आसि । तदो अज्जए एक्केण सुण्णाइं आहरणठाणाइं परामसिअ उद्धं पेक्खिअ दीहं णीसासिअ अअं पावारओ मम उवरि क्खित्तो ।

वसन्तसेना । कँण्णऊरअ जाणीहि दाव किं एसो जादीकुसुमवासिदो पावारओ ण वेत्ति ।

कर्णपूरकः । अँज्जए मदगन्धेण सुट्ठु तं गन्धं ण जाणामि ।

मया–नहि नहि आर्यायाः अन्नपिण्डोपपुष्टेन दासेन–वामचरणेन द्यूतलेखक-मुद्घुष्योद्घुष्य त्वरितमापणाल्लोहदण्डं गृहीत्वाकारितः स दुष्टहस्ती ।

(१) ततस्ततः ।

(२) आहत्य सरोषं तं हस्तिनं विन्ध्यशैलशिखराभम् ।
मोचितो मया स दन्तान्तरसंस्थितः परिव्राजकः ॥

(३) सुष्ठु त्वया कृतम् । ततस्ततः ।

(४) तत आर्ये साधु रे कर्णपूरक साधु इत्येतावन्मात्रं भणन्ती विषम-भराक्रान्तेव नौरेकतः पर्यस्ता सकलोज्जयिन्यासीत् । तत आर्ये एकेन शून्यान्या-भरणस्थानानि परामृश्योर्ध्वं प्रेक्ष्य दीर्घं निःश्वस्यायं प्रावारको ममोपरि क्षिप्तः ।

(५) कर्णपूरक जानीहि तावत् किमेष जातीकुसुमवासितः प्रावारको न वेति ।

(६) आर्ये मदगन्धेन सुष्ठु तं गन्धं न जानामि ।

वसन्तसेना । *णामं पि दाव पेक्ख ।*

कर्णपूरकः । [1]इमं णामं । अजआ एव्व वाएदु । (इति प्रावारकमुपनयति ।)

वसन्तसेना । [2]अज्जचारुदत्तस्स । (इति वाचयित्वा सस्पृहं गृहीत्वा प्रावृणोति ।)

मदनिका । [3]कण्णऊरअ सोहइ अज्जआए पावारओ ।

कर्णपूरकः । [4]आं सोहइ अज्जआए पावारओ ।

वसन्तसेना । [5]कण्णऊरअ इदं दे पारितोसिअं । (इत्याभरणं प्रयच्छति ।)

कर्णपूरकः । (शिरसा गृहीत्वा प्रणम्य च) सैम्पदं सुट्ठु सोहइ अज्जआए पावारओ ।

वसन्तसेना । [6]कण्णऊरअ एदाए वेलाए कांह अज्जचारुदत्तो ।

कर्णपूरकः । [7]एदेण ज्जेव्व मग्गेण पवुत्तो गेहं ।

वसन्तसेना । [8]हंजे उवरिदणं अलिन्दअं आरुहिअ अज्जचारुदत्तं पेक्खेम्ह ।

(इति निष्क्रान्ताः सर्वे ।)

इति द्यूतकरसंवाहको नाम द्वितीयोऽङ्कः ।

(१) नामापि तावत् प्रेक्षस्व ।
(२) इदं नाम । आर्यैव वाचयतु । (३) आर्यचारुदत्तस्य ।
(४) कर्णपूरक शोभत आर्यायाः प्रावारकः ।
(५) आं शोभत आर्यायाः प्रावारकः ।
(६) कर्णपूरक इदं ते पारितोषिकम् ।
(७) सांप्रतं सुष्ठु शोभत आर्यायाः प्रावारकः ।
(८) कर्णपूरक एतस्यां वेलायां कुत्रार्यचारुदत्तः ।
(९) एतेनैव मार्गेण प्रवृत्तो गेहम् ।
(१०) हञ्जे उपरितनमलिन्दकमारुह्यार्यचारुदत्तं पश्यामः ।

तृतीयोऽङ्कः।

(प्रविश्य) वर्धमानकः।

सुअणे हु भिच्चाणुकम्पके सामिए णिद्धणके वि सोहदि।
पिसुणे उण दव्वगव्विदे दुक्कले क्खु पलिणामदारुणे ॥१
सुअणे हु कुभिच्चपालए धणहीणे अपहू वि सोहदि।
पिसुणे उण दव्वगव्विदे ण अ लच्छीविहवावलंविदे॥२

अवि अ। तिउसाह विण्टं तित्तउ तित्तउ बम्हणे णिलक्खले
अलसबहुआ वि तित्तिआ ण जणाह दलिद्द तित्तए ॥३

अवि अ। कुणाडअं ण रोएई पदुमकालअं असई।
सइत्तणे सा गव्वइ अञ्चलं लम्ब पदुम एच्छइ ॥४

अवि अ। शइशपलक्कबलद्दे ण शक्कि वालिदुं
अण्णकलत्तपशत्ते ण शक्कि वालिदुं।
जूदपशत्तमणुश्शे ण शक्कि वालिदुं
जे वि शहाविअदोशे ण शक्कि वालिदुं ॥५

---

(१) सुजनः खलु भृत्यानुकम्पकः स्वामी निर्धनकोऽपि शोभते।
पिशुनः पुनर्द्रव्यगर्वितो दुष्करः खलु परिणामदारुणः॥
सुजनः खलु कुभृत्यपालको धनहीनोऽप्रभुरपि शोभते।
पिशुनः पुनर्द्रव्यगर्वितो न च लक्ष्मीविभवावलम्बितः॥
अपि च। त्रिपुषाया वृत्तं तिक्तं तिक्तो ब्राह्मणो निरक्षरः।
अलसवधूस्तिक्तका न जनस्य दारिद्र्यं तिक्तम्॥
अपि च। कुनाटकं न रोचयते प्रथमकालमसती।
सतीत्वेन सा गर्वति अञ्चलं लम्बं प्रथममिच्छति॥
अपि च। सस्यलम्पटबलीवर्दो न शक्यो वारयितुं
अन्यकलत्रप्रसक्तो न शक्यो वारयितुम्।
द्यूतप्रसक्तमनुष्यो न शक्यो वारयितुं
योऽपि स्वाभाविकदोषो न शक्यो वारयितुम्॥

का वि वेला अज्जचारुदत्तस्स गन्धव्वं सुणिदुं गदस्स । अदिक्कमदि अद्धलअणी । अज्ज वि ण आअच्छदि । ता जाव बाहिलदुआलसालाए गदुअ सुविस्सं । (तथा करोति। ततः प्रविशति चारुदत्तो मैत्रेयश्च ।)

चारुदत्तः । अहो साधु भावरेभिलेन गीतम् । वीणा हि नाम असमुद्रोत्थितं रत्नम् । यतः

उत्कण्ठितस्य हृदयानुगुणा वयस्या संकेतके चिरयति प्रवरो विनोदः ।
संस्थापना प्रियतमा विरहातुराणां रक्तस्य रागपरिवृद्धिकरः प्रमोदः ६

मैत्रेयः । भो एहि गेहं गच्छेम्ह ।

चारुदत्तः । अहो सुष्ठु भावरेभिलेन गीतम् ।

मैत्रेयः । मम दाव दुवेहिं जेव्व हस्सं जाअदि । इत्थिआए सक्कदं पठन्तीए मणुस्सेण अ काअलीं गाअन्तेण । इत्थिआ दाव सक्कदं पठन्ती दिण्णणवणस्सा विअ गिट्ठी अधिअं सुसुआआदि । मणस्सोवि काअलीं गाअन्तो सुक्खसुमणोदामवेट्टिदो बुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि ।

चारुदत्तः । वयस्य सुष्ठु खल्वद्य गीतं भावरेभिलेन । न च भवान् परितुष्टः ।

रक्तं च नाम मधुरं च समं स्फुटं च भावान्वितं च ललितं च मनोहरं च ।
किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तैरन्तर्हितो यदि भवेद्वनितेति मन्ये ॥७

अपि च । तं तस्य स्वरसंक्रमं मृदुगिरः श्लिष्टं च तन्त्रीस्वनं
वर्णानामपि मूर्छनान्तरगतं तारं विरामे मृदुम् ।

कापि वेलार्यचारुदत्तस्य गान्धर्वं श्रोतुं गतस्य । अतिक्रामत्यधरजनी । अद्यापि नागच्छति । तद्यावद्बहिर्द्वारशालायां गत्वा स्वप्स्यामि ।

(१) भो एहि गेहं गच्छावः ।

(२) मम तावद् द्वाभ्यामेव हास्यं जायते । स्त्रिया संस्कृतं पठन्त्या मनुष्येण च काकलीं गायता । स्त्री तावत् संस्कृतं पठन्ती दत्तनवनस्या इव गृष्टिरधिकं सुसुशब्दं करोति । मनुष्योऽपि काकलीं गायन् शुष्कसुमनोदाम-वेष्टितो वृद्धपुरोहित इव मन्त्रं जपन् दृढं मे न रोचते ।

हेलासंयमितं पुनश्च ललितं रागद्विरुच्चारितं
यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव ॥८

मैत्रेयः। भो वअस्स आवणन्तरच्छाविहाएसु सुहं कुक्करा वि सुत्ता। ता गेहं गच्छेम्ह। (अग्रतोऽवलोक्य) वअस्स पेक्ख पेक्ख। एसो वि अन्धआरस्स विअ अवआसं देन्तो अन्तरिक्खपासादादो ओदरदि भअवं चन्दो।

चारुदत्तः। सम्यगाह भवान्।

असौ हि दत्त्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः।
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम् ॥९

मैत्रेयः। भो एदं अम्हाणं गेहं। वड्ढमाणआ वड्ढमाणआ उड्ढेहि दुआरअं।

वर्धमानकः। अज्ज मित्तेआह शलशञ्जोए शुणीअदि। आगदे अज्जचालुदत्ते। ता जाव दुआलअं शे देमि। (तथा कृत्वा) अज्ज वन्दामि। मित्तेअ तुमंपि वन्दामि। एत्थ वित्थिण्णे आशणे णिशीदन्तु अज्जा।

(उभौ नाट्येन प्रविश्योपविशतः।)

मैत्रेयः। वड्ढमाणआ रअणिअं सद्दावेहि पादाइं धोइदुं।

चारुदत्तः। (सानुकम्पम्) अलं सुप्तजनं प्रबोधयितुम्।

वर्धमानकः। अज्ज मित्तेअ अहं पाणिअं गेण्हे तुमं पादाइं धोवेहि।

---

(१) भो वयस्य आपणान्तरव्यावृतिभागेषु सुखं कुक्कुरा अपि सुप्ताः। तद् गेहं गच्छावः। (२) वयस्य पश्य पश्य। एषोऽप्यन्धकारस्येवावकाशं ददद्नन्तरीक्षप्रासादादवरति भगवांश्चन्द्रः।

(३) भो एतदस्माकं गेहम्। वर्धमानक वर्धमानक उद्घाटय द्वारम्।

(४) आर्यमैत्रेयस्य स्वरसंयोगः श्रूयते। आगत आर्यचारुदत्तः। तद् यावद् द्वारमस्य ददामि। (५) आर्य वन्दे। मैत्रेय त्वमपि वन्दे। अत्र विस्तीर्णे आसने निषीदतामार्यौ।

(६) वर्धमानक रदनिकामाकारय पादौ धावितुम्।

(७) आर्य मैत्रेय अहं पानीयं गृह्णामि। त्वं पादौ धाव।

मैत्रेयः। (सक्रोधम्) [1]भो वअस्स एसो दाणिं दासीए पुत्तो भाविअ पाणिअं गेण्हेदि। मं उण बम्हणं पादाहं सोच्चावेदि।

चारुदत्तः। वयस्य मैत्रेय त्वमुदकं गृहाण। वर्धमानकः पादौ प्रक्षालयतु।

वर्धमानकः। [2]अज्ज मित्तेअ देहि उदअं।

(मैत्रेयस्तथा करोति। वर्धमानकश्चारुदत्तस्य पादौ प्रक्षाल्यापसरति।)

चारुदत्तः। दीयतां ब्राह्मणस्य पादोदकम्।

मैत्रेयः। [3]किं मम पादोदएहिं। भूमीए जेव्व मए गद्दहेण विअ पुणो वि लोट्ठिदव्वं।

वर्धमानकः। [4]अज्ज मित्तेअ बह्मणे क्खु तुमं।

मैत्रेयः। [5]जेधा सव्वणागाणं मज्झे डुण्डुहो तधा सव्ववम्हणाणं मज्झे अहं बम्हणो।

वर्धमानकः। [6]अज्ज मित्तेअ तधा वि धोइस्सं। (तथा कृत्वा) [7]अज्ज मित्तेअ एदं तं सुवण्णभण्डअं मम दिवा तुह रत्तिं च। ता गेण्ह (इति दत्त्वा निष्क्रान्तः।)

मैत्रेयः। (गृहीत्वा) [8]अज्ज वि एदं चिट्ठदि। किं एत्थ उज्जइणीए चोरोवि णत्थि जो एदं दासीए पुत्तो णिद्दाचोरं ण अवहरदि। भो वअस्स अब्भन्तरचतुःसालअं पवेसआमि णं।

---

(१) भो वयस्य एष इदानीं दास्याः पुत्रो भूत्वा पानीयं गृह्णाति। मां पुनर्ब्राह्मणं पादौ शोचयति। (२) आर्य मैत्रेय देह्युदकम्।

(३) किं मम पादोदकैः। भूम्यामेव मया गर्दभेनेव पुनरपि लोठितव्यम्।

(४) आर्य मैत्रेय ब्राह्मणः खलु त्वम्।

(५) यथा सर्वनागानां मध्ये डुण्डुभस्तथा सर्वब्राह्मणानां मध्येऽहं ब्राह्मणः।

(६) आर्य मैत्रेय तथापि धाविष्यामि।

(७) आर्य मैत्रेय एतत्तत् सुवर्णभाण्डं मम दिवा तव रात्रौ च। तद्गृहाण।

(८) अद्याप्येतत् तिष्ठति। किमत्रोज्जयिन्यां चौरोऽपि नास्ति य एतं दास्याः पुत्रो निद्राचौरं नापहरति। भो वयस्य अभ्यन्तरचतुःशालकं प्रवेशयाम्येनम्।

चारुदत्तः ।

अलं चतुःशालमिमं प्रवेश्य प्रकाशनारीधृत एष यस्मात् ।
तस्मात् स्वयं धारय विप्र तावद्यावन्न तस्याः खलु भोः समर्प्यते ॥१०

(निद्रां नाट्यंस्तं तस्य स्वरसंक्रममिति पुनः पठति ।)

मैत्रेयः । अवि णिद्दाअदि भवं[1] ।

चारुदत्तः । अथ किम् ।

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।
अदृश्यरूपा चपला जरेव या मनुष्यसत्त्वं परिभूय वर्धते ॥११

मैत्रेयः । ता सुवेम्ह[2] । (नाट्येन स्वपितः । ततः प्रविशति शर्विलकः।)

शर्विलकः ।

कृत्वा शरीरपरिणाहसुखप्रवेशं शिक्षाबलेन च बलेन च कर्ममार्गम् ।
गच्छामि भूमिपरिसर्पणवृष्टपार्श्वो निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः

(नभोवलोक्य सहर्षम्) अये कथमस्तमुपगच्छति स भगवान् मृगाङ्कः । तथा हि

नृपतिपुरुषशङ्कितप्रचारं परगृहदूषणनिश्चितैकवीरम् ।
घनतिमिरनिरुद्धसर्वभावा रजनिरियं जननीव संवृणोति ॥१३

वृक्षवाटिकापरिसरे सन्धिं कृत्वा प्रविष्टोऽस्मि मध्यमकम् । तद्यावदिदानीं चतुःशालकमपि दूषयामि । भोः

कामं नीचामिदं वदन्ति पुरुषाः स्वप्ने च यद्वर्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत् ।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौष्णिकवधे पूर्वं कृतो द्रौणिना ॥१४

तत्कस्मिन्नुद्देशे सन्धिमुत्पादयामि ।

देशः को नु जलावसेकशिथिलो यस्मिन्न शब्दो भवे-
द्भित्तीनां च न दर्शनान्तरगतः सन्धिः करालो भवेत् ।

---

(१) अपि निद्राति भवान् । (२) तत् स्वपिवः ।

क्षारक्षीणतया च लोष्टककृशं जीर्णं क हर्म्यं भवेत्।
कस्मिन् स्त्रीजनदर्शनं च न भवेत्स्यादर्थसिद्धिश्च मे ॥१५

(भित्तिं परामृश्य) नित्यादित्यदर्शनोदकसेचनेन दूषितेयं भूमिः क्षार-क्षीणा। मूषिकोत्करश्चेह। हन्त सिद्धोऽयमर्थः। प्रथममेतत् स्कन्दपुत्राणां सिद्धिलक्षणम्। अत्र कर्मप्रारम्भे कीदृशमिदानीं सन्धिमुत्पादयामि। इह खलु भगवता कनकशक्तिना चतुर्विधः सन्ध्युपायो दर्शितः। तद्यथा। पक्वेष्टकानामाकर्षणमामेष्टकानां छेदनं पिण्डमयानां सेचनं काष्ठमयानां पाटनमिति। तदत्र पक्वेष्टके इष्टिकाकर्षणम्। तत्र

पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम्।
तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्रेयो यं यद्विस्मयं यान्ति पौराः ॥१६

तदत्र पक्वेष्टके पूर्णकुम्भ एव शोभते। तमुत्पादयामि।

अन्यासु भित्तिषु मया निशि पाटितासु
क्षारक्षतासु विषमासु च कल्पनासु।
दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्मणि कौशलं च ॥१७

नमो वरदाय कुमारकार्तिकेयाय। नमः कनकशक्तये ब्रह्मण्याय देवाय देवव्रताय। नमो भास्करनन्दिने। नमो योगाचार्याय यस्याहं प्रथमः शिष्यः। तेन च परितुष्टेन योगरोचना मे दत्ता।

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः।
शस्त्रं च पतितं गात्रे रुजं नोत्पादयिष्यति ॥१८

(तथा करोति) धिक्कष्टम्। प्रमाणसूत्रं मे विस्मृतम्। (विचिन्त्य) आं इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति। यज्ञोपवीतं हि नाम ब्राह्मणस्य महदुपकरणद्रव्यं विशेषतोऽस्मद्विधस्य। कुतः।

एतेन मापयति भित्तिषु कर्ममार्ग-
मेतेन मोचयति भूषणसंप्रयोगान्।

उद्घाटको भवति यन्त्रदृढे कपाटे
दष्टस्य कीटभुजगैः परिवेष्टनं च ॥१९

मापयित्वा कर्म समारभे । (तथा कृत्वावलोक्य च) एकलोष्टावशेषोऽयं सन्धिः । धिक्कष्टम् । अहिना दष्टोऽस्मि । (यज्ञोपवीतेनाङ्गुलीं बद्ध्वा विषवेगं नाटयति ।) चिकित्सां कृत्वा स्वस्थोऽस्मि । (पुनः कर्म कृत्वा दृष्ट्वा च) अये ज्वलति प्रदीपः । तथा हि

शिखा प्रदीपस्य सुवर्णपिञ्जरा महीतले सन्धिमुखेन निर्गता ।
विभाति पर्यन्ततमःसमावृता सुवर्णरेखेव कषे निवेशिता ॥२०

(पुनः कर्म कृत्वा) समाप्तोयं सन्धिः । भवतु प्रविशामि । अथवा न तावत्प्रविशामि । प्रतिपुरुषं प्रवेशयामि । (तथा कृत्वा) अये न कश्चित् । नमः कार्तिकेयाय । (इति प्रविश्य दृष्ट्वा च) अये पुरुषद्वयं सुप्तम् । भवतु । आत्मरक्षार्थं द्वारमुद्घाटयामि । कथं जीर्णत्वाद् गृहस्य विरौति कपाटः । तद्यावत्सलिलमन्वेषयामि । क्व नु खलु सलिलं भविष्यति । (इतस्ततो दृष्ट्वा सलिलं गृहीत्वा क्षिपन् सशङ्कम्) मा तावद् भूमौ पतच्छब्दमुत्पादयेत् । भवत्वेवं तावत् । (पृष्ठेन प्रतीक्ष्य कपाटमुद्घाट्य) भवत्वेवं तावत् । इदानीं परीक्षे किं लक्ष्यसुप्तमुत परमार्थसुप्तमिदं द्वयम् । (त्रासयित्वा परीक्ष्य च) अये परमार्थसुप्तेनानेन भवितव्यम् । तथा हि

निःश्वासोऽस्य न शङ्कितः सुविशदः स्वप्नान्तरं वर्तते
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरं चञ्चला ।
गात्रं स्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकं
दीपं चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि ॥२१

(समन्तादवलोक्य) अये कथं मृदङ्गः । अयं दर्दुरः । अयं पणवः । इयमपि वीणा । एते वंशाः । अमी पुस्तकाः । कथं नाट्याचार्यस्य गृहमिदम् । अथवा भवनप्रत्ययात्प्रविष्टोऽस्मि । तत्किं परमार्थदरिद्रोऽयमुत राजभयाच्चौरभयाद्वा भूमिष्ठं द्रव्यं धारयति । तन्ममापि नाम शर्विलकस्य भूमिष्ठं द्रव्यम् । भवतु । बीजं प्रक्षिपामि । (तथा कृत्वा) निक्षिप्तं बीजं न क्वचित् स्फारीभवति । अये परमार्थदरिद्रोऽयम् । भवतु । गच्छामि ।

मैत्रेयः । (उत्स्वप्नायते) भो वअस्स सन्धी विअ दिज्जदि । चोरं विअ पेक्खामि । ता गेण्हदु भवं एदं सुवण्णभण्डअं ।

शार्विलकः । किं नु खल्वयमिह मा प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीत्युपहसति। तत्किं व्यापादयामि । उत लघुत्वादुत्स्वप्नायते । (दृष्ट्वा) अये जर्जरस्खान-शाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलङ्करणभाण्डम् । भवतु गृह्णामि । अथवा न युक्तं तुल्यावस्थं कुलपुत्रजनं पीडयितुम् । तद्गच्छामि ।

मैत्रेयः । भो वअस्स साविदो सि गोवम्हणकामाए जइ एदं सुवण्ण-भण्डअं ण गेण्हसि ।

शार्विलकः । अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च । तद्गृह्णामि । अथवा ज्वलति प्रदीपः । अस्ति च मया प्रदीपनिर्वापणार्थमाग्नेयः कीटो धार्यते । तं तावत्प्रवेशयामि । तस्यायं देशकालः । एष मुक्तो मया कीटो यात्वैवास्य दीपस्योपरि मण्डलैर्विचित्रैर्विचरति । एष पक्षद्वयानिलेन निर्वापितो भद्रपीठेन । धिक्कृतमन्धकारम् । अथवा मयाप्यस्मद्ब्राह्मणकुले धिक्कृत-मन्धकारम् । अहं हि चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः शार्विलको नाम ब्राह्मणो गणिकामदनिकार्थमकार्यमनुतिष्ठामि । इदानीं करोमि ब्राह्मणस्य प्रणयम् । (इति जिघृक्षति ।)

मैत्रेयः । भो वअस्स सीदलो दे अग्गहत्थो ।

शार्विलकः । धिक् प्रमादः । सलिलसंपर्काच्छीतलो मेऽग्रहस्तः । भवतु कक्षयोर्हस्तं प्रक्षिपामि । (नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति ।)

मैत्रेयः । गहिदं ।

शार्विलकः । अनतिक्रमणीयोऽयं ब्राह्मणप्रणयः । तद् गृहीतम् ।

मैत्रेयः । दाणिं विक्किणिदपण्णो विअ वाणिओ अहं सुहं सुविस्सं ।

---

(१) भो वयस्य सन्धिरिव दीयते । चौरमिव पश्यामि । तद्गृह्यतु भवा-निदं सुवर्णभाण्डम् ।

(२) भो वयस्य शापितोऽसि गोब्राह्मणकाम्यया यद्येतत्सुवर्णभाण्डं न गृह्णासि ।

(३) भो वयस्य शीतलस्तेऽग्रहस्तः । (४) गृहीतम् ।

(५) इदानीं विक्रीतपण्य इव वणिगहं सुखं स्वप्स्यामि ।

शार्विलकः । महाब्राह्मण स्वपिहि वर्षशतम् । कष्टमेवं मदनिकागणिकार्थे ब्राह्मणकुलं तमसि पातितम् । अथवा । आत्मा पातितः ।

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषम् ।
यदेतद्गर्हितं कर्म निन्दामि च करोमि च ॥२२

तद्यावन्मदनिकाया निष्क्रयणार्थं वसन्तसेनागृहं गच्छामि । (परिक्रम्यावलोक्य च) अये पदशब्द इव । मा नाम रक्षिणः । भवतु । स्तम्भीभूत्वा तिष्ठामि । अथवा ममापि नाम शार्विलकस्य रक्षिणः । योहं

मार्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणे पन्नगः ।
माया रूपशरीरवेशरचने वाग् देशभाषान्तरे
दीपो रात्रिषु संकटेषु डुडुमो वाजी स्थले नौर्जले ॥२३

अपि च

भुजग इव गतौ गिरिः स्थिरत्वे पतगपतेः परिसर्पणे च तुल्यः ।
शश इव भुवनावलोकनेऽहं वृक इव च ग्रहणे बले च सिंहः ॥२४

(प्रविश्य) **रदनिका**। हद्धी हद्धी। बाहिरदुआरसालाए पसुत्तो वड्ढमाणओ। सोवि एत्थ ण दीसदि । भोदु। अज्जमित्तेअं सद्दावेमि । (इति परिक्रामति)

शार्विलकः । (रदनिकां हन्तुमिच्छति । निरूप्य) कथं स्त्री । भवतु गच्छामि । (इति निष्क्रान्तः)

रदनिका । (गत्वा सत्रासम्) हद्धि हद्धी अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कमति । भोदु । मित्तेअं गदुअ पबोधेमि (मैत्रेयमुपगम्य) अज्ज मित्तेअ उट्ठेहि उट्ठेहि । अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कन्तो ।

---

(१) हा धिक् हा धिक् । बहिर्द्वारशालायां प्रसुप्तो वर्धमानकः । सोऽप्यत्र न दृश्यते । भवतु । आर्यमैत्रेयमाह्वयामि ।

(२) हा धिक् हा धिक् । अस्माकं गृहे सन्धिं कृत्वा चौरो निष्क्रामति । भवतु । मैत्रेयं गत्वा प्रबोधयामि । (३) आर्य मैत्रेय उत्तिष्ठोत्तिष्ठ । अस्माकं गेहे सान्धिं कृत्वा चौरो निष्क्रान्तः ।

मैत्रेयः । (उत्थाय) आः दासीए धीए किं भणासि चोरं कप्पिअ सन्धी णिक्कन्तो ।

रदनिका । हैदास अलं परिहासेण । किं ण पेक्खसि एणं ।

मैत्रेयः । आः दासीए धीए किं भणासि । दुदिअं विअ दुआरअं उद्घाडिदं त्ति । भो वअस्स चारुदत्त उट्ठेहि उट्ठेहि । अम्हाणं गेहे सन्धिं दइअ चोरो णिक्कन्तो ।

चारुदत्तः । भवतु भोः । अलं परिहासेन ।

मैत्रेयः । भो ण परिहासो । पेक्खदु भवं ।

चारुदत्तः । कस्मिन्नुद्देशे ।

मैत्रेयः । भो एसो ।

चारुदत्तः । (विलोक्य) अहो दर्शनीयोऽयं सन्धिः ।

उपरितलनिपातितेष्टकोऽयं शिरसि तनुर्विपुलश्च मध्यदेशे ।
असदृशजनसंप्रयोगभीरोर्हृदयमिव स्फुटितं महागृहस्य ॥२५

कथमस्मिन्नपि कर्मणि कुशलता ।

मैत्रेयः । भो[६] वअस्स अअं सन्धी दुवेहिं जेव्व दिण्णो भवे । आदु आगन्तुएण सिक्खिदुकामेण वा । अण्णधा इध उज्जइणीए को अम्हाणं घरविहवं ण आणादि ।

चारुदत्तः । वैदेश्येन कृतो भवेन्मम गृहे व्यापारमभ्यस्यता
नासौ वेदितवान् धनैर्विरहितं विस्रब्धसुप्तं जनम् ।

(१) आः दास्याः पुत्रि किं भणसि । चौरं कृप्त्वा सन्धिर्निष्क्रान्तः ।

(२) हताश अलं परिहासेन । किं न प्रेक्षस एतत् ।

(३) आः दास्याः पुत्रि किं भणसि । द्वितीयमिव द्वारमुद्घाटितमिति । भो वयस्य चारुदत्त उत्तिष्ठोत्तिष्ठ । अस्माकं गेहे सन्धिं दत्त्वा चौरो निष्क्रान्तः ।

(४) भो न परिहासः । प्रेक्षतां भवान् । (५) भो एषः ।

(६) भो वयस्य अयं सन्धिर्द्वाभ्यामेव दत्तो भवेत् । अथवागन्तुकेन शिक्षितुकामेन वा । अन्यथेहोज्जयिन्यां कोऽस्माकं गृहविभवं न जानाति ।

दृष्ट्वा प्राज्यहृतीं निवासरचनामस्माकमाशान्वितः
सन्धिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः ॥२६

ततः सुहृद्भ्यः किमसौ कथयिष्यति तपस्वी सार्थवाहसुतस्य गृहं प्रविश्य न किंचिन्मया समासादितमिति ।

मैत्रेयः । भो कधं तं जेव्व चोरहदअं अणुसोचेसि । तेण चिन्तिदं महन्तं एदं गेहं । इदो रअणभण्डअं सुवण्णभण्डअं वा णिक्कामइस्सामि । (स्मृत्वा सविषादमात्मगतम्) कहिं तं सुवण्णभण्डअं । (पुनरनुस्मृत्य प्रकाशम्) भो वअस्स तुमं सव्वकालं भणासि मुक्खो मित्तेअओ अपण्डिदो मित्तेअओ त्ति । सुट्ठु मए कदं तं सुवण्णभण्डअं भवदो हत्थे समप्पअन्तेण । अण्णधा दासीए पुत्तेण अवहदं भवे ।

चारुदत्तः । अलं परिहासेन ।

मैत्रेयः । भो जह णाम अहं मुक्खो किं ता परिहासस्स वि देसआलं ण आणामि ।

चारुदत्तः । कस्यां वेलायाम् ।

मैत्रेयः । भो जदा तुमं मए भणिदोसि सीदलो दे अग्गहत्थो ।

चारुदत्तः । कदाचिदेवमपि स्यात् । (सर्वतो निरूप्य सहर्षम्) वयस्य दिष्ट्या ते प्रियं निवेदयामि ।

मैत्रेयः । किं ण अवहदं ।

चारुदत्तः । हृतम् ।

मैत्रेयः । तधा वि किं पिअं ।

(१) भोः कथं तमेव चौरहृतकमनुशोचसि । तेन चिन्तितं महदेतद्गेहम् । इतो रत्नभाण्डं सुवर्णभाण्ड वा निष्कामयिष्यामि । (२) कुत्र तत् सुवर्णभाण्डकम् । (३) भो वयस्य त्वं सर्वकालं भणसि मूर्खो मैत्रेयोऽपण्डितो मैत्रेय इति । सुष्ठु मया कृतं तत्सुवर्णभाण्डं भवतो हस्ते समर्पयता । अन्यथा दास्याः पुत्रेणापहृतं भवेत् ।

(४) भो यथा नामाहं मूर्खस्तत्किं परिहासस्यापि देशकालं न जानामि ।

(५) भो यदा त्वं मया भणितोऽसि शीतलस्तेऽग्रहस्तः ।

(६) किं नापहृतम् । (७) तथापि किं प्रियम् ।

चारुदत्तः । यदसौ कृतार्थो गतः ।

मैत्रेयः । णासो क्खु सो[1] ।

चारुदत्तः । कथं न्यासः । (मोहमुपगतः)

मैत्रेयः । सैमस्ससदु भवं[2] । जइ णासो चोरेण अवहदो तुमं किं मोहं उवगदो ।

चारुदत्तः । (समाश्वस्य) वयस्य

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥२७

मोः कष्टम् । यदि तावत्कृतान्तेन प्रणयोऽर्थेषु मे कृतः ।

किमिदानीं नृशंसेन चारित्रमपि दूषितम् ॥२८

मैत्रेयः । अहं[3] क्खु अवलविस्सं । केण दिण्णं । केण गहिदं । को वा सक्खि त्ति ।

चारुदत्तः । अहमिदानीमनृतमभिधास्ये ।

भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम् ।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम् ॥२९

रदनिका । ता[4] जाव अज्जाधूदाए गदुअ णिवेदेमि । (इति निष्क्रान्ता)

(प्रविश्य रदनिकया सह चारुदत्तवधूः)

वधूः । (ससंभ्रमम्) । अहं[5] सच्चं अवक्खिदसरीरो अज्जउत्तो अज्जमित्तेएण सह ॥

रदनिका । भट्टिणि सच्चं[6] । किंतु जो सो वेस्साजणकेरको अलंकारओ सो अवहदो । (वधूर्मोहं नाटयति ।)

---

(१) न्यासः खलु सः ।

(२) समाश्वसितु भवान् । यदि न्यासश्चौरेणापहृतस्त्वं किं मोहमुपगतः ।

(३) अहं खल्वपलपिष्यामि । केन दत्तं । केन गृहीतम् । को वा साक्षीति ।

(४) तद्यावदार्याधूतायै गत्वा निवेदयामि ।

(५) अयि सत्यमपरिक्षतशरीर आर्यपुत्रो मैत्रेयेण सह ।

(६) भट्टिनि सत्यम् । किन्तु यः स वेश्याजनस्यालंकारः सोऽपहृतः ।

रदनिका । समस्ससदु अज्जा धूदा ।

वधूः । (समाश्वस्य) हैं[1] हञ्जे किं भणासि अवरिक्खदसरीरो अज्जउत्तो त्ति । वरं दाणिं सो सरीरेण परिक्खदो ण उण चारित्तेण । संपदं उज्जइणीए जणो एव्वं मन्तइस्सदि दलिद्दाए अज्जउत्तेण ज्जेव्व ईदिसं अकज्जं अणुचिट्ठिदं त्ति । (ऊर्ध्वमवलोक्य निःश्वस्य च) । मैं[2]अवं कअन्त पोक्खरवत्तपडिदजलबिन्दुचञ्चलेहिं कीलसि दलिद्दपुरिसभाअधेएहिं । इअं च मे एक्का मादुवरलद्धा रअणावली चिट्ठदि । एदं पि अदिसोण्डीरदाए अज्जउत्तो ण गेण्हिस्सदि । हञ्जे अज्जामित्तेअं दाव सद्दावेहि ।

रदनिका । [3]जं अज्जा धूदा आणवेदि (विदूषकमुपगम्य) । [4]अज्ज मित्तेअ धूदा दे सद्दावेदि ।

मैत्रेयः । [5]कहिं सा ।

रदनिका । [6]एसा चिट्ठदि । उवसप्प ।

मैत्रेयः । (उपसृत्य) [7]सोत्थि भोदीए ।

वधूः । [8]अज्ज वन्दामिं । अज्ज पुरत्थिआमुहो होहि ।

मैत्रेयः । [9]एसो भोदि पुरत्थिआमुहो संवुत्तोम्हि ।

वधूः । [10]अज्ज पडिच्छ इमं ।

---

(१) समाश्वसित्वार्या धूता ।

(२) हञ्जे किं भणस्यपरिक्षितशरीर आर्यपुत्र इति । वरमिदानीं स शरीरेण परिक्षितो न पुनश्चारित्र्येण । सांप्रतमुज्जयिन्यां जन एवं मन्त्रयिष्यते दरिद्रतयार्यचेटेनैवंदशमकार्यमनुष्ठितमिति ।

(३) भगवान् कृतान्त पुष्करपत्रपतितजलबिन्दुचञ्चलैः क्रीडसि दरिद्रपुरुषभागधेयैः । इयं च म एका मातृगृहलब्धा रत्नावली तिष्ठति । एतामप्यतिशौण्डीरतयार्यपुत्रो न ग्रहीष्यति । हञ्जे आर्यमैत्रेयं तावदाकारय ।

(४) यदार्या धूताज्ञापयति । (५) आर्य मैत्रेय धूता त्वामाकारयति ।

(६) कुत्र सा । (७) एषा तिष्ठति । उपसर्प । (८) स्वस्ति भवत्यै ।

(९) आर्य वन्दे । आर्य पुरस्तान्मुखो भव ।

(१०) एष भवति पुरस्तान्मुखः संवृत्तोऽस्मि । (११) आर्य प्रतीच्छेमाम् ।

मैत्रेयः। [1]किं ण्णेदं।

वधूः। [2]अहं क्खु रअणसट्ठिं उववसिदा आसि। तहिं जधाविहवाणुसारेण बम्हणो पडिग्गाहिदव्वो। सो अण्णपडिग्गाहिदो। ता तस्स कदे पडिच्छ इमं रअणमालिअं।

मैत्रेयः। (गृहीत्वा) [3]सोत्थि। गमिस्सं। पिअवअस्सस्स णिवेदेमि।

वधूः। [4]अज्ज मित्तेअ मा क्खु मं लज्जावेहि। (इति निष्क्रान्ता।)

मैत्रेयः। (सविस्मयम्) [5]अहो से महाणुभावदा।

चारुदत्तः। अये चिरयति मैत्रेयः। मा नाम वैक्लव्यादकार्यं कुर्यात्। मैत्रेय मैत्रेय।

मैत्रेयः। (उपसृत्य) [6]एसोम्हि। गेण्ह एदं। (रत्नावलीं दर्शयति।)

चारुदत्तः। किमेतत्।

मैत्रेयः। [7]भो जं दे सरिसदारसंगहस्स फलं।

चारुदत्तः। कथं ब्राह्मणी माममुकम्पते। कष्टमिदानीमास्मि दरिद्रः।

आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः।
अर्थतः पुरुषो नारी या नारी सार्थतः पुमान्॥३०

अथवा नाहं दरिद्रः। यस्य मम

विभवानुगता भार्या सुखदुःखसुहृद्धवान्।
सत्यं च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम्॥३१

मैत्रेय गच्छ रत्नावलीमादाय वसन्तसेनायाः सकाशम्। वक्तव्या च सा मद्वचनाद् यत् खल्वस्माभिः सुवर्णभाण्डमात्मीयमिति कृत्वा विश्रम्भाद्

(१) किं न्विदम्।

(२) अहं खलु रत्नपट्टीमुपोषितासम्। तत्र यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहितव्यः। सोऽन्यप्रतिग्राहितः। तत् तस्य कृते प्रतीच्छेमां रत्नमालिकाम्। (३) स्वस्ति। गमिष्यामि प्रियवयस्यस्य निवेदयामि।

(४) आर्य मैत्रेय मा खलु मां लज्जितां कुरु।

(५) अहो अस्या महानुभावता। (६) एषोऽस्मि। गृह्यतामेतत्।

(७) भो यत्ते सदृशदारसंग्रहस्य फलम्।

द्यूते हारितम्। तस्य कृते गृह्यतामियं रत्नावलीति।

मैत्रेयः। मा दाव अक्खाइदस्स अभुत्तस्स अप्पमुल्लस्स चोरेहिं अवहदस्स कारणादो चदुस्समुद्दसारभूदा रअणावली दीअदि।

चारुदत्तः। वयस्य मा मैवम्।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥३२

तद्वयस्य अस्मच्छरीरसृष्टिकया शापितोऽसि। नैनामग्राह्यित्वात्रागन्तव्यम्। **वर्धमानक**

एताभिरिष्टिकाभिः सन्धिः क्रियतां सुसंहृतः शीघ्रम्।
परिवादबहलदोषान्न यस्य रक्षां परिहरामि ॥३३

वयस्य मैत्रेय भवताप्यकृपणशौण्डीर्यमभिधातव्यम्।

मैत्रेयः। भो दलिद्दो किं अकिविणं मन्तेदि।

चारुदत्तः। अदरिद्रोऽस्मि सखे। यस्य मम–। ('विभवानुगता भार्या' इत्यादि पुनः पठति) तद्गच्छतु भवान्। अहमपि कृतशौचः संध्यामुपासे। (इति निष्क्रान्ताः सर्वे।)

सन्धिच्छेदो नाम तृतीयोऽङ्कः समाप्तः।

---

(१) मा तावदखादितस्याभुक्तस्याल्पमूल्यस्य चौरैरपहृतस्य कारणाच्चतुःसमुद्रसारभूता रत्नावली दीयते। (२) भो दरिद्रः किमकृपणं मन्त्रयते।

चतुर्थोऽङ्कः ।

(ततः प्रविशति चेटी)

चेटी । आणत्तम्हि अत्ताए अज्जआसआसं गन्तुं । एसा अज्जआ चित्तफलअणिसण्णदिट्ठी मदणिआए सह किंपि मन्तअन्ती चिट्ठदि । ता जाव उवसप्पामि । (इति परिक्रामिति)

(ततः प्रविशति यथानिर्दिष्टा वसन्तसेना मदनिका च)

वसन्तसेना । हञ्जे मदणिए अवि सुसदिसी इअं चित्ताकिदी अज्जचारुदत्तस्स ।

मदनिका । सुसदिसी ।

वसन्तसेना । कधं तुमं जाणासि ।

मदनिका । जेण अज्जआए सुसिणिद्धा दिट्ठी अणुलग्गा ।

वसन्तसेना । हञ्जे किं वेसवासदक्खिण्णेण मदणिए एव्वं भणासि ।

मदनिका । अज्जए किं जो जेव्व जणो वेसे पडिवसदि सो जेव्व अलीअदक्खिण्णो भोदि ।

वसन्तसेना । हञ्जे णाणापुरिससङ्गेण वेसाजणो अलीअदक्खिण्णो भोदि ।

मदनिका । जेदो दाव अज्जआए दिट्ठी इध अभिरमदि हिअअं च

(१) आज्ञप्तास्मि मात्रार्यासकाशं गन्तुम् । एषार्या चित्रफलकनिषण्णदृष्टिर्मदनिकया सह किमपि मन्त्रयमाणा तिष्ठति । तद्यावदुपसर्पामि ।

(२) हञ्जे मदनिके अपि सुसदृशीयं चित्राकृतिरार्यचारुदत्तस्य ।

(३) सुसदृशी । (४) कथं त्वं जानासि ।

(५) येनार्यायाः सुस्निग्धा दृष्टिरनुलग्ना ।

(६) हञ्जे किं वेशवासदाक्षिण्येन मदनिके एवं भणसि ।

(७) आर्ये किं य एव जनो वेशे प्रतिवसति स एवालीकदाक्षिण्यो भवति ।

(८) हञ्जे नानापुरुषसङ्गेन वेश्याजनोऽलीकदाक्षिण्यो भवति ।

(९) यतस्तावदार्यायाः दृष्टिरिहाभिरमते हृदयं च तस्य कारणं किं इच्छयते ।

तस्स कारणं किं पुच्छीअदि ।

वसन्तसेना । हंजे सहीअणादो उवहसणीअदं रक्खामि ।

मदनिका । अज्जए एव्वं णेदं । सहीअणचित्ताणुवत्ती अबलाअणो मोदि ।

प्रथमा चेटी । (उपसृत्य) अज्जए अत्ता आणवेदि गहिदावगुण्ठणं पक्खदुआरए सज्जं पवहणं ता गच्चेत्ति ।

वसन्तसेना । हंजे किं अज्जचारुदत्तो मं णइस्सदि ।

चेटी । अज्जए जेण पवहणेण सह सुवण्णदसहस्सिओ अलंकारओ अणुप्पेसिदो ।

वसन्तसेना । कीदो उण सो ।

चेटी । एसो जेव्व राअसालो संठाणओ ।

वसन्तसेना । (सक्रोधम्) अवेहि मा पुणो एव्वं भणिस्ससि ।

चेटी । पसीददु पसीददु अज्जआ । सन्देसेण म्हि पेसिदा ।

वसन्तसेना । अहं संदेसस्स ज्जेव्व कुप्पामि ।

चेटी । तो किंति अत्तं विण्णाविस्सं ।

वसन्तसेना । एवं विण्णाविदव्वा जइ मं जीअन्तीं इच्छसि ता एव्वं ण पुणो अहं अत्ताए आणविदव्वा ।

---

(१) हञ्जे सखीजनादुपहसनीयतां रक्षामि ।

(२) आर्ये एवं न्विदम् । सखीजनचित्तानुवर्त्यबलाजनो भवति ।

(३) आर्ये माताज्ञापयति गृहीतावगुण्ठनं पक्षद्वारे सज्जं प्रवहणं तद् गच्छेति । (४) हञ्जे किमार्यचारुदत्तो मां नेष्यति ।

(५) आर्ये येन प्रवहणेन सह सुवर्णदशसाहस्रिकोऽलंकारोऽनुप्रेषितः ।

(६) कः पुनः सः । (७) एष एव राजश्यालः संस्थानकः ।

(८) अपेहि । मा पुनरेवं भणिष्यसि ।

(९) प्रसीदतु प्रसीदत्वार्या । संदेशेनास्मि प्रेषिता ।

(१०) अहं संदेशस्यैव कुप्यामि ।

(११) तत्किमिति मातरं विज्ञापयिष्यामि ।

(१२) एवं विज्ञापयितव्या । यदि मां जीवन्तीमिच्छसि तदैवं न पुनरहं माताज्ञापयितव्या ।

चेटी । जेधा दे रोअदि । (इति निष्क्रान्ता ।)

(प्रविश्य) शर्विलकः ।

दत्त्वा निशाया वचनीयदोषं निद्रां च जित्वा नृपतेश्च रक्षान् ।
स एष सूर्योदयमन्दरश्मिः क्षपाक्षयाच्चन्द्र इवाभिजातः ॥१

अपि च ।

यः कश्चित्त्वरितगतिं निरीक्षते मां संभ्रान्तं द्रुतमुपसर्पति स्थितं वा ।
तं सर्वं तुलयति दूषितोन्तरात्मा स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥२

मया खलु मदनिकायाः कृते साहसमनुष्ठितम् ।

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः
क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्जितम् ।
नरपतिबले पार्श्वायाते स्थितं गृहदारुवद्
व्यवसितशतैरेवंप्रायैर्निशा दिवसीकृता ॥३ (इति परिक्रामति)

वसन्तसेना । हञ्जे इमं दाव चित्तफलअं मम सअणीए ठाविअ तालवेण्टअं गेण्हिअ लहुं आअच्छ ।

मदनिका । जं अज्जआ आणवेदि । (इति फलकं गृहीत्वा निष्क्रान्ता ।)

शर्विलकः । इदं वसन्तसेनाया गृहम् । तद्यावत्प्रविशामि । (प्रविश्य) क्व मदनिका द्रष्टव्या ।

(ततः प्रविशति तालवृन्तहस्ता मदनिका ।)

शर्विलकः । (दृष्ट्वा) अये इयं मदनिका ।

मदनपि गुणैर्विशेषयन्ती रतिरिव मूर्त्तिमती विभाति येयम् ।
मम हृदयमनङ्गवह्नितप्तं भृशमिव चन्दनशीतलं करोति ॥४

मदनिके ।

मदनिका । (दृष्ट्वा) अम्मो कधं सव्विलओ । सव्विलअ साअदं दे । कहिं

---

(१) यथा ते रोचते ।

(२) हञ्जे इमं तावच्चित्रफलकं मम शयनीये स्थापयित्वा तालवृन्तं गृहीत्वा लघ्वागच्छ । (३) यदार्याज्ञापयति ।

(४) अहो कथं शर्विलकः । शर्विलक स्वागतं ते । कुत्र त्वम् ।

तुमं।

शर्विलकः। कथयिष्यामि। (इति सानुरागमन्योन्यं पश्यतः।)

वसन्तसेना। [1]चिरअदि मदणिआ। ता कहिं णु हु सा। (गवाक्षकेण दृष्ट्वा) [2]कधं एसा केनावि पुरिसकेण सह मन्तअन्ती चिट्ठदि। जधा अदिसिणिद्धाए णिच्चलदिट्ठीए आपिबन्ती विअ एदं णिज्झाअदि तधा तक्केमि एसो सो जणो एदं इच्छदि अभुजिस्सं कादुं। ता रमदु रमदु। मा कस्साबि पीदिच्छेदो भोदु। ण हु सद्दाविस्सं।

मदनिका। [3]सव्विलअ कधेहि।

(शर्विलकः साशङ्कं दिशोऽवलोकयति।)

मदनिका। [4]सव्विलअ किं णोदं। ससंको विअ लक्खीअसि।

शर्विलकः। वक्ष्ये त्वां किंचिद्रहस्यम्। तद्विविक्तमिदम्।

मदनिका। [5]अध इं।

वसन्तसेना। [6]कधं पर(म)रहस्सं। ता ण सुणिस्सं।

शर्विलकः। मदनिके किं वसन्तसेना मोक्ष्यति त्वां निष्कयेण।

वसन्तसेना। [7]कधं मम सम्बन्धिणी कधा। ता सुणिस्सं इमिणा गवक्खेण ओवारिदसरीरा।

मदनिका। [8]सव्विलअ भणिदा मए अज्जआ। तदो भणादि जइ मम छन्दो तदा विणा अत्थं सव्वं परिअणं अभुजिस्सं करइस्सं। अध सव्विलअ

(१) चिरयति मदनिका। तत्कुत्र नु खलु सा। (२) कथमेषा केनापि पुरुषकेण सह मन्त्रयमाणा तिष्ठति। यथातिस्निग्धया निश्चलदृष्ट्या आपिबन्तीवैतं निर्ध्यायति तथा तर्कयाम्येष स जन एनमिच्छत्यभुजिष्यां कर्तुम्। तद् रमतां रमताम्। मा कस्यापि प्रीतिच्छेदो भवतु। न खल्वाकारयिष्यामि।

(३) शर्विलक कथय।

(४) शर्विलक किं त्विदम्। सशङ्क इव लक्ष्यसे। (५) अथ किम्।

(६) कथं पर(म)रहस्यम्। तन्न श्रोष्यामि।

(७) कथं मम सम्बन्धिनी कथा। तच्छ्रोष्याम्यनेन गवाक्षेणापवारितशरीरा।

(८) शर्विलक भणिता मयार्या। ततो भणति यदि मम च्छन्दस्तदा

कुदो दे एत्तिओ विहवो जेण मं अज्जआसआसादो मोआहस्सदि ।

शर्विलकः । दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च ।
अथ रात्रौ मया भीरु त्वदर्थं साहसं कृतम् ॥५

वसन्तसेना । पैसण्णा से आकिदी । साहसकम्मदाए उण उव्वेअणीआ ।

मदनिका । सैव्विलअ इत्थीकलवत्तस्स कारणेण उहअं पि संसए विणिक्खित्तं ।

शर्विलकः । किं किम् ।

मदनिका । सैरीरं चारित्तं च ।

शर्विलकः । अपण्डिते साहसे श्रीः प्रतिवसति ।

मदनिका । सैव्विलअ अखण्डिदचारित्तो सि । ता ण हु दे मम कारणादो साहसं करन्तेण अचन्तविरुद्धं आचरिदं ।

शर्विलकः । नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां
विप्रस्वं न हरामि कञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धान्यत्सङ्गतं हरामि न तथा बालं धनार्थी क्वचित्
कार्याकार्यविचारिणी मम मतिश्चौर्येऽपि नित्यं स्थिता ॥६

तद्दिशाप्यतां वसन्तसेना

अयं तव शरीरस्य प्रभाणादिव निर्मितः
अप्रकाशो ह्यलंकारो मत्स्नेहाद्धार्यतामिति ॥७

मदनिका । सैव्विलअ अप्पकासो अलंकारो अअं च जनो त्ति दुवेवि

विनार्थं सर्वं परिजनममुजिष्यं करिष्यामि । अथ शर्विलक कुतस्त एतावान् विभवो येन मामार्यासकाशान्मोचयिष्यसि ।

(१) प्रसन्नास्याकृतिः । साहसकर्मतया पुनरुद्वेजनीया ।

(२) शर्विलक स्त्रीकल्यवर्तस्य कारणेनोभयमपि संशये विनिक्षिप्तम् ।

(३) शरीरं चारित्र्यं च ।

(४) शर्विलक अखण्डितचारित्र्योऽसि । तन्न खलु त्वया मम कारणात् साहसं कुर्वतात्यन्तविरुद्धमाचरितम् ।

(५) शर्विलक अप्रकाशोऽलंकारोऽयं च जन इति द्वयमपि न युज्यते ।

ण जुज्जदि । ता उत्तरेहि दाव । पेक्खामि दाव एदं अलंकारअं ।

शार्विलकः । इदमलंकरणम् । (इति साशङ्कं समर्पयति ।)

मदनिका । (निरूप्य) सव्विलअ दिट्ठपुरुव्वो विअ अअं अलंकारओ । ता भणेहि कुदो दे एसो ।

शार्विलकः । मदनिके किं तवानेन । गृह्यताम् ।

मदनिका । (सरोषम्) जइ मे पच्चअं ण गच्छसि ता किंणिमित्तं मं णिक्किणसि ।

शार्विलकः । अयि प्रभाते मया श्रुतं श्रेष्ठिचत्वरे यथा सार्थवाहस्य चारुदत्तस्येति । (वसन्तसेना मदनिका च मूर्च्छां नाटयतः ।)

शार्विलकः । मदनिके समाश्वसिहि । किमिदानीं त्वम्

विपादस्रस्तसर्वाङ्गी संभ्रमभ्रान्तलोचना ।
नीयमानाभुजिष्यात्वं कम्पसे नानुकम्पसे ॥८

मदनिका । (समाश्वस्य) साहसिअ ण हु तुए मम कारणादो इमं अकज्जं करन्तेण तस्सिं गेहे कोवि वावादिदो परिक्खदो वा ।

शार्विलकः । मदनिके भीते सुते न शार्विलकः प्रहरति । तन्मया न कश्चिद्व्यापादितो नापि परिक्षतः ।

मदनिका । सच्चं सच्चं ।

शार्विलकः । सत्यं सत्यम् ।

वसन्तसेना । (संज्ञां लब्ध्वा) अम्महे पच्चुवजीविदम्हि ।

मदनिका । पिअं पिअं ।

शार्विलकः । (सेर्ष्यम्) मदनिके किं नाम प्रियमिति ।

तदुपनय तावत् । प्रेक्षे तावदेतमलंकारम् ।

(१) दृष्टपूर्व इवायमलंकारः । तद्भण कुतस्त एषः ।

(२) यदि मे प्रत्ययं न गच्छसि तत् किंनिमित्तं मां निष्क्रीणासि ।

(३) साहसिक न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन् गेहे कोऽपि व्यापादितः परिक्षतो वा ।

(४) सत्यं सत्यम् । (५) अहो । प्रत्युपजीवितास्मि । (६) प्रियं प्रियम् ।

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्यं
सद्वृत्तपूर्वपुरुषेऽपि कुले प्रसूतः ।
रक्षामि मन्मथविपन्नगुणोऽपि मानं
मित्रं च मां व्यपदिशस्यपरं च यासि ॥९

(साकूतम्) इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥१०
अयं च सुरतज्वालः कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥११

वसन्तसेना । (सस्मितम्) अहो से अत्थाणे आवेओ ।

शर्विलकः । सर्वथा

अपण्डितास्ते पुरुषा मता मे ये स्त्रीषु च श्रीषु च विश्वसन्ति ।
स्त्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि ॥१२
स्त्रीषु न रागः कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥१३

सुट्ठु खल्विदमुच्यते । एता हसन्ति च रुदन्ति च वित्तहेतो-
र्विश्वासयन्ति पुरुषं न तु विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानसुमना इव वर्जनीयाः ॥१४

अपि च ।

समुद्रवीचीव चलस्वभावाः सन्ध्याभ्रलेखेव मुहूर्तरागाः ।
स्त्रियो हृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति ॥१५

स्त्रियो हि नाम चपलाः

अन्यं मनुष्यं हृदयेन कृत्वा अन्यं ततो दृष्टिभिराहृयन्ति ।
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते ॥१६

---

(१) अहो अस्यास्थाने आवेगः ।

सूक्तं खलु कस्यापि ।
न पर्वताग्रे नलिनी प्ररोहति न गर्दभा वाजिधुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो न वेशजाताः शुचयस्तथाङ्गनाः॥१७

आः दुरात्मन् चारुदत्तहतक अयं न भवसि । (इति कतिचित्पदानि गच्छति ।)

मदनिका । (अञ्चले गृहीत्वा) [1]अह असंबद्धभासअ असंभावणीए कुप्पसि ।

शार्विलकः । कथमसंभावनीयं नाम ।

मदनिका । [2]ऐसो क्खु अलंकारओ अज्जआकेरओ ।

शार्विलकः । ततः किम् ।

मदनिका । [3]स च तस्स अज्जस्स हत्थे विणिक्खित्तो ।

शार्विलकः । किमर्थम् ।

मदनिका । (कर्णे ।) [4]एव्वं विअ ।

शार्विलकः । (सवैलक्ष्यम्) भोः कष्टम् ।

छायार्थी ग्रीष्मसंतप्तो यामेवाहं समाश्रितः ।
अजानता मया सैव पत्रैः शाखा वियोजिता ॥१८

वसन्तसेना । [5]कधं एसोवि संतप्पदि जेव्व । ता अआणन्तेण एदिणा एव्वं अणुचिट्ठिदं ।

शार्विलकः । मदनिके किमिदानीं युक्तम् ।

मदनिका । [6]एत्थ तुमं जेव्व पण्डिओ ।

शार्विलकः । नैवम् । पश्य ।

स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते ॥१९

---

(१) अयि असंबद्धभाषक असंभावनीये कुप्यसि ।
(२) एष खल्वलंकार आर्यायाः ।
(३) स च तस्यार्यस्य हस्ते विनिक्षिप्तः । (४) एवमिव ।
(५) कथमेषोऽपि संतप्यत एव । तदजानतैतेनैवमनुष्ठितम् ।
(६) अत्र त्वमेव पण्डितः ।

मदनिका। सेव्विलअ जइ मम वअणं सुणीअदि ता तस्स ज्जेव्व महाणुभावस्स पडिणिज्जादेहि ।

शर्विलकः। मदनिके यद्यसौ राजकुले मां कथयति ।

मदनिका। णं चन्दादो आदवो होदि ।

वसन्तसेना। सोहु मदणिए साहु ।

शर्विलकः। मदनिके

न खलु मम विषादः साहसेऽस्मिन् भयं वा
कथयसि हि किमर्थं तस्य साधोर्गुणांस्त्वम् ।
जनयति मम वेदं कुत्सितं कर्म लज्जां
नृपतिरिह शठानां मादृशां किं नु कुर्यात् ॥२०

तथापि नीतिविरुद्धमेतत् । अन्य उपायश्चिन्त्यताम् ।

मदनिका। सो अअं अवरो उवाओ ।

वसन्तसेना। कीं क्खु अवरो उवाओ हुविस्सदि ।

मदनिका। तस्स ज्जेव्व अज्जस्स केरओ भविअ एदं अलंकारअं अज्ज-आए उवणेहि ।

शर्विलकः। एवं कृते किं भवति ।

मदनिका। तुमं दाव अचोरो । सो वि अज्जो अरिणो । अज्जआए सकं अलंकारअं उवगदं भोदि ।

शर्विलकः। नन्वतिसाहसमेतत् ।

मदनिका। अइ उवणेहि । अण्णधा अदिसाहसं ।

वसन्तसेना। सोहु मदणिए साहु । अभुजिस्साए विअ मन्तिदं ।

---

(१) शर्विलक यदि मम वचनं श्रूयते तदा तस्यैव महानुभावस्य प्रतिनिर्यातय । (२) न चन्द्रादातपो भवति । (३) साधु मदनिके साधु ।

(४) सोऽयमपर उपायः । (५) कः खल्वपर उपायो भविष्यति ।

(६) तस्यैवार्यस्य संबन्धी भूत्वैतमलंकारकमार्यायां उपनय ।

(७) त्वं तावदचौरः । सोऽप्यार्योऽनृणः । आर्यया स्वकोऽलंकार उपगतो भवति । (८) अयि उपनय । अन्यथातिसाहसम् ।

(९) साधु मदनिके साधु । अभुजिष्ययेव मन्त्रितम् ।

शर्विलकः । मयात्ता महती बुद्धिर्भवतीमनुगच्छता ।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः ॥२१

मदनिका । [1]तेण हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ जाव **अज्ज** आए तुह आगमणं णिवेदेमि ।

शर्विलकः । एवं भवतु ।

मदनिका । (उपसृत्य) [2]अज्जए एसो क्खु चारुदत्तस्स **सआसादो** बम्हणो आअदो ।

वसन्तसेना । [3]हञ्जे तस्स केरओ त्ति कथं तुमं जाणासि ।

मदनिका । [4]अज्जए अत्तकेरअं पि ण जाणामि ।

वसन्तसेना । (स्वगतं सशिरःकम्पं विहस्य) [5]जुज्जदि जुज्जदि । **(प्रकाशम्)** [6]पविसदु ।

मदनिका । जं [7]अज्जआ आणवेदि । (उपगम्य) **पविसदु सव्विलओ** ।

शर्विलकः । (उपसृत्य) स्वस्ति भवत्यै ।

वसन्तसेना । [8]अज्ज वन्दामि । समाविसदु अज्जो ।

शर्विलकः । सार्थवाहस्त्वां विज्ञापयति जर्जरत्वाद् गृहस्य **दूरक्ष्यमिदं** भाण्डम् । तद्गृह्यताम् । (इति मदनिकायाः समर्प्य प्रस्थितः ।)

वसन्तसेना । [9]अज्ज ममावि दाव पडिसंदेसं तहिं अज्जो णेदु ।

शर्विलकः (स्वगतम्) कस्तत्र यास्यति । (प्रकाशम्) **कः प्रतिसंदेशः** ।

वसन्तसेना । [10]पडिच्छदु अज्जो मदणिअं ।

शर्विलकः । भवति न खल्ववगच्छामि ।

---

(१) तेन हि त्वमस्मिन् कामदेवगेहे मुहूर्त्तकं तिष्ठ **यावदार्यायै** सत्रागमनं निवेदयामि ।

(२) आर्ये एष खलु चारुदत्तस्य सकाशाद् ब्राह्मण आगतः ।

(३) हञ्जे तस्य सम्बन्धीति कथं त्वं जानासि ।

(४) आर्ये आत्मसम्बन्धिनमपि न जानामि । (५) युज्यते **युज्यते** ।

(६) प्रविशतु । (७) यदार्याज्ञापयति । **प्रविशतु शर्विलकः** ।

(८) आर्य वन्दे । समाविशत्वार्यः । (९) **आर्य ममापि तावत् प्रतिसन्देशं** तत्रार्यो नयतु । **(१०)** प्रतीच्छत्वार्यो **मदनिकाम्** ।

वसन्तसेना । अहं अवगच्छामि ।

शार्विलकः । कथमिव ।

वसन्तसेना । [1]अहं अज्जचारुदत्तेण भणिदा । जो इमं अलंकारअं समप्पइस्सदि तस्स तुए मदणिआ दादव्वा । ता सो जेव्व एदं देदि त्ति एव्वं अज्जेण अवगच्छिदव्वं ।

शार्विलकः । (स्वगतम्) अये विज्ञातोऽहमनया । (प्रकाशम्) साधु आर्य चारुदत्त साधु ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥२२

अपि च

गुणेषु यत्नः पुरुषेण कार्यो न किंचिदप्राप्यतमं गुणानाम् ।
गुणप्रकर्षादुडुपेन शंभोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥२३

वसन्तसेना । [2]को एत्थ पवहणिओ ।

(प्रविश्य सप्रवहणश्चेटः)

चेटः । [3]अज्जए सज्जं पवहणं ।

वसन्तसेना । [4]हञ्जे मअणिए सुदिट्ठं मं करेहि । दिण्णासि । आरुह पवहण । सुमरेसि मं ।

मदनिका । (रुदती) [5]परिच्चुअम्हि अज्जआए । (इति पादयोः पतति ।)

वसन्तसेना । [6]संपदं तुमं जेव्व वन्दणीआ संवुत्ता । ता गच्छ । आरुह पवहणं । सुमरेसि मं ।

---

(१) अहमार्यचारुदत्तेन भणिता । य इममलंकारकं समर्पयिष्यति तस्मै त्वया मदनिका दातव्या । तत्स एवैतां ददातीत्येवमार्येणावगन्तव्यम् ।

(२) कोऽत्र प्रवहणिकः । (३) आर्ये सज्जं प्रवहणम् ।

(४) हञ्जे मदनिके सुष्टां मां कुरु । दत्तासि । आरोह प्रवहणम् । स्मर माम् ।

(५) परिच्युतास्म्यार्यायाः ।

(६) सांप्रतं त्वमेव वन्दनीया संवृत्ता । तद्गच्छ । आरोह प्रवहणम् । स्मर माम् ।

शर्विलकः। स्वस्ति भवत्यै। मदनिके

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः।
यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम् ॥२४

(इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः।)

(नेपथ्ये) कः कोऽत्र भोः। राज्ञियः समाज्ञापयति। एष खल्वार्यको गोपाल दारको राजा भविष्यतीति सिद्धादेशप्रत्ययपरिवृत्तस्तेन पालकेन राज्ञा घोषादानीय घोरे बन्धनागारे क्षिप्तः। ततः स्वेषु स्वेषु स्थानेष्वप्रमत्तैर्भवद्भिर्भवितव्यम्।

शर्विलकः। (आकर्ण्य) कथं राज्ञा पालकेन प्रियसुहृदार्यको मे बद्धः। कलत्रवांश्चास्मि संवृत्तः। आः कष्टम्। अथवा

द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च।
संप्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः ॥२५

भवत्ववतरामि। (इत्यवतरति।)

मदनिका। (साध्वसमञ्जलिं बद्ध्वा) एव्वं णेदं। ता परं णेदु मं अज्जउत्तो समीवं गुरुअणाणं।

शर्विलकः। साधु प्रिये साधु। अस्मच्चित्तसदृशमभिहितम्। (चेटमुद्दिश्य) भद्र जानीषे रेभिलस्य सार्थवाहस्योदवसितम्।

चेटः। अध इं।

शर्विलकः। तत्र प्रापय प्रियाम्।

चेटः। जं अज्जो आणवेदि।

मदनिका। जधा अज्जउत्तो भणादि। अप्पमत्तेण दाव अज्जउत्तेण होदव्वं। (इति निष्क्रान्ता।)

शर्विलकः। अहमिदानीम्

ज्ञातीन् विटान् स्वभुजविक्रमलब्धवर्णान्
राजापमानकुपितांश्च नरेन्द्रभृत्यान्।

---

(१) एवं ह्विदम्। तत् परं नयतु मामार्यपुत्रः समीपं गुरुजनानाम्।
(२) अथ किम्। (३) यदार्य आज्ञापयति।
(४) यथार्यपुत्रो भणति। अप्रमत्तेन तावदार्यपुत्रेण भवितव्यम्।

उत्तेजयामि सुहृदः परिमोक्षणाय
यौगन्धरायण इवोदयनस्य राज्ञः ॥२६

अपि च।

प्रियसुहृदमकारणे गृहीतं रिपुभिरसाधुभिराहितात्मशङ्कैः।
सरभसमभिपत्य मोचयामि स्थितमिव राहुमुखे शशाङ्कबिम्बम् ॥२७

(इति निष्क्रान्तः।)

(प्रविश्य) **चेटी**। [1]अज्जए दिट्ठिआ वड्ढसि। अज्जचारुदत्तस्य सआसादो बम्हणो आअदो।

वसन्तसेना। [2]अहो रमणीअदा अज्ज दिवसस्स। ता हञ्जे सादरं बन्धुलेण समं पवेसिहि णं।

चेटी। [3]जं अज्जआ आणवेदि। (इति निष्क्रान्ता। विदूषको बन्धुलेन सह प्रविष्टः।)

मैत्रेयः। [4]ही ही भो। तवच्चरणकिलेसविणिज्जिदेण रक्खसराओ रावणो पुप्फकेण विमाणेण गच्छदि। अहं उण बम्हणो अकिदतवच्चरणकिलेसो विणअरणारीजणेण गच्छामि।

चेटी। [5]पेक्खदु अज्जो अम्हकेरकं गेहदुआरं।

मैत्रेयः। (अवलोक्य सविस्मयम्) [6]अहो सलिलसित्तमज्जिदकिदहरिदोवलेवणस्स, विविहसुअन्धकुसुमोवहारचित्तलिदभूमिआभाअस्स, गअणतलालो-

---

(१) आर्ये दिष्ट्या वर्धसे। आर्यचारुदत्तस्य सकाशाद् ब्राह्मण आगतः।

(२) अहो रमणीयताद्य दिवसस्य। तद्भद्रे सादरं बन्धुलेन समं प्रवेशयैनम्। (३) यदार्याज्ञापयति।

(४) ही ही भोः। तपश्चरणक्लेशविनिर्जितेन राक्षसराजो रावणः पुष्पकेण विमानेन गच्छति। अहं पुनर्ब्राह्मणोऽकृततपश्चरणक्लेशोऽपि नगरनारीजनेन गच्छामि।

(५) प्रेक्षतामार्योऽस्मदीयं गेहद्वारम्।

(६) अहो सलिलसिक्तमार्जितकृतहरितोपलेपनस्य, विविधसुगन्धकुसुमोपहारचित्रितभूमिकाभागस्य, गगनतलालोकनकौतूहलदूरोन्नमितशीर्षस्य,

अणकोदूहलदूरुण्णामिदसीसस्स, दोलाअमाणावलंबिदेरावणहत्थब्भमाइदमल्लि-आदामगुणालंकिदस्स, समुच्छिददन्तितोरणावभासिदस्स, महारअणोवरा-असोहिणा पवणबलन्दोलणाललन्तचञ्चलग्गहत्थेण इदो एहि त्ति वाहरन्तेण विअ मं सोहग्गपडाआणिवहेणोवसोहिदस्स, तोरणधरणक्खम्भवेदिआणिक्खित्तसमुल्ल-सन्तहरिदचूदपल्लवललामफटिहमङ्गलकलसाभिरामोहअपास्सस्स, महासुरवक्ख-त्थलदुब्भेज्जवज्जणिरन्तरपडिबद्धकणअकवाडस्स, दुग्गदजणमणोरहाआसकरस्स, वसन्तसेणाभवणदुआरस्स सस्सिरीअदा । जं सच्चं मज्झत्थस्स वि जणस्स बलादिट्ठिं आआरेदि ।

चेटी । एंदु एदु इमं पढमं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्यावलोक्य च) ही ही भो । ईध वि पढमे पओट्ठे ससि-संखमुणालसच्छाहाओ विणिहिदचुण्णमुट्ठिपाण्डुराओ विविहरअणपाडिबद्धकञ्चण-सोवाणसोहिदाओ पासादवन्तिओ, ओलम्बिदमुत्तादामेहिं फटिहवादाअणमुह-चन्देहिं णिज्झाअन्ती विअ उज्जइणिं । सोत्तिओ विअ सुहोवविट्ठो णिद्दाअदि दोवारिओ । सदहिणा कलमोदणेण पलोहिदा ण भक्खन्ति वायसा बलिं सुधासवण्णदाए । आदेसेदु भोदी ।

दोलायमानावलम्बितैरावणहस्तभ्रमायितमल्लिकादामगुणालंकृतस्य, समुच्छ्रि-तदन्तिदन्ततोरणावभासितस्य, महारजनोपरागशोभिना पवनबलान्दोल-नाललचञ्चलाग्रहस्तेन इत एहीति व्याहरतेव मां सौभाग्यपताकानिवहेनो-पशोभितस्य, तोरणधरणस्तम्भवेदिकानिक्षिप्तसमुल्लसद्धरितचूतपल्लवललाम-स्फटिकमङ्गलकलशाभिरामोभयपार्श्वस्य, महासुरवक्षःस्थलदुर्भेद्यवज्रानिरन्तरप्रति-बद्धकनककपाटस्य, दुर्गतजनमनोरथायासकरस्य, वसन्तसेनाभवनद्वारस्य सश्रीकता । यत्सत्यं मध्यस्थस्यापि जनस्य बलाद् दृष्टिमाकारयति ।

(१) एतु एत्विमं प्रथमं प्रकोष्ठं प्रविशत्वार्यः ।

(२) अत्रापि प्रथमे प्रकोष्ठे शशिशङ्खमृणालसच्छाया विनिहितचूर्ण-मुष्टिपाण्डुरा विविधरत्नप्रतिबद्धकाञ्चनसोपानशोभिताः प्रासादपङ्क्तय उल्लम्बि-तमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निध्यायन्तीवोज्जयिनीम् । श्रोत्रिय इव सुखोपविष्टो निद्राति दोवारिकः । सदह्ना कलमोदनेन प्रलोभिता न भक्षयन्ति वायसा बलिं सुधासवर्णतया । आदिशतु भवती ।

चेटी । एँदु एदु अज्जो । इमं दुदिअं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्यावलोक्य च) ही ही भो । ईंध वि दुदिए पओट्ठे पज्जन्तोवणीदजवसबुसकवलसुपुट्ठा तेल्लब्भङ्गिदविसाणा बद्धा पवहणबइल्ला । अअं अण्णदरो अवमाणिदो विअ कुलीणो दीहं णीससदि सेरिहो । इदो अ अवणीदजुज्झस्स मल्लस्स विअ मद्दीअदि गीवा मेसस्स । इदो इदो अवराणं अस्साणं केसकप्पणा करीअदि । अअं अवरो पाडच्चरो विअ दढबद्धो मन्दुराए साहामिओ । (अन्यतोऽवलोक्य च) ईंदो अ कूरच्चुअतेल्लमिस्सं पिण्डं हत्थी पडिच्छावीअदि मेत्थपुरुसेहिं । आदेसेदु भोदी ।

चेटी । एँदु एदु अज्जो । इमं तइअं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्य दृष्ट्वा च) ही ही भो । ईंध वि तइए पओट्ठे इमाइं दाव कुलउत्तजणोववेसणणिमित्तं विरइदाइं आसणाइं । अद्धवाचिदो पासअपीठे चिट्ठइ पोत्थओ । एदं अ मणिमअसारिआसहिदं पासअपीठं । इमे अ अवरे मअणसन्धिविग्गहचदुरा विविहवण्णिआविलित्तचित्तफलअग्गहत्था इदो तदो परिब्भमन्ति गणिआ वुड्ढविडा अ । आदेसेदु भोदी ।

चेटी । एँदु एदु अज्जो । इमं चउट्ठं पओट्ठं पविसदु अज्जो ।

---

(१) एतु एत्वार्यः । इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः ।

(२) इहापि द्वितीयस्मिन् प्रकोष्ठे पर्यन्तोपनीतयवसबुसकवलसुपुष्टास्तैलाभ्यक्तविषाणा बद्धाः प्रवहणबलीवर्दाः । अयमन्यतरोऽवमानित इव कुलीनो दीर्घं निःश्वसिति सैरिभः । इतश्चापनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा मेषस्य । इत इतोऽपरेषामश्वानां केशकल्पना क्रियते । अयमपरः पाटच्चर इव दृढबद्धो मन्दुराया शाखामृगः । (३) इतश्च कूरच्युतैलमिश्रं पिण्डं हस्ती प्रतिग्राह्यते मात्रपुरुषैः । आदिशतु भवती ।

(४) एत्वेत्वार्यः । इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः ।

(५) इहापि तृतीये प्रकोष्ठ इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितान्यासनानि । अर्धवाचितं पाशकपीठे तिष्ठति पुस्तकम् । एतच्च मणिमयसारिकासहितं पाशकपीठम् । इमे चापरे मदनसन्धिविग्रहचतुरा विविधवर्णिकाविलिप्तचित्रफलकाग्रहस्ता इतस्ततः परिभ्रमन्ति गणिका वृद्धविटाश्च । आदिशतु भवति । (६) एत्वेत्वार्यः । इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः ।

मैत्रेयः। (प्रविश्यावलोक्य च) [1]ही ही भो। इध वि चउट्ठे पओट्ठे जुवदिकरताडिदा जलधरा विअ गम्भीरं णदन्ति मुरआ। क्षीणपुण्णाओ विअ गअणादो तारआओ णिवडन्ति कंसतालआ। महुअराविरुअमहुरं वज्जदि वंसो। इअं अवरा ईसापणअकुविदकामिणी विअ अङ्कारोविदा कररुहपरिमासेण सारिज्जदि वीणा। इमाओ अवराओ कुसुमरसमत्ताओ विअ महुअरिओ अदिमहुरतरं पगीदाओ गणिआदारिआओ नच्चीअन्ति णट्टअं पठीअन्ति ससिंगाराओ। ओवग्गिदा गवक्खेसु वादं गण्हन्ति सलिलगग्गरीओ। आदेसेदु भोदी।

चेटी। [2]एदु एदु अज्जो। इमं पञ्चमं पओट्ठं पविसदु अज्जो।

मैत्रेयः। (प्रविश्य दृष्ट्वा च) [3]ही ही भो। इध वि पञ्चमे पओट्ठे अअं दरिद्दजणलोहुप्पादणअरो आहरइ उवचिदो हिंगुतेल्लगन्धो। विविहसुरहिधूमुग्गारेहिं णिच्चसन्ताविज्जमाणं णीससदि विअ महाणसं दुवारमुहेहिं। अधिअं उसुसावेदि मं साहिज्जमाणबहुविहभक्खभोअणगंधो। अअं अवरो पडच्चरं विअ पोट्टिं धोअदि रूपिदारओ। बहुविहाहारविआरं उवसाहेदि सूवआरो। बज्झन्ति मोदआ। पच्चन्ति च अपूवआ। (आत्मगतम्)

---

(१) ही ही भोः। इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधरा इव गम्भीरं नदन्ति मृदङ्गाः। क्षीणपुण्या इव गगनात्तारका निपतन्ति कांस्यतालाः। मधुकरविरुतमधुरं वाद्यते वंशः। इयमपरेर्ष्याप्रणयकुपितकामिनीवाङ्कारोपिता कररुहपरामर्शेन सार्यते वीणा। इमा अपराश्च कुसुमरसमत्ता इव मधुकर्योऽतिमधुरं प्रगीता गणिकादारिका नर्त्यन्ते नाट्यं पाठ्यन्ते सशृङ्गाराः। अपवल्गिता गवाक्षेषु वातं गृह्णन्ति सलिलगर्गर्यः। आदिशतु भवती। (२) एत्वेत्वार्यः। इमं पञ्चमं प्रकोष्ठं प्रविशत्वार्यः।

(३) आश्चर्यं भोः। इहापि पञ्चमे प्रकोष्ठेऽयं दरिद्रजनलोभोत्पादनकरआहरत्युपचितो हिङ्गुतैलगन्धः। विविधसुरभिधूमोद्गारैर्नित्यसंतप्यमानं निःश्वसितीव महानसं द्वारमुखैः। अधिकमुत्सुकायते मां साध्यमानबहुविधभक्ष्यभोजनगन्धः। अयमपरः पटच्चरमिव हतपशूदरपोशिं धावति रूपिदारकः। बहुविधाहारविकारमुपसाधयति सूपकारः। बध्यन्ते मोदकाः। पच्यन्ते

[1]अवि दाणिं इह वड्ढिअं भुञ्जसु त्ति पादोदअं लहिस्सं । (अन्यतोऽवलोक्य च) [2]इदो गन्धव्वसुरगणेहिं विअ विविहालंकारसोहिदेहिं गणिआजणेहिं बन्धुलेहिं अ जं सच्चं सग्गीअदि एदं गेहं । भो के तुम्हे बन्धुला णाम ।

बन्धुलाः । वयं खलु ।

परगृहललिताः परान्नपुष्टाः परपुरुषैर्जनिताः पराङ्गनासु ।
परधननिरता गुणेष्ववाच्या गजकलभा इव बन्धुला ललामः ॥२८

मैत्रेयः । [3]आदेसेदु भोदी ।

चेटी । [4]एदु एदु अज्जो । इमं छट्ठं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्यावलोक्य च) [5]ही ही भो । इध वि छट्ठे पओट्ठे अमुं दाव सुवण्णरअणाणं कम्मतोरणाइं णीलरअणविणिम्मिक्खित्ताइं इन्दाउहट्ठाणं विअ दरिसअन्ति । वेडुरिअ-मोत्तिअ-पवाल-पुप्फराअ-इन्दणील-कक्केरअ-पउमराअ-मरगअपहुदिआइं रअणविसेसाइं अण्णोण्णं विआरेन्ति सिप्पिणो । वज्झन्ति जादरूवेहिं माणिक्काइं । घडिज्जन्ति सुवण्णालंकारा । रत्तसुत्तेण गत्थीअन्ति मोत्तिआभरणाइं । घसीअन्ति धीरं वेडुरिआइं । छेदीअन्ति सङ्खआ । साणिज्जन्ति पवालआ । सुक्खविअंति ओल्लविदकुङ्कमपत्थरा । सालीअदि सेलअजं । विस्साणीअदि चन्दणरसो । संजोईअन्ति गन्धजुत्तीओ । दीअदि

चापूपकाः । (१) अपीदानीमिह वर्धितं भुङ्क्ष्वेति पादोदकं लप्स्ये । (२) इतो गन्धर्वसुरगणैरिव विविधालंकारशोभितैर्गणिकाजनैर्बन्धुलैश्च यत्सत्यं स्वर्गायत इदं गेहम् । भोः के यूयं बन्धुला नाम ।

(३) आदिशतु भवती ।

(४) एत्वेत्वार्यः । इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः ।

(५) ही ही भोः । इहापि षष्ठे प्रकोष्ठेऽमूनि तावत्सुवर्णरत्नानां कर्मतोरणानि नीलरत्नविनिक्षिप्तानीन्द्रायुधस्थानमिव दर्शयन्ति । वैदूर्यमौक्तिकप्रवालकपुष्परागेन्द्रनीलकर्केरकपद्मरागमरकतप्रभृतीन् रत्नविशेषानन्योन्यं विचारयन्ति शिल्पिनः । बध्यन्ते जातरूपैर्माणिक्यानि । घट्यन्ते सुवर्णालंकाराः । रक्तसूत्रेण ग्रथ्यन्ते मौक्तिकाभरणानि । घृष्यन्ते धीरं वैदूर्याणि । छिद्यन्ते शङ्खाः । शाणीयन्ते प्रवालकाः । शोष्यन्ते आर्द्रकुङ्कुमप्रस्तराः । सार्यते(?) कस्तूरिका । विशेषेण घृष्यते(?) चन्दनरसः । संयोज्यन्ते गन्धयुक्तयः ।

गणिआकामुकाणं सकप्पूरं तम्बोलं । अवलोईअदि सकडक्खअं । पअट्टदि हासो । पिवीअदि अ अणवरअं ससिक्कारं महरा । इमे चेडा इमा चेडिआओ इमे अवरे अवधीरिदपुत्तदारावित्ता मणुस्सा आसवकरआपीदमदिरेहिं गणिआजणेहिं जे मुक्का ते पिआन्ति । आदेसेदु भोदी ।

चेटी । एंदु एदु अज्जो । इमं सत्तमं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्यावलोक्य च) ही ही भो । ईंध वि सत्तमे पओट्ठे सुसिलिट्ठविहंगवाडीसुहणिसण्णाइं अण्णोण्णचुम्बणपराइं सुहं अणुभवन्ति पारावदमिहुणाइं । दहिभत्तपूरिदोदरो बम्हणो विअ सुत्तं पढदि पुंजरसुओ । इअं अवरा सामिसंमाणणालद्धप्पसरा विअ घरदासी अधिअं कुरुकुरायदि मदणसारिआ । अणेअफलरसास्सादपदुट्ठकण्ठा कुम्भदासी विअ कूअदि परउट्टा । आलम्बिदा णागदंतेसु पञ्जरपरम्पराओ । जोधीअन्ति लावआ । आलवीअन्ति पञ्जरकविञ्जला । पेसीअन्ति पञ्जरकवोदा । इदो तदो विविहमणिचित्तलिदो विअ अअं सहरिसं णच्चन्तो रविकिरणसन्तत्तं पक्खुक्खेवेहिं विधुवेदि विअ पासादं घरमोरो । (अन्यतोऽवलोक्य ।) ईंदो पिण्डीकिदा विअ चन्दपादा पदगदिं सिक्खन्ता विअ कामिणीणं पच्छादो परिब्भमन्ति राअहंसमिहुणा । एदे

दीयते गणिकाकामुकानां सकर्पूरं ताम्बूलम् । अवलोक्यते सकटाक्षम् । प्रवर्तते हासः । पीयते चानवरतं ससीत्कारं मदिरा । इमे चेटा इमाश्चेटिका इमेऽपरेऽवधीरितपुत्रदारवित्ता मनुष्या आसवकरकापीतमदिरैर्गणिकाजनैर्ये मुक्तास्ते पिबन्ति । आदिशतु भवती ।

(१) एत्वेत्वार्यः । इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः ।

(२) इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहङ्गवाटीसुखनिषण्णान्यन्योन्यचुम्बनपराणि सुखमनुभवन्ति पारावतमिथुनानि । दधिभक्तपूरितोदरो ब्राह्मण इव सूक्तं पठति पञ्जरशुकः । इयमपरा स्वामिसंमाननालब्धप्रसरेव गृहदास्यधिकं कुरुकुरायते मदनसारिका । अनेकफलरसास्वादप्रतुष्टकण्ठा कुम्भदासीव कूजति परपुष्टा । आलम्बिता नागदन्तेषु पञ्जरपरम्पराः । योध्यन्ते लावकाः । आलाप्यन्ते पञ्जरकपिञ्जलाः । प्रेष्यन्ते पञ्जरकपोताः । इतस्ततो विविधमणिचित्रित इवायं सहर्षं नृत्यन् रविकिरणसंतप्तं पक्षोत्क्षेपैर्विधुवति प्रासादं गृहमयूरः । (३) इतः पिण्डीकृता इव चन्द्रपादाः पदगतिं शिक्षमाणानीव

अवरे बुड्ढमहल्लआ विअ इदो तदो संचरन्ति घरसारसा । ही ही भो । पसारणअं किदं गणिआए णाणापक्खिसमूहेहिं । जं सच्चं क्खु णन्दनवणं विअ मे गणिआघरं पडिभासदि । आदेसेदु भोदी ।

चेटी । एदु अज्जो । इमं अट्टमं पओट्ठं पविसदु अज्जो ।

मैत्रेयः । (प्रविश्यावलोक्य च) भोदि को एसो पट्टपावारअपाउदो अधिअदरं अचन्भुदपुणरुत्तालंकारालंकिदो अंगभंगेहिं परिक्खलन्तो इदो तदो परिब्भमदि ।

चेटी । अज्ज एसो अजआए भादा भोदि ।

मैत्रेयः । केत्तिअं तवचरणं कदुअ वसन्तसेणाए भादा भोदि । अधवा मा दाव । जदि वि एसो उज्जलो सिणिद्धो अ सुअन्धो अ तह वि मसाणवीधीए जादो विअ चम्पअरुक्खो अणहिगमणीओ लोअस्स । (अन्यतोऽवलोक्य) भोदि एसा उण का फुल्लपावारअपाउदा उवाणहजुअलणिक्खित्ततेल्लचिक्कणेहिं पादेहिं उच्चासणे उवविट्ठा चिट्ठदि ।

चेटी । अज्ज एसा क्खु अम्हाणं अज्जआए अत्तिआ ।

मैत्रेयः । अहो से करट्टडाइणीए पोट्टवित्थारो । ता किं एदं पवेसिअ

कामिनीनां पश्चात्परिभ्रमन्ति राजहंसमिथुनानि । एतेऽपरे वृद्धश्रेष्ठा इव इतस्ततः संचरन्ति गृहसारसाः । ही ही भोः । प्रसारणं कृतं गणिकाया नानापक्षिसमूहैः । यत्सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते । आदिशतु भवती । (१) एत्वार्यः । इममष्टमं प्रकोष्ठं प्रविशत्वार्यः ।

(२) भवति क एष पट्टप्रावारकप्रावृतोऽधिकतरमत्यद्भुतपुनरुक्तालंकारालंकृतोऽङ्गभङ्गैः परिस्खलन्नितस्ततः परिभ्रमति ।

(३) आर्य एष आर्याया भ्राता भवति ।

(४) कियत्तपश्चरणं कृत्वा वसन्तसेनाया भ्राता भवति । अथवा मा तावत् । यद्यपि एष उज्ज्वलः स्निग्धश्च सुगन्धश्च तथापि स्मशानवीथ्यां जात इव चम्पकवृक्षोऽनभिगमनीयो लोकस्य । (५) भवत्येषा पुनः का पुष्पप्रावारकप्रावृतोपानद्युगलनिक्षिप्ततैलचिक्कणाभ्यां पादाभ्यामुच्चासनोपविष्टा तिष्ठति ।

(६) आर्य एषा खल्वस्माकमार्याया माता ।

(७) अहो अस्या करट्टडाकिन्या उदरविस्तारः । तत्किमेतां प्रवेश्य

महादेवं विअ दुआरसोहा **इह घरे णिम्मिदा** ।

चेटी । हैदास मा एव्वं उवहस अम्हाणं अत्तिअं । एसा क्खु चाउत्थिएण पीडीअदि ।

मैत्रेयः । (सपरिहासम्) भैअवं चाउत्थिअ एदिणा उवआरेण मं पि बम्हणं आलोएहि ।

चेटी । हैदास मरिस्ससि ।

मैत्रेयः । (सपरिहासम्) दासीए धीए वरं ईदिसो सूणपीणजठरो मुदो जेव्व ।

सीहुसुरासवमत्तिआ एआवत्थं गदा हि गत्तिआ ।
जइ मरदि एत्थ अत्तिआ भोदि सिआलसहस्सजात्तिआ ॥२९

भोदि किं तुम्हाणं जाणवत्ता वहन्ति ।

चेटी । अज्ज णहि णहि ।

मैत्रेयः । किं वा एत्थ पुच्छिअदि । तुम्हाणं क्खु पेम्मणिम्मलजले मअणसमुद्दे त्थणणिअम्बजहणा जेव्व जाणवत्ता मणहरणा । एव्वं वसंतसेणाए बहुवुत्तन्तं अट्टपओट्ठं भवणं पेक्खिअ जं सच्चं जाणामि एकत्थं विअ तिविअं दिट्ठं । पसंसिदुं णात्थि मे वाआविहवो । किं दाव गणिआघरो आदु

महादेवमिव द्वारशोभेह गृहे निर्मिता ।

(१) हताश मैवमुपहसास्माकं मातरम् । एषा खलु चातुर्थिकेन पीड्यते ।

(२) भगवन् चातुर्थिक एतेनोपचारेण मामपि ब्राह्मणमालोकय ।

(३) हताश मरिष्यसि ।

(४) दास्याः पुत्रि वरमीदृशः शूनपीनजठरो मृत एव ।
सीधुसुरासवमत्ता एतादृशीमवस्थां गता हि गर्तिका ।
यदि म्रियतेऽत्र माता भवति शृगालसहस्रयात्रा ॥

भवति किं युष्माकं यानपात्राणि वहन्ति । (५) आर्य नहि नहि ।

(६) किं वात्र पृच्छ्यते । युष्माकं खलु प्रेमनिर्मलजले मदनसमुद्रे स्तननितम्बजघनान्येव यानपात्राणि मनोहराणि । एवं वसन्तसेनाया बहुवृत्तान्तमष्टप्रकोष्ठं भवनं प्रेक्ष्य यत्सत्यं जानाम्येकस्थमिव त्रिविष्टपं दृष्टम् । प्रशंसितुं नास्ति मे वाचाविभवः । किं तावद्गणिकागृहमथवा कुबेरभवनपरिच्छेद इति ।

कुबेरभवणपरिच्छेदो त्ति । **कहिं तुम्हाणं अज्जआ ।**

चेटी । अज्ज एसा रुक्खवाडिआए चिट्ठदि । ता पविसदु अज्जो ।

मैत्रेयः । (प्रविश्य दृष्ट्वा च) ही ही भो । अहो रुक्खवाडिआए सस्सिरिअदा । अच्छरीअकुसुमा जत्थ रोविदा अणेअपादवा । णिरन्तरपादवतलणिम्मिदा जुवदिजणजहणप्पमाणा पट्टदोला । सुवण्णजूहिआ-सेहालिआ-मालई-मल्लिआ-णोमालिआ-कुरवआ-अदिमोत्तअप्पहुदिकुसुमेहिं सअं णिवडिदेहिं जं सच्चं लहुकेरेदि विअ णन्दणवणस्स सस्सिरीअदं । (अन्यतोऽवलोक्य) ईदो अ उदअन्तसूरसमप्पेहिं कमलरत्तोप्पलेहिं संझाअदि विअ दीहिआ । अवि अ

एसो असोअवुच्छो णवणिग्गमकुसुमपल्लवो भादि ।
सुहडो व्व समरमज्झे घणलोहिदपङ्कचच्चिक्को ॥३०

भोदि ता कहिं तुम्हाणं अज्जआ ।

चेटी । अज्ज ओणमेहि दिट्ठिं । पेक्ख अज्जअं ।

मैत्रेयः (दृष्ट्वोपसृत्य) सौत्थि भोदीए ।

वसन्तसेना । अये मैत्रेयः । (उत्थाय) स्वागतम् । इदमासनम् । अत्रोपविश्यताम् ।

मैत्रेयः । उवविसदु भोदी । (उभावुपविशतः ।)

वसन्तसेना । अपि कुशलं सार्थवाहपुत्रस्य ।

कुत्र युष्माकमार्या ।

(१) आर्य एषा वृक्षवाटिकायां तिष्ठति । तत्प्रविशत्वार्यः ।

(२) आश्चर्यं भोः । अहो वृक्षवाटिकायाः सश्रीकता । आश्चर्यकुसुमा यत्र रोपिता अनेकपादपाः । निरन्तरपादपतलनिर्मिता युवतिजनजघनप्रमाणा पट्टदोला । सुवर्णयूथिकाशेफालिकामालतीमल्लिकानवमालिकाकुरबकातिमुक्तकप्रभृतिकुसुमैः स्वयं निपतितैर्यत्सत्यं लघूकरोतीव नन्दनवनस्य सश्रीकता । (३) इतश्चोदयत्सूर्यसमप्रभैः कमलरक्तोत्पलैः संध्यायत इव दीर्घिका । अपि च। एषोऽशोकवृक्षो नवनिर्गतकुसुमपल्लवो भाति ।

सुभट इव समरमध्ये घनलोहितपङ्कचर्चिकः ॥

भवति तत्कुत्र युष्माकमार्या । (४) आर्य अवनमय दृष्टिम् । पश्यार्याम् ।

(५) स्वस्ति भवत्यै । (६) उपविशतु भवती ।

मैत्रेयः। भोदि कुसलं।

वसन्तसेना। आर्य मैत्रेय अपीदानीम्

गुणप्रवालं विनयप्रशाखं विश्रम्भमूलं महनीयपुष्पम्।
तं साधुवृक्षं स्वगुणैः फलाढ्यं सुहृद्विहङ्गाः सुखमाश्रयन्ति ॥३१

मैत्रेयः। (स्वगतम्) सुट्ठु उवलक्खिदं दुट्ठविलासिणीए। (प्रकाशम्) अंध इं।

वसन्तसेना। अये किमागमनप्रयोजनम्।

मैत्रेयः। सुणादु भोदी। तत्तभवं चारुदत्तो सीसे अञ्जलिं कदुअ भोदिं विण्णवेदि।

वसन्तसेनाः। (अञ्जलिं बद्ध्वा।) किमाज्ञापयति।

मैत्रेयः। मए तं सुवण्णभण्डअं विस्सम्भादो अत्तणेकेरकेत्ति कदुअ जूदे हारिदं। सो अ सहिओ राजावच्छआरी ण आणिअदि कहिं गदो त्ति।

चेटी। अज्जए दिट्ठिआ वड्ढसि। अज्जो जूदिअरो संवुत्तो।

वसन्तसेना। (स्वगतम्) कधं चोरेण अवहदं सोण्डीरदाए जूदे हारिदं त्ति भणादि। अदो जेव्व कामीअदि।

मैत्रेयः। ता तस्स कारणादो गेण्हदु भोदी इमं रअणावलिं।

वसन्तसेना। (आत्मगतम्) किं दंसेमि अलंकारअं। (विचिन्त्य) अंध-

---

(१) भवति कुशलम्।

(२) सुष्ठूपलक्षितं दुष्टविलासिन्या। (३) अथ किम्।

(४) शृणोतु भवती। तत्रभवांश्चारुदत्तः शीर्षेऽञ्जलिं कृत्वा भवतीं विज्ञापयति। (५) मया तत्सुवर्णभाण्डं विश्रम्भादात्मन इति कृत्वा द्यूते हारितम्। स च सभिको राजापथ्यकारी न ज्ञायते कुत्र गत इति।

(६) आर्ये दिष्ट्या वर्धसे। आर्यो द्यूतकरः संवृत्तः।

(७) कथं चौरेणापहृतमपि शौण्डीरतया द्यूते हारितमिति भणति। अत एव काम्यते।

(८) तत्तस्य कारणाद्गृह्णातु भवतीमां रत्नावलीम्।

(९) किं दर्शयामि तमलंकारम्। (१०) अथवा न तावत्।

वा ण दाव ।

मैत्रेयः । किं[1] दाव ण गेण्हदि भोदी एदं रअणावलिं ।

वसन्तसेना । (विहस्य सखीमुखं पश्यन्ती) [2]मित्तेअ कधं ण गेण्हिस्सं रअणावलिं । (इति गृहीत्वा पार्श्वे स्थापयति । स्वगतम्) [3]कधं झीणकुसुमादो वि सहआरपादवादो मअरन्दबिन्दओ णिवडन्ति । (प्रकाशम्) [4]अज्ज विण्णवेसि तं जूदिअरं मम वअणेण अज्जचारुदत्तं । अहं पि पदोसे अज्जं पोक्खिदुं आगमिस्सामि त्ति ।

मैत्रेयः । (स्वगतम्) [5]किं अण्णं तहिं गदुअ गेण्हिस्सदि । (प्रकाशम्) [6]भोदि भणामि (स्वगतम्) [7]णिअत्तीअदु इमादो गणिआपसङ्गादो त्ति । (इति निष्क्रान्तः ।)

वसन्तसेना । [8]हंजे गेण्ह एदं अलंकारअं । चारुदत्तं अहिरमिदुं गच्छम्ह ।

चेटी । अंजए पेक्ख पेक्ख । उण्णमदि अकालदुद्दिणं ।

वसन्तसेना ।

उदयन्तु नाम मेघा भवतु निशा वर्षमविरतं पततु ।
गणयामि नैव सर्वं दयिताभिमुखेन हृदयेन ॥३२

[9]हंजे हारं गेण्हिअ लहुं आअच्छ । (इति निष्क्रान्ताः सर्वे ।)

मदनिकाशर्विलको नाम चतुर्थोऽङ्कः ॥

---

(१) किं तावन्न गृह्णाति भवत्येतां रत्नावलीम् ।

(२) मैत्रेय कथं न ग्रहीष्यामि रत्नवालीम् । (३) कथं हीनकुसुमादपि सहकारपादपान्मकरन्दबिन्दवो निपतन्ति । (४) आर्य विज्ञापय तं द्यूतकरं मम वचनेनार्यचारुदत्तम् । अहमपि प्रदोष आर्यं प्रेक्षितुमागमिष्यामीति ।

(५) किमन्यत्तत्र गत्वा ग्रहीष्यति । (६) भवति भणामि । (७) निवर्ततामस्माद्गणिकाप्रसङ्गादिति ।

(८) हञ्जे गृहाणैतमलंकारम् । चारुदत्तमभिरन्तुं गच्छावः ।

(९) आर्ये पश्य पश्य । उन्नमत्यकालदुर्दिनम् ।

(१०) हञ्जे हारं गृहीत्वा लघ्वागच्छ ।

पञ्चमोऽङ्कः ।

(ततः प्रविशत्यासनस्थः सोत्कण्ठश्चारुदत्तः ।)

चारुदत्तः । (ऊर्ध्वमवलोक्य) उन्नमत्यकालदुर्दिनम् । यदेतत्

आलोकितं गृहशिखण्डिभिरुत्कलापै-
र्हंसैर्यियासुभिरपाकृतमुन्मनस्कैः ।
आकालिकं सपदि दुर्दिनमन्तरिक्ष-
मुत्कण्ठितस्य हृदयं च समं रुणद्धि ॥१

अपि च । मेघो जलार्द्रमहिषोदरभृङ्गनीलो
विद्युत्प्रभारचितपीतपटोत्तरीयः ।
आभाति संहतबलाकगृहीतशृङ्गः
खं केशवोऽपर इवाक्रमितुं प्रवृत्तः ॥२

अपि च । केशवगात्रश्यामः कुटिलबलाकावलीरचितशृङ्गः ।
विद्युद्गुणकौशेयश्चक्रधर इवोन्नतो मेघः ॥३

एता निषिक्तरजतद्रवसंनिकाशा धारा जवेन पतिता जलदोदरेभ्यः ।
विद्युत्प्रदीपशिखया क्षणनष्टदृष्टाविछन्ना इवाम्बरपटस्य दशाः
पतन्ति ॥४

संसक्तैरिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः
तैस्तैराकृतिविस्तरैरनुगतैर्मेघैः समभ्युन्नतैः
पत्रच्छेद्यमिवेह भाति गगनं विश्लेषितैर्वायुना ॥५

एतत्तद्धृतराष्ट्रचक्रसदृशं मेघान्धकारं नभो
हृष्टो गर्जति चातिदर्पितबलो दुर्योधनो वा शिखी ।
अक्षद्यूतजितो युधिष्ठिर इवाध्वानं गतः कोकिलो
हंसाः संप्रति पाण्डवा इव वनादज्ञातचर्यां गताः ॥६

(विचिन्त्य।) चिरः खलु कालो मैत्रेयस्य वसन्तसेनायाः सकाशं गतस्य। नाद्याप्यागच्छति।

(प्रविश्य) **मैत्रेयः**। अहो[1] गणिआए लोभो अदक्खिणदा अ। जदो ण कधा वि कदा अण्णा। अणाअरेण जेव्व अभणिअ किं पि एअमेअ गहिदा रअणावली। एत्तिआए रिद्धीए ण तए अहं भणिदो। अज मित्तेअ वीसमीअदु गल्लकेण पाणीअं पिविअ गच्छीअदु त्ति। ता मा दाव दासीए धीआए गणिआए मुहं पि पेक्खिस्सं। (सनिर्वेदम्) सुट्ठु[2] क्खु वुच्चदि। अकन्दसमुत्थिदा पउमिणी अवंचओ वाणिओ अचोरो सुवण्णआरो अकलहो गामसमागमो अलुद्धा गणिआ त्ति दुक्करं एदे संभावीअन्ति। ता पिअवअस्सं गदुअ इमादो गणिआपसंगादो णिवत्तावेमि। (परिक्रम्य दृष्ट्वा) कधं[3] पिअवअस्सो रुक्खवाडिआए उवविट्ठो चिट्ठदि। ता जाव उवसप्पामि। (उपसृत्य) सौत्थि भोदे। वड्ढदु भवं।

चारुदत्तः। (विलोक्य) अये सुहृन्मे मैत्रेयः। वयस्य स्वागतम् आस्यताम्।

मैत्रेयः। उवविट्ठम्हि[4]।

चारुदत्तः। वयस्य कथय तत् कार्यम्।

मैत्रेयः। तं क्खु[5] कज्जं विणट्ठं[6]।

चारुदत्तः। किं तया न गृहीता रत्नावली।

---

(१) अहो गणिकाया लोभोऽदक्षिणता च। यतो न कथापि कृतान्या। अनादरेणैवामणित्वा किमप्येवमेव गृहीता रत्नावली। एतावत्या ऋद्धया न तयाहं भणितः। आर्य मैत्रेय विश्रम्यतां गल्लकेन पानीयं पीत्वा गम्यतामिति। तन्मा तावद् दास्याः पुत्र्या गणिकाया मुखमपि द्रक्ष्यामि। (२) सुष्ठु खलूच्यते। अकन्दसमुत्थिता पद्मिनी, अवञ्चको वणिक्, अचौरः सुवर्णकारः, अकलहो ग्रामसमागमः, अलुब्धा गणिकेति दुष्करमेते संभाव्यन्ते। तत् प्रियवयस्यं गत्वाऽस्मादगणिकाप्रसङ्गान्निवर्तयामि। (३) कथं प्रियवयस्यो वृक्षवाटिकायामुपविष्टस्तिष्ठति तद्यावदुपसर्पामि। (४) स्वस्ति भवते। वर्धतां भवान्।

(५) उपविष्टोऽस्मि। (६) तत् खलु कार्यं विनष्टम्।

मैत्रेयः। कुदो अम्हाणं एत्तिअं भाअधेअं। णवणलिनकोमलं अङ्गालिं मत्थए कदुअ पडिच्छिआ।

चारुदत्तः। तत्किं ब्रवीषि विनष्टमिति।

मैत्रेयः। भो कधं ण विणट्ठं। जं अभुत्तस्स अपीदस्स चोरेहिं अवहदस्स अप्पमुल्लस्स सुवण्णभण्डअस्स कारणादो चदुस्समुद्दसारभूदा रअणमाला हारिदा।

चारुदत्तः। वयस्य मा मैवम्।

यं समालम्ब्य विश्वासं न्यासोऽस्माभु तया कृतः।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥७

मैत्रेयः। भो वअस्स एदं पि मे दुदिअं संतावकारणं जं सहीअणदिण्णसंण्णाए पडन्तोवारिदं मुहं कदुअ अहं उवहसिदो। ता अहं बम्हणो भविअ दाणिं भवन्तं सीसेण पडिअ विण्णवेमि। णिवत्तीअदु अप्पा इमादो बहुपच्चवाआदो गणिआपसंगादो। गणिआ णाम पादुअन्तरप्पविट्ठा विअ लेट्ठुआ दुक्खेण उण णिराकरीअदि। अवि अ भो वअस्स। गणिआ हत्थी काअत्थओ भिक्खु चाटो रासहो अ जहिं एदे णिवसन्ति तहिं दुट्ठा वि ण जाअंति।

चारुदत्तः। वयस्य अलमिदानीं सर्वं परिवादमुक्त्वा। अवस्थयैवास्मि निवारितः। पश्य

वेगं करोति तुरगस्त्वरितं प्रयातुं
प्राणव्ययान्न चरणास्तु तथा वहन्ति।

---

(१) कुतोऽस्माकमेतावद्भागधेयम्। नवनलिनकोमलमङ्गालिं मस्तके कृत्वा प्रतीष्टा।

(२) भोः कथं न विनष्टम्। यदभुक्तस्यापीतस्य चौरैरपहृतस्याल्पमूल्यस्य सुवर्णभाण्डस्य कारणाच्चतुःसमुद्रसारभूता रत्नमाला हारिता।

(३) भो वयस्य एतदपि मे द्वितीयं संतापकारणं यत् सखीजनदत्तसंज्ञया पटान्तापवारितं मुखं कृत्वाऽहमुपहसितः। तदहं ब्राह्मणो भूत्वेदानीं भवन्तं शीर्षेण पतित्वा विज्ञापयामि। निवर्त्यतामात्माऽस्माद्बहुप्रत्यवायाद्गणिकाप्रसङ्गात्। गणिका नाम पादुकान्तरप्रविष्टेव लेष्टुका दुःखेन पुनर्निराक्रियते। अपि च भो वयस्य। गणिका हस्ती कायस्थो भिक्षुश्चाटो राजभश्च यत्रैते निवसन्ति तत्र दुष्टा अपि न यान्ति।

सर्वत्र यान्ति पुरुषस्य चलाः स्वभावाः
खिन्नास्ततो हृदयमेव पुनर्विशन्ति ॥८

अपि च वयस्य

यस्यार्थास्तस्य सा कान्ता धनहार्यो ह्यसौ जनः ।

(स्वगतम्) न गुणहार्यो ह्यसौ जनः । (प्रकाशम्)

वयमर्थैः परित्यक्ता ननु त्यक्तैव सा मया ॥९

मैत्रेयः । (अधोऽवलोक्य स्वगतम्) जेधा एसो उद्धं पेक्खिअ दीहं णिससदि तधा तक्केमि मए विणिवारिअन्तस्स अधिअदरं वड्ढिदा से उक्कण्ठा। ता सुट्ठु क्खु एव्वं वुच्चदि कामो वामो त्ति। (प्रकाशम्) भो वअस्स भणिदं अ ताए। भणेहि चारुदत्तं अज्ज पओसे मए एत्थ आअन्तव्वं त्ति । ता तक्केमि रअणावलीए अपरितुट्ठा अवरं मग्गिदुं आअमिस्सदि त्ति ।

चारुदत्तः । वयस्य आगच्छतु । परितुष्टा यास्यति ।

कुम्भीलकः । (प्रविश्य) अवेधमाणहे ।

जधा जधा वरिशदि अब्भखण्डे तधा तधा तिम्मदि पुट्ठिचम्मे ।
जधा जधा लग्गदि शीदवादे तधा तधा वेवदि मे हलक्के ॥१०

(प्रहस्य) वंशं वाए शत्तच्छिदं शुशद्दं वीणं वाए शत्ततन्तिं णदन्तिं ।
गीअं गाए गद्दहशाणुलूअं के मे गाणे तुम्बुलू णालदे वा ॥११

---

(१) यथैष ऊर्ध्वं प्रेक्ष्य दीर्घं निःश्वसिति तथा तर्कयामि मया निवार्यमाणस्याधिकतरं वृद्धास्योत्कण्ठा । तत् सुष्ठु खल्वेवमुच्यते कामो वाम इति ।

(२) भो वयस्य भणितं च तया भण चारुदत्तमद्य प्रदोषे मयात्रागन्तव्यमिति। तत्तर्कयामि रत्नावल्याऽपरितुष्टाऽपरं याचितुमागमिष्यतीति ।

(३) अवेधमाणहे

यथा यथा वर्षति अभ्रखण्डं तथा तथा तिम्यति पृष्ठचर्म ।
यथा यथा लगति शीतवातस्तथा तथा वेपते मे हृदयम् ॥

(४) वंशं वादयामि सप्तच्छिद्रं सुशब्दं वीणां वादयामि सप्ततन्त्रीं नदन्तीम् ।
गीतं गास्यामि गन्धर्वस्यानुरूपं को मे गाने तुम्बुरुर्नारदो वा ॥

आणत्तम्हि अज्जआए वशन्तशेणाए । कुम्भीलआ गच्छ तुमं मम आगमणं अज्जचालुदत्तश्श णिवेदेहि त्ति । ता जाव अज्जचालुदत्तश्श गेहं गच्छिमि। (परिक्रम्य प्रविष्टकेन दृष्ट्वा) एशे चालुदत्ते लुक्खवाडिआए चिट्ठदि । एशे वि शे दुट्ठवडुके । ता जाव उवशप्पेमि । कधं ढक्किदे दुवाले लुक्खवाडिआए । भोदु । एदश्श दुट्ठवडुकश्श शण्णं देमि (इति लोष्टगुटिकाः क्षिपति ।)

मैत्रेयः । अए को दाणिं एसो पाआरवेट्टिदं विअ कइत्थं मं लोट्ठकेहिं ताडेदि ।

चारुदत्तः । आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पातितं भवेत् ।

मैत्रेयः । दासीए उत्त दुट्ठपारावअ चिट्ठ चिट्ठ जाव एदिणा दण्डकट्ठेण सुपक्कं विअ चूअफलं इमादो पासादादो भूमीए पाडइस्सं । (इति दण्डकाष्ठमुद्यम्य धावति ।)

चारुदत्तः । (यज्ञोपवीतं आकृष्य ।) वयस्य उपविश । किमनेन । तिष्ठतु दयितासहितस्तपस्वी पारावतः ।

कुम्भीलकः । कधं पारावदं पेक्खदि मं ण पेक्खदि । भोदु अवराए लोट्ठगुडिआए पुणो वि ताडइस्सं । (तथा करोति ।)

मैत्रेयः । (दिशोऽवलोक्य) कधं कुम्भीलओ । ता जाव उवसप्पामि । (उपसृत्य द्वारमुद्घाट्य) अरे कुम्भीलअ पविस । साअदं दे ।

---

(१) आज्ञप्तोस्म्यार्यया वसन्तसेनया । कुम्भीलक गच्छ त्वं ममागमनमार्यचारुदत्ताय निवेदयेति । तद्यावदार्यचारुदत्तस्य गेहं गच्छामि । (२) एष चारुदत्तो वृक्षवाटिकायां तिष्ठति । एषोऽपि स दुष्टवटुकः । तद्यावदुपसर्पामि । कथमाच्छादितं द्वारं वृक्षवाटिकायाः । भवतु । एतस्य दुष्टवटुकस्य संज्ञां ददामि ।

(३) अये क इदानीमेष प्राकारवेष्टितमिव कपित्थं मां लोष्टकैस्ताडयति ।

(४) दास्याः पुत्र दुष्टपारावत तिष्ठ तिष्ठ यावदेतेन दण्डकाष्ठेन सुपक्वमिव चूतफलमस्मात् प्रासादाद् भूमौ पातयिष्यामि ।

(५) कथं पारावतं पश्यति मां न पश्यति । भवत्वपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि ।

(६) कथं कुम्भीलकः । तद्यावदुपसर्पामि । (७) अरे कुम्भीलक प्रविश ।

कुम्भीलकः। (प्रविश्य) [1]अज वन्दामि।

मैत्रेयः। [2]अरे कहिं तुमं ईदिसे दुद्दिणे अन्धआरे आअदो।

कुम्भीलकः। [3]अले एशा शा।

मैत्रेयः। [4]का एसा का।

कुम्भीलकः। [5]एशा शा।

मैत्रेयः। [6]किं दाणिं दासीए उत्ता दुब्भिक्खकाले बुड्ढरङ्को विअ उद्धकं सासाअसि एसा सा सेत्ति।

कुम्भीलकः। [7]अले तुमं पि दाणिं इन्दमहकासुको विए सुट्ठु किं काकाअसि का केत्ति।

मैत्रेयः। [8]ता कहेहि।

कुम्भीलकः। (स्वगतम्) भोदु। एव्वं भणिश्शं। (प्रकाशम्) अले पण्हं दे दइश्शं।

मैत्रेयः। [9]अहं दे मुण्डे गोडं दइस्सं।

कुम्भीलकः। [10]अले जाणाहि तेण हि। कदिश्श काले चूआ मौलेन्ति।

मैत्रेयः। [11]अरे दासीए उत्ता गिम्हे।

कुम्भीलकः। (सहासम्) [12]अले णहि णहि।

मैत्रेयः। (स्वगतम्) [13]किं दाणिं एत्थ कहिस्सं। (विचिन्त्य) [14]भोदु।

स्वागतं ते।

(१) आर्य वन्दे। (२) अरे कुत्र त्वमीदृशे दुर्दिनेऽन्धकार आगतः।

(३) अरे एषा सा। (४) का एषा का। (५) एषा सा।

(६) किमिदानीं दास्याः पुत्र दुर्भिक्षकाले वृद्धरङ्कः इवोर्ध्वकं श्वासायसे एषा सा सेति।

(७) अरे त्वमपीदानीमिन्द्रमहकामुक इव सुष्ठु किं काकायसे का केति।

(८) तत् कथय। (३) भवतु। एवं भणिष्यामि। अरे प्रश्नं ते दास्यामि।

(९) अहं ते मस्तके पादं दास्यामि।

(१०) अरे जानीहि। तेन हि कस्मिन् काले चूता मुकुलिता भवन्ति।

(११) अरे दास्याः पुत्र ग्रीष्मे। (१२) अरे नहि नहि।

(१३) किमिदानीमत्र कथयिष्यामि।(१४) भवतु। चारुदत्तं गत्वा प्रस्थास्यामि।

चारुदत्तं गदुअ पुच्छिस्सं । (प्रकाशम्) अरे[1] मुहुत्तअं चिट्ठ । (चारुदत्तमुपसृत्य) भो वअस्स पुच्छिस्सं दाव कस्सि काले चूआ मौलेन्ति ।

चारुदत्तः । मूर्ख वसन्ते ।

मैत्रेयः । (कुम्भीलकमुपगम्य) मुक्ख[3] वसन्ते ।

कुम्भीलकः । दुंदिअं[4] दे पण्हं दइस्सं । सुसमिद्धाणं गामाणं का लक्खअं कलेदि ।

मैत्रेयः । अरे[5] रच्छा ।

कुम्भीलकः । (सहासम् ।) अले[6] णहि णहि ।

मैत्रेयः । भोदु संसए पडिदम्हि । (विचिन्त्य) भोदु चारुदत्तं पुणो वि पुच्छिस्सं । (पुनर्निवृत्य चारुदत्तं तथैवोदाहरति ।)

चारुदत्तः । वयस्य सेना ।

मैत्रेयः (कुम्भीलकमुपगम्य) अरे दासिए उत्ता सेणा ।

कुम्भीलकः । अले[9] दुवे वि एक्कदिश कदुअ शिग्घं भणाहि ।

मैत्रेयः । [11]सेणावसन्ते ।

कुम्भीलकः । [12]णं पलिवत्तिअ भणाहि ।

मैत्रेयः । (कायेन परिवृत्य) [11]सेणावसन्ते ।

कुम्भीलकः । [13]अले मुक्ख बडुव्वका पदाइं पलिवत्तावेहि ।

मैत्रेयः । (पादौ परिवर्त्य ।) [11]सेणावसन्ते ।

विटः । [14]अले मुक्ख अक्खलपदाइं पलिवत्तावेहि ।

---

(१) अरे मुहूर्तकं तिष्ठ । (२) भो वयस्य प्रक्ष्यामि तावत् कस्मिन् काले चूता मुकुलयन्ति । (३) मूर्ख वसन्ते ।

(४) द्वितीयं ते प्रश्नं दास्यामि । सुसमृद्धानां ग्रामाणां का रक्षां करोति ।

(५) अरे रथ्या । (६) अरे नहि नहि ।

(७) भवतु संशये पतितोऽस्मि । (८) भवतु चारुदत्तं पुनरपि प्रक्ष्यामि ।

(९) अरे दास्याः पुत्र सेना । (१०) अरे द्वे अप्येकस्मिन् कृत्वा शीघ्रं भण ।

(११) सेनावसन्ते । (१२) ननु परिवर्त्य भण ।

(१३) अरे मूर्ख बटुक पदे परिवर्तय ।

(१४) अरे मूर्ख अक्षरपदे परिवर्तय ।

मैत्रेयः। (विचिन्त्य) वसन्तसेणा।

कुम्भीलकः। एशा शा आअदा।

मैत्रेयः। ता जाव चारुदत्तस्स णिवेदेमि। (उपसृत्य) भो **चारुदत्त** धणिओ दे आअदो।

चारुदत्तः। कुतोऽस्मत्कुले धनिकः।

मैत्रेयः। जइ कुले णत्थि ता दुवारे अत्थि। एसा **वसन्तसेणा आअदा**।

चारुदत्तः। वयस्य किं मां प्रतारयसि।

मैत्रेयः। जइ मे वअणे ण पत्तिआअसि ता एदं **कुम्भीलअं पुच्छ**। अरे दासीए उत्ता कुम्भीलआ उवसप्प।

कुम्भीलकः। (उपसृत्य) अज्ज वन्दामि।

चारुदत्तः। भद्र स्वागतम्। कथय सत्यं प्राप्ता वसन्तसेना।

कुम्भीलकः। एशा आअदा वशन्तशेणा।

चारुदत्तः। (सहर्षम्) भद्र न कदाचित् प्रियवचनं निष्फलीकृतं मया। तद् गृह्यतां पारितोषिकम्। (इत्युत्तरीयं प्रयच्छति।)

कुम्भीलकः (गृहीत्वा प्रणम्य सपरितोषम्) जाव अज्जआए णिवेदेमि।

(इति निष्क्रान्तः)

मैत्रेयः। भो अवि जाणासि किंणिमित्तं ईदिसे दुद्दिणे आअदेत्ति।

चारुदत्तः। वयस्य न सम्यगवधारयामि।

मैत्रेयः। मए जाणिदं। अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं

(१) वसन्तसेना। (२) एषा सागता।

(३) तद्यावच्चारुदत्ताय निवेदयामि। (४) भो चारुदत्त धनिकस्ते आगतः।

(५) यदि कुले नास्ति तद् द्वारेऽस्ति। एषा वसन्तसेनागता।

(६) यदि मे वचने न प्रत्ययसे तदिमं कुम्भीलकं पृच्छ। अरे दास्याः पुत्र कुम्भीलक उपसर्प। (७) आर्य वन्दे।

(८) एषा सागता वसन्तसेना। (९) यावदार्यायै निवेदयामि।

(१०) भो अपि जानासि किंनिमित्तमीदृशे दुर्दिन आगतेति।

(११) मया ज्ञातम्। अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डमिति न

त्ति ण परितुट्टा अवरं मग्गिदुं आअदा ।

चारुदत्तः । (स्वगतम्) परितुष्टा यास्यति ।

(ततः प्रविशत्युज्ज्वलाभिसारिकावेशेन वसन्तसेना सोत्कण्ठा छत्रधारिणी विटश्च ।)

विटः । (वसन्तसेनामुद्दिश्य ।)

अपद्मा श्रीरेषा प्रहरणमनङ्गस्य ललितं
कुलस्त्रीणां शोको मदनवरवृक्षस्य कुसुमम् ।
सलीलं गच्छन्ती रतिसमयलज्जाप्रणयिनी
रतिक्षेत्रे रङ्गे प्रियपथिकसार्थैरनुगता ॥१२

वसन्तसेने पश्य पश्य ।

गर्जन्ति शैलशिखरेषु विलम्बिबिम्बा
मेघा वियुक्तवनिताहृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वीज्यते मणिमयैरिव तालवृन्तैः ॥१३

अपि च । **पङ्कच्छिन्नमुखा पिबन्ति सलिलं धाराहता दर्दुराः**
कण्ठं मुञ्चति बर्हिणः समदनो नीपः प्रदीपायते ।
संन्यासः कुलदूषणैरिव जनैर्मेघैर्वृतश्चन्द्रमा
विद्युन्नीचकुलोद्गतेव युवतिर्नैकत्र संतिष्ठते ॥१४

वसन्तसेना । भाव सुट्ठु दे भणिदं । एधा हि

मूढे निरन्तरपयोधरया मयैव
कान्तः सहाभिरमते यदि किं तवात्र ।
मां गर्जितैरिति मुहुर्विनिवारयन्ती
मार्गं रुणद्धि कुपितेव निशासपत्नी ॥१५

विटः । भवत्वेवं तावत् । उपालभ्यतां तावदियम् ।

वसन्तसेना । भाव किमनया स्त्रीस्वभावदुर्विदग्धयोपालब्धया । पश्यतु

परितुष्टापरं याचितुमागता । (१) भाव सुष्ठु त्वया भणितम् ।

भावः ।

मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा ।
गणयन्ति न शीतोष्णं रमणाभिमुखाः स्त्रियः ॥१६

विटः । वसन्तसेने पश्य पश्य । अयमपरः

पवनचपलवेगः स्थूलधाराशरौघः
स्तनितपटहनादः स्पष्टविद्युत्पताकः ।
हरति करसमूहं खे शशाङ्कस्य मेघो
नृप इव पुरमध्ये मन्दवीर्यस्य शत्रोः ॥१७

वसन्तसेना । एवं ण्णेदं । ता कधं एसो अवरो ।

एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरै-
र्गर्जद्भिः सतडिद्बलाकशबलैर्मेघैः सशल्यं मनः ।
तत्किं प्रोषितभर्तृवध्यपटहो हा हा हताशो बकः
प्रावट्प्रावृडिति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन् ॥१८

विटः । वसन्तसेने एवमेतत् । इदमपरं पश्य ।

बलाकापाण्डुरोष्णीषं विद्युदुल्लिप्तचामरम् ।
मत्तवारणसारूप्यं कर्तुकामभिवाम्बरम् ॥१९

वसन्तसेना । भाव पेक्ख पेक्ख ।

एतैरार्द्रतमालपत्रमलिनैरापीतसूर्यं नभो
वल्मीकाः शरताडिता इव गजाः सीदन्ति धाराहताः ।
विद्युत् काञ्चनदीपिकेव रचिता प्रासादसंचारिणी
ज्योत्स्ना दुर्बलभर्तृकेव वनिता प्रोत्सार्य मेघैर्हृता ॥२०

विटः । वसन्तसेने पश्य पश्य ।

एते हि विद्युद्गुणबद्धकक्षा गजा इवान्योन्यमभिद्रवन्तः ।
शक्राज्ञया वारिधराः सधारा गां रूप्यरज्ज्वेव समुद्धरन्ति ॥२१

अपि च पश्य । महावाताध्मातैर्महिषकुलनीलैर्जलधरै-
श्चलैर्विद्युत्पक्षैर्जलधिभिरिवान्तःप्रचलितैः ।

(१) एवं न्विदं तत्कथमेषोऽपरः । (२) भाव प्रेक्षस्व प्रेक्षस्व

इयं गन्धोद्दामा नवहरितशष्पाङ्कुरवती
धरा धारापातैर्मणिमयशरैर्भिद्यत इव ॥२२

वसन्तसेना । भाव[1] एसो अवरो ।

एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः
प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः ।
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः
कुर्वन्नम्बुनमेचका इव दिशो मेघः समुत्तिष्ठते ॥२३

विटः । एवमेतत् । तथा हि पश्य ।

निष्पन्दीकृतपद्मषण्डनयनं नष्टक्षपावासरं
विद्युद्भिः क्षणदृष्टनष्टतिमिरं प्रच्छादिताशामुखम् ।
निश्चेष्टं स्वपितीव संप्रति पयोधारागृहान्तर्गतं
स्फीताम्भोधरधाम नैकजलदच्छत्रापिधानं जगत् ॥२४

वसन्तसेना । भाव[2] एव्वं णेदं । ता पेक्ख पेक्ख ।

गता नाशं तारा उपकृतमसाधाविव जने
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः ।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥२५

अपि च पश्य ।

उन्नति नमति वर्षति गर्जति मेघः करोति तिमिरौघम् ।
प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि ॥२६

विटः । एवमेतत् ।

विद्युद्भिर्ज्वलतीव संविहसतीवोच्चैर्बलाकाशतै-
र्मोहेनेव विवल्गतीव धनुषा धाराशरोद्गारिणा ।
विस्पष्टाशनिनिस्वनेन रसतीवाघूर्णतीवानिलै-
र्नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥२७

(१) भाव एषोऽपरः । (२) भाव एवं न्विदम् । तत्प्रेक्षस्व प्रेक्षस्व ।

वसन्तसेना ।

जलधर निर्लज्जस्त्वं यन्मां दयितस्य वेश्म गच्छन्तीम् ।
स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि ॥२८

भोः शक्र । किं ते ह्यहं पूर्वरतिप्रसक्ता यत्त्वं नदस्यम्बुदसिंहनादैः ।
न युक्तमेतत्प्रियकाङ्क्षितायां मार्गं निरोद्धुं मम वर्षपातैः ॥२९

अपि च । यद्वदहल्याहेतोर्मृषा वदसि शक्र गौतमोऽस्मीति ।
तद्वन्ममापि दुःखं निरवेक्ष्य निवार्यतां जलदः ॥३०

अपि च । गर्ज वा वर्ष वा शक्र मुञ्च वा शतशोऽशनिम् ।
न शक्या हि स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति ॥३१
यदि गर्जति वारिधरो गर्जतु तन्नाम निष्ठुराः पुरुषाः ।
अयि विद्युत् प्रमदानां त्वमपि च दुःखं न जानासि ॥३२

विटः । भवति अलमलमुपालम्भेन । उपकारिणी तवेयम् ।

ऐरावतोरसि चलेव सुवर्णरज्जुः
शैलस्य मूर्ध्नि निहितेव सिता पताका ।
आखण्डलस्य भवनोदरदीपिकेय-
माख्याति ते प्रियतमस्य हि संनिवेशम् ॥३३

वसन्तसेना । भाव[1] एव्वं । तं जेव्व एदं गेहं ।

विटः । सकलकलाभिज्ञाया न किंचिदिह तवोपदेष्टव्यमस्ति । तथापि स्नेहः प्रलापयति । अत्र प्रविश्य कोपोऽत्यन्तं न कर्तव्यः ।

यदि कुप्यसि नास्ति रतिः कोपेन विनाथवा कुतः कामः ।
कुप्य च कोपय च त्वं प्रसीद च त्वं प्रसादय च कान्तम् ॥३४

भवत्वेवं तावत् । भो भो निवेद्यतामार्यचारुदत्ताय ।

एषा फुल्लकदम्बनीपसुरभौ काले वनोद्भासिते
कान्तस्यालयमागता समदना हृष्टा जलार्द्रालका ।
विद्युद्वारिदगर्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी
पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता ॥३५

(१) भाव एवम् । तदेवैतद्गेहम् ।

चारुदत्तः । (आकर्ण्य) वयस्य शायतां किमेतदिति ।

मैत्रेयः । [1]जं भवं आणवेदि । (वसन्तसेनामुपगम्य । सादरम्) [2]सोत्थि मोदीए ।

वसन्तसेना । [3]अज्ज वन्दामि । साअदं अज्जस्स । भाव एसा छत्तधारिआ भावस्स जेव्व भोदु ।

विटः । (स्वगतम्) अनेनोपानेय निपुणं प्रेषितोऽस्मि । (प्रकाशम्) एवं भवतु । भवति वसन्तसेने ।

साटोपकूटकपटानृतजन्मभूमेः शाठ्यात्मकस्य रतिकेलिकृतालयस्य ।
वेश्यापणस्य सुरतोत्सवसंग्रहस्य दाक्षिण्यपण्यसुखनिष्क्रय-
सिद्धिरस्तु ॥३६

(इति निष्क्रान्तः ।)

वसन्तसेना । [3]अज्ज मित्तेअ कहिं तुम्हाणं जूदिअरो ।

मैत्रेयः । (स्वगतम्) [4]ही ही भो । जूदिअरो त्ति भणन्तीए अलंकिदो पिअवअस्सो । (प्रकाशम्) भोदि एसो क्खु सुक्खरुक्खवाडिआए ।

वसन्तसेना । [3]अज्ज का तुम्हाणं सुक्खरुक्खवाडिआ वुच्चदि ।

मैत्रेयः । भोदि जहिं ण खाईअदिण पीईअदि ।

वसन्तसेना । (स्मितं करोति ।)

मैत्रेयः । [5]तेा पविसदु भोदी ।

वसन्तसेना । (जनान्तिकम्) [6]एत्थ पविसिअ किं मए भणिदव्वं ।

(१) यद्भवानाज्ञापयति । (२) स्वस्ति भवत्यै ।
(३) आर्ये वन्दे । स्वागतमार्यस्य । भाव एषा छत्रधारिका भौवस्यव भवतु ।
(४) आर्य मैत्रेय कुत्र युष्माकं द्यूतकरः ।
(५) ही ही भोः । द्यूतकर इति भणन्त्यालंकृतः प्रियवयस्यः । (६) भवति एष खलु शुष्कवृक्षवाटिकायाम् ।
(७) आर्ये का युष्माकं शुष्कवृक्षवाटिकोच्यते ।
(८) भवति यत्र न खाद्यते न पीयते । (९) तत् प्रविशतु भवती ।
(१०) अत्र प्रविश्य किं मया भणितव्यम् ।

चेटी । जूदिअर अवि सुहो दे पदोसो त्ति ।

वसन्तसेना । अवि पारइस्सं ।

चेटी । अवसरो जेव्व दे पारइस्सदि ।

मैत्रेयः । पविसदु भोदी ।

वसन्तसेना । (प्रविश्योपसृत्य च । पुष्पैस्ताडयन्ती) अइ जूदिअर अवि सुहो दे पदोसो ।

चारुदत्तः । (अवलोक्य) अये वसन्तसेना प्राप्ता । (सहर्षमुत्थाय) अयि प्रिये ।

सदा प्रदोषो मम याति जाग्रतः सदा च मे निःश्वसतो गता निशा ।
त्वया समेतस्य विशाललोचने ममाद्य शोकान्तकरः प्रदोषकः ॥३७

तत् स्वागतं भवत्यै । इदमासनम् । अत्रोपविश्यताम् ।

मैत्रेयः । इदं आसणं । उवविसदु भोदी ।

(वसन्तसेना नाट्येनासीना । सर्वे उपविशन्ति ।)

चारुदत्तः । वयस्य पश्य पश्य ।

वर्षोदकमुद्गिरता श्रवणान्तबिलम्बिना कदम्बेन ।
एकः स्तनोऽभिषिक्तो नृपसुत इव यौवराज्यस्थः ॥३८

तद्वयस्य क्लिन्ने वाससी वसन्तसेनायाः । अन्ये प्रधानवाससी समुपनीयेतामिति ।

मैत्रेयः । जं भवं आणवेदि ।

चेटी । अज्ज मित्तेअ चिट्ठ तुमं । अहं जेव्व अज्जअं सुस्सूसइस्सं ।

(तथा करोति ।)

मैत्रेयः । (अपवारितकेन) भो वअस्स पुच्छामि दाव तत्थभोदिं किं पि ।

---

(१) द्यूतकर अपि सुखस्ते प्रदोष इति । (२) अपि पारयिष्यामि ।
(३) अवसर एव ते पारयिष्यति । (४) प्रविशतु भवती ।
(५) अयि द्यूतकर अपि सुखस्ते प्रदोषः ।
(६) इदमासनम् । उपविशतु भवती । (७) यद्भवानाज्ञापयति ।
(८) आर्य मैत्रेय तिष्ठ त्वम् । अहमेवार्यां शुश्रूषयिष्यामि ।
(९) भो वयस्य पृच्छामि तावत्तत्रभवतीं किमपि ।

चारुदत्तः । एवं क्रियताम् ।

मैत्रेयः । (प्रकाशम्) [1]अध किंणिमित्तं उण ईदिसे पणट्ठचन्दालोए दुद्दिणअन्धआरे आअदा भोदी ।

चेटी । [2]अज्जए उज्जुओ बम्हणो ।

वसन्तसेना । [3]णं णिउणोत्ति भणाहि ।

चेटी । [4]ऐसा क्खु अजआ एवं पुच्छिदुं आअदा केत्तिअं ताए रअणावलीए मुल्लं त्ति ।

मैत्रेयः । (जनान्तिकम्) [5]भो भणिदं मए जधा अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं । ण परितुट्ठा अवरं मग्गिदुं आअदा ।

चेटी । [6]सा क्खु अजआए अत्तणकेरकेत्ति भणिअ जूदे हारिदा । सो अ सहिओ राआवच्छआरी ण आणीअदि कहिं गदोत्ति ।

मैत्रेयः । [7]भोदि मन्तिदं जेव्व मन्तीअदि ।

चेटी । [8]जाव सो अण्णेसीअदि ताव एदं जेव्व गेण्ह सुवण्णभण्डअं । (इति दर्शयति । मैत्रेयो विचारयति ।)

चेटी । [9]अदिमेत्तं अज्जो णिज्झाअदि । ता किं दिट्ठपुव्वो दे ।

मैत्रेयः । [10]भोदि सिप्पकुसलदाए ओबन्धेदि दिट्ठिं ।

चेटी । [11]अज्ज वञ्चिदोसि दिट्ठीए । तं जेव्व एदं सुवण्णभण्डअं ।

---

(१) अथ किंनिमित्तं पुनरीदृशे प्रणष्टचन्द्रालोके दुर्दिनान्धकार आगता भवती । (२) आर्ये ऋजुको ब्राह्मणः । (३) ननु निपुण इति भण ।

(४) एषा खल्वार्या एवं प्रष्टुमागता कियत्तस्या रत्नावल्या मूल्यमिति ।

(५) भो भणितं मया यथाल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डम् । न परितुष्टा परं याचितुमागता । (६) सा खल्वार्यया आत्मीयेति भणित्वा द्यूते हारिता । स च समिको राजापथ्यकारी न ज्ञायते कुत्र गत इति ।

(७) भवति मन्त्रितमेव मन्त्र्यते ।

(८) यावत्सोऽन्विष्यते तावदिदमेव गृहाण सुवर्णभाण्डम् ।

(९) अतिमात्रमार्यो निध्यायति । तत्किं दृष्टपूर्वं ते ।

(१०) भवति शिल्पकुशलतयाऽवबध्नाति दृष्टिम् ।

(११) आर्य वञ्चितोऽसि दृष्ट्या । तदेवेदं सुवर्णभाण्डम् ।

मैत्रेयः । (सहर्षम्) भो[1] वअस्स तं जेव्व एदं सुवण्णभण्डअं जं अम्हाणं गेहे चोरेहिं अवहदं ।

चारुदत्तः । वयस्य

योऽस्माभिश्चिन्तितो व्याजः कर्तुं न्यासप्रतिक्रियाम् ।
स एव प्रस्तुतोऽस्माकं किंतु सत्यं विडम्बना ॥३९

मैत्रेयः । भो[2] वअस्स सच्चं । सवामि बम्हण्णेण ।

चारुदत्तः । प्रियं नः प्रियम् ।

मैत्रेयः । (जनान्तिकम्) भो[3] पुच्छामि णं कुदो एदं समासादिदं त्ति ।

चारुदत्तः । को दोषः ।

मैत्रेयः । (चेट्या कर्णे) एँव्वं विअ[4] ।

चेटी । (मैत्रेयस्य कर्णे) एँव्वं विअ ।

चारुदत्तः । किमिदं कथ्यते । किं वयं बाह्याः ।

मैत्रेयः । (चारुदत्तस्य कर्णे) एँव्वं विअ[5] ।

चारुदत्तः । भद्रे सत्यं तदेवेदं सुवर्णभाण्डम् ।

चेटी । अज्ज[6] अध इं ।

चारुदत्तः । भद्रे न कदाचित्प्रियनिवेदनं निष्फलीकृतं मया । तद्गृह्यतां पारितोषिकमिदमङ्गुलीयकम् । (इत्यनङ्गुलीयकं हस्तमवलोक्य लज्जां नाटयति ।)

वसन्तसेना । (आत्मगतम्) अदो[7] जेव्व कामीअसि ।

चारुदत्तः । (जनान्तिकम्) भोः कष्टम् ।

धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।
यस्य प्रतीकारनिरर्थकत्वात् कोपप्रसादा विफलीभवन्ति ॥४०

---

(१) भो वयस्य तदेवेदं सुवर्णभाण्डं यदस्माकं गृहे चौरैरपहृतम् ।
(२) भो वयस्य सत्यं शपे ब्राह्मण्येन ।
(३) भोः पृच्छामि ननु कुत एतत् समासादितमिति ।
(४) एवमिव । (५) आर्य अथ किम् । (६) अत एव काम्यसे ।

अपि च । **पक्षविकलश्च पक्षी शुष्कश्च तरुः सरश्च जलहीनम् ।**
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥४१

अपि च ।

शून्यैर्गृहैः खलु समाः पुरुषा दरिद्राः कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः ।
यद्दृष्टपूर्वजनसङ्गमविस्मृतानामेवं भवन्ति विफलाः परितोषकालाः॥४२

मैत्रेयः । भो अलं अदिमेत्तं सन्तप्पिदेण । (प्रकाशं सपरिहासम्) भोदि समप्पीअदु ममकेरिआ ण्हाणसाडिआ ।

वसन्तसेना । अज्जचारुदत्त जुत्तं णेदं इमाए रअणावलीए इमं जणं तुलइदुं ।

चारुदत्तः । (सविलक्षस्मितम्) वसन्तसेने पश्य पश्य ।

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥४३

मैत्रेयः । हंहो किं भोदीए इध जेव्व सुविदव्वं ।

चेटी । (विहस्य) अज्ज मित्तेअ अदिमेत्तं दाणिं उज्जुअं अत्ताणं दंसेसि ।

मैत्रेयः । भो वअस्स एसो क्खु ओसारअन्तो विअ सुहोवविट्ठं जणं पुणो वि वित्थारिवारिधाराहिं पविट्ठो पज्जण्णो ।

चारुदत्तः । सम्यगाह भवान् ।

अमूर्हि भित्वा जलदान्तराणि पङ्क्तान्तराणीव मृणालसूच्यः ।
पतन्ति चन्द्रव्यसनाद्विमुक्ता दिवोऽश्रुधारा इव वारिधाराः ॥४४

अपि च ।

धाराभिरार्यजनचित्तसुनिर्मलाभिश्चण्डाभिरर्जुनशरप्रतिकर्कशाभिः ।
मेघाः स्रवन्ति बलदेवपटप्रकाशाः शक्रस्य मौक्तिकनिधानमिवोद्विरन्तः
प्रिये पश्य पश्य ।

(१) भो अलमतिमात्रसन्तापितेन ।(२)भवति समर्प्यतां मम स्नानशाटिका ।
(३) आर्य चारुदत्त युक्तं नेदमनया रत्नावल्येमं जनं तुलयितुम् ।
(४) हञ्जे किं भवत्येहैव सुप्तव्यम् ।
(५) आर्य मैत्रेय अतिमात्रमिदानीमृजुकमात्मानं दर्शयसि ।
(६) भो वयस्य एष खलूत्सारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारिवारिधाराभिः प्रविष्टः पर्जन्यः ।

एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः ।
एषाऽम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता
रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत् समालिङ्गति ॥४६

(वसन्तसेना श्रृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति ।)

चारुदत्तः । (स्पर्शं नाट्ययन् । प्रत्यालिङ्ग्य)

भो मेघ गम्भीरतरं नद त्वं तव प्रसादात् स्मरपीडितं मे ।
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम् ॥४७

मैत्रेयः । दासीए पुत्त दुद्दिण अणज्जो दाणिं सि तुमं । जे एव्वं भोदिं विज्जुआए भाआवेसि ।

चारुदत्तः । वयस्य नार्हस्युपालम्भुम् ।

वर्षशतमस्तु दुर्दिनमविरतधारं शतह्रदा स्फुरतु ।
अस्मद्विधदुर्ललभया यदहं प्रियया परिष्वक्तः ॥४८

अपि च वयस्य ।

धन्यानि तेषां खलु जीवितानि ये कामिनीनां गृहमागतानाम् ।
आर्द्राणि मेघोदकशीतलानि गात्राणि गात्रेषु परिष्वजन्ति ॥४९

प्रिये वसन्तसेने

स्तम्भेषु प्रचलितवेदिसंशयान्तं शीर्णत्वात्कथमपि धार्यते वितानम् ।
एषा च स्फुटितसुधाद्रवानुलेपात् संक्लिन्ना सलिलभरेण चित्रभित्तिः॥५०

(ऊर्ध्वमवलोक्य) अये इन्द्रधनुः । प्रिये पश्य पश्य ।

विद्युज्जिह्वेनेदं महेन्द्रचापोच्छ्रितायतभुजेन ।
जलधरविवृद्धहनुना विजृम्भितमिवान्तरिक्षेण ॥५१

तदेह्यभ्यन्तरमेव प्रविशावः । (इत्युत्थाय परिक्रामति ।)

तालीषु तारं विटपेषु मन्द्रं शिलासु रूक्षं सलिलेषु चण्डम् ।
संगीतवीणा इव ताड्यमानास्तालानुसारेण पतन्ति धाराः ॥५२

(इति निष्क्रान्ताः सर्वे ।)

दुर्दिनो नाम पञ्चमोऽङ्कः ।

---

(१)दास्याः पुत्र दुर्दिन अनार्य इदानीमसि त्वम् । यदेवं भवतीं विद्युता भीषयसि।

षष्ठोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी । [1]कधं अज्ज वि अज्जआ ण विबुज्झदि । भोदु पविसिअ पडिबोधइस्सं । (इति नाट्येन परिक्रामति । ततः प्रविशत्याच्छादितशरीरा प्रसुप्ता वसन्तसेना ।)

चेटी । (निरूप्य) [2]उत्थेदु उत्थेदु अज्जआ । पभादं संवुत्तं ।

वसन्तसेना । (प्रतिबुध्य) [3]कधं रत्ति जेव्व पभादं संवुत्तं ।

चेटी । [4]अम्हाणं एसो पभादो । अज्जआए उण रत्ति जेव्व ।

वसन्तसेना । [5]हञ्जे कहिं उण तुम्हाणं जूदिअरो ।

चेटी । [6]अज्जए वड्माणअं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो ।

वसन्तसेना । [7]किं समादिसिअ ।

चेटी । जीएहि रादीए पवहणं । वसन्तसेना गच्छदुत्ति ।

वसन्तसेना । [8]हञ्जे कहिं मए गन्तव्यं ।

चेटी । [9]अज्जए जहिं चारुदत्तो ।

वसन्तसेना । (चेटीं परिष्वज्य) [10][11]हञ्जे सुट्ठु ण णिज्झाइदो रादीए ता

---

(१) कथमद्याप्यार्या न विबुध्यते । भवतु प्रविश्य प्रतिबोधयिष्यामि ।

(२) उत्तिष्ठतूत्तिष्ठत्वार्या । प्रभातं संवृत्तम् ।

(३) कथं रात्रिरेव प्रभातं संवृत्तम् ।

(४) अस्माकमेष प्रभातः । आर्यायाः पुना रात्रिरेव ।

(५) हञ्जे कुत्र पुनर्युष्माकं द्यूतकरः ।

(६) आर्ये वर्धमानकं समादिश्य पुष्पकरण्डकं जीर्णोद्यानं गत आर्यचारुदत्तः । (७) किं समादिश्य ।

(८) योजय रात्रौ प्रवहणं वसन्तसेना गच्छत्विति ।

(९) हञ्जे कुत्र मया गन्तव्यम् । (१०) आर्ये यत्र चारुदत्तः ।

(११) हञ्जे सुष्ठु न निध्यातो रात्रौ तदद्य प्रत्यक्षं प्रेक्षिष्ये । हञ्जे किं प्रवि-

अज्ज पच्चक्खं पेक्खिस्सं। हञ्जे किं पविट्ठा अहं इह अब्भन्तरचदुस्सालअं।

चेटी। णं केवलं अब्भन्तरचदुस्सालअं सव्वजणस्स वि हिअअं पविट्ठा।

वसन्तसेना। अवि संतप्यदि चारुदत्तस्स परिअणो।

चेटी। सन्तप्पिस्सदि।

वसन्तसेना कदा।

चेटी। जदो अज्जआ गमिस्सदि।

वसन्तसेना। तदो मए पढमं सन्तप्पिदव्वं। (सानुनयम्) हञ्जे गेण्ह एदं रअणावलिं। मम बहिणिआए अज्जाधूदाए गदुअ समप्पेहि। भणिदव्वं च। अहं सिरिचारुदत्तस्स गुणणिज्जिदा दासी। तदा तुम्हाणं वि। ता एसा तुह जेव्व कण्ठाहरणं होदु रअणावली।

चेटी। अज्जए कुप्पिस्सदि चारुदत्तो अज्जाए दाव।

वसन्तसेना। गच्छ ण कुप्पिस्सदि।

चेटी। (गृहीत्वा) जं आणवेसि। (इति निष्क्रम्य पुनः प्रविशति।)

चेटी। अज्जए भणादि अजा धूदा। अज्जउत्तेण तुम्हाणं पसादीकदा ण जुत्तं मम एदं गेण्हिदुं। अज्जउत्तो जेव्व मम आहरणविसेसो त्ति जाणादु भोदी।

इदमिहाभ्यन्तरचतुःशालम्।

(१) न केवलमभ्यन्तरचतुःशालं सर्वजनस्यापि हृदयं प्रविष्टा।

(२) अपि संतप्यते चारुदत्तस्य परिजनः।

(३) संतप्स्यते। (४) कदा। (५) यदार्या गमिष्यति।

(६) तदा मया प्रथमं संतप्तव्यम्। (७) हञ्जे गृहाणेमां रत्नावलीम्। मम भगिन्या आर्याधूतायै गत्वा समर्पय। भणितव्यं च। अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी तदा युष्माकमपि। तदेषा तवैव कण्ठाभरणं भवतु रत्नावली।

(८) आर्ये कोपिष्यति चारुदत्त आर्यायै तावत्।

(९) गच्छ न कोपिष्यति। (१०) यदाज्ञापयसि।

(११) आर्ये भणति आर्या धूता। आर्यपुत्रेण युष्माकं प्रसादीकृता न युक्तमेनां ग्रहीतुम्। आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती।

(ततः प्रविशति दारकं गृहीत्वा रदनिका।)

रदनिका। एहि वच्छ सआडिआए कीलम्ह।

दारकः। (सकरुणम्) रेदणिए किं मम एदाए मट्टिआसआडिआए। तं जेव्व सोवण्णसआडिअं देहि।

रदनिका। (सनिर्वेदं निःश्वस्य) जाद कुदो अम्हाणं सुवण्णववहारो। तादस्स पुणो वि रिद्धीए सुवण्णसआडिआए कीलिस्ससि। (स्वगतम्) ता जाव विणोदेमि णं। अजआवसन्तसेणाए समीवं उवसप्पिस्सं। (उपसृत्य) अज्जए पणमामि।

वसन्तसेना। रेदणिए साअदं दे। कस्स उण अअं दारओ। अणलंकिदसरीरो वि चन्दमुहो आणन्देदि मम हिअअं।

रदनिका। एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम।

वसन्तसेना। (बाहू प्रसार्य) एहि मे पुत्तअ आलिङ्ग। (इत्यङ्के उपवेश्य) अणुकिदं अणेण पिदुणो रूवं।

रदनिका। णं केवलं रूवं सीलं पि तक्केमि। एदिणा अज्जचारुदत्तो अत्ताणअं विणोदेदि।

वसन्तसेना। अध किंणिमित्तं एसो रोअदि।

(१) एहि वत्स शकटिकया क्रीडावः।

(२) रदनिके किं ममैतया मृत्तिकाशकटिकया। तामेव सुवर्णशकटिकां देहि। (३) जात कुतोऽस्माकं सुवर्णव्यवहारः। तातस्य पुनरपि ऋद्धया सुवर्णशकटिकया क्रीडिष्यसि। (४) तद्यावद्विनोदयाम्येनम्। आर्याया वसन्तसेनायाः समीपमुपसर्पिष्यामि। (५) आर्ये प्रणमामि।

(६) रदनिके स्वागतं ते। कस्य पुनरयं दारकः। अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

(७) एष खल्वार्यचारुदत्तस्य पुत्रो रोहसेनो नाम।

(८) एहि मे पुत्रक आलिङ्ग। (९) अनुकृतमनेन पितुः रूपम्।

(१०) न केवलं रूपं शीलमपि तर्कयामि। एतेनार्यचारुदत्त आत्मानं विनोदयति।

(११) अथ किंनिमित्तमेष रोदिति।

रदनिका । एदिणा पडिवेसिअगहवइदारअक्केरिआए सुवण्णसअडिआए कीलिदं । तेण अ सा णीदा । तदो उण तं मग्गन्तस्स मए इअं मट्टिआसअडिआ कदुअ दिण्णा । तदो भणादि रदणिए किं मम एदाए मट्टिआसअडिआए । तं जेव्व सोवण्णसडिअं देहि त्ति ।

वसन्तसेना । हैद्धी हद्धी । अअं पि णाम परसंपत्तीए संतप्पदि । भअवं कअन्त पोक्खरवत्तपडिदजलबिन्दुसरिसेहिं कीलसि तुमं पुरिसभाअधेएहिं । (इति साश्रु) जाद मा रोद । सोवण्णसअडिआए कीलिस्ससि ।

दारकः । रैदणिए का एसा ।

वसन्तसेना । दे पिदुणो गुणणिज्जिदा दासी ।

रदनिका । जाद अज्जआ दे जणणी भोदि ।

दारकः । रैदणिए अलिअं तुमं भणासि । जइ अम्हाणं अज्जआ जणणी ता कीस अलंकिदा ।

वसन्तसेना । जाद मुद्धेण मुद्देण अदिकरुणं मन्तेसि । (नाट्येनामरणान्यवतार्य रुदती) एसा दाणिं दे जणणी संवुत्ता । ता गेण्ह एदं अलंकारअं सोवण्णसअडिअं घडावेहि ।

(१) एतेन प्रातिवेशिकगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम् । तेन च सा नीता । ततः पुनस्तां याचमानस्य मयेयं मृत्तिकाकटिका कृत्वा दत्ता । ततो भणति रदनिके किं ममैतया मृत्तिकाशटिकया । तामेव सुवर्णशकटिकां देहीति ।

(२) हा धिक् हा धिक् । अयमपि नाम परसंपत्त्या संतप्यते । भगवन् कृतान्त पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः ।

(३) जात मा रुदिहि । सुवर्णशकटिकया क्रीडिष्यसि ।

(४) रदनिके कैषा । (५) पितुस्ते गुणनिर्जिता दासी ।

(६) जात आर्या ते जननी भवति ।

(७) रदनिके अलीकं त्वं भणसि । यद्यस्माकार्या जननीं तत्किमर्थमलंकृता ।

(८) जात मुग्धेन मुखेनातिकरुणं मन्त्रयसे । (९) एवादानीं ते जननी संवृत्ता । तद्गृहाणैतमलंकारम् । सुवर्णशकटिकां कारय ।

दारकः । अवेहि[1] । ण गेण्हिस्सं । रोदसि तुमं ।

वसन्तसेना । (अश्रूणि प्रमृज्य) जाद[2] न रोदिस्सं । गच्छ कील । (**अलकारैर्मृच्छकटिकां पूरयित्वा**) जाद[3] कारेहि सोवण्णसअडिअं । (**इति दारकमादाय निष्कान्ता रदनिका ।**)

(प्रविश्य प्रवहणाधिरूढः)

वर्धमानकः । लंदणिए[4] लदणिए णिवेदेहि अज्जआए वशन्तशेणाए । **ओहालिअं पक्खदुआलए शज्जं पवहणं चिट्ठदि** ।

(प्रविश्य) **रदनिका** । अज्जए[5] एसो वड्ढमाणओ विण्णवेदि **पक्खदुआरए सज्जं पवहणं त्ति** ।

वसन्तसेना । हंजे[6] चिट्ठदु मुहुत्तअं जाव अहं अत्ताणअं पसाधेमि ।

रदनिका । (निष्क्रम्य) वड्ढमाणआ चिट्ठ मुहुत्तअं जाव **अज्जआ अत्ताणअं पसाधेदि** ।

वर्धमानकः । ही[7] ही भो । मए वि जाणत्थलके विशुमलिदे । ता जाव गेण्हिअ आअच्छामि । एदे णश्शालज्जुकडुआ बद्दला । **भोदु भोदु** । पवहणेण जेव्व गदागदि कलिश्शं । (इति निष्क्रान्तो वर्धमानकः ।)

वसन्तसेना । हंजे[8] उवणेहि मे पसाहणं । अत्ताणअं **पसाधइस्सं** । (**इति प्रसाधयन्ती स्थिता** ।)

---

(१) अपेहि न ग्रहीष्यामि । रोदिषि त्वम् ।

(२) जात न रोदिष्यामि । गच्छ क्रीड । (३) जात कारय सुवर्णशकटिकाम् ।

(४) रदनिके रदनिके निवेदयार्यायै वसन्तसेनायै अपवारितं **पक्षद्वारके सज्ज प्रवहणं तिष्ठति** ।

(५) आर्ये एष वर्धमानको विज्ञापयति पक्षद्वारे सज्जं प्रवहणमिति ।

(६) हञ्जे तिष्ठतु मुहूर्तं[9] यावदहमात्मानं प्रसाधयामि ।

(७) वर्धमानक तिष्ठ मुहूर्तं यावदार्यात्मानं प्रसाधयति ।

(८) ही ही भोः । मयापि यानास्तरकं विस्मृतम् । तद्यावद्गृहीत्वागच्छामि । एतौ नासिकारज्जुकटुकौ बलीवर्दौ । भवतु । **प्रवहणेनैव गतागतिं करिष्यामि** ।

(९) **हञ्जे उपनय मे प्रसाधनम् । आत्मानं प्रसाधयिष्यामि** ।

(प्रविश्य प्रवहणाधिरूढः) स्थावरकश्चेटः। [1]आणत्तम्हि लाअशाल-अशण्ठाणेण। थावलआ पवहणं गेण्हिअ पुप्फकलण्डअं जिण्णुज्जाणं तुलिदं आअच्छेहि त्ति। भोदु तहिं जेव्व गच्छामि। वहध वहल्ला वहध। (परिक्रम्यावलोक्य च) [2]कधं गामशअलेहिं लुद्धे मग्गे। किं दाणिं एत्थ कलइस्सं। (साटोपम्) [3]अले अले ओशलध ओशलध। (आकर्ण्य) [4]किं भणाध। एशे कश्शकेलके पवहणे त्ति। एशे लाअशालअशण्ठाणकेलके पवहणेत्ति। ता शिग्घं ओशलध। (अवलोक्य) [5]कधं एशे अवले शहिअं विअ मं पेक्खिअ शहश जेव्व जूदपलाइदे विअ जूदिअले ओहालिअ अत्ताणअं अप्पदो अवक्कन्ते। ता के उण एशे। अधवा किं मम एदिणा। तुलिदं गमिश्शं। अले अले गामेलुआ ओशलध ओशलध। किं भणाध मुहुत्तअं चिट्ठ चक्कपलिवट्टिं देहि त्ति। अले अले लाअशालअशण्ठाणकेलके हगे शूले चक्कपलिवट्टिं दइश्शं। अधवा एशे एआई तवश्शी। ता एव्वं कलेमि। एदं पवहणं अज्जचालुदत्तश्श लुक्खवाडिआए पक्खदुआलऐ थावेमि। (इति प्रवहणं संस्थाप्य) [6]ऐशेम्हि आअदे। (इति निष्क्रान्तः।)

चेटी। [7]अज्जए णेमिसद्दो विअ सुणीअदि। ता आअदो पवहणो।

---

(१) आज्ञप्तोऽस्मि राजश्यालकसंस्थानेन स्थावरक प्रवहणं गृहीत्वा पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छेति। भवतु तत्रैव गच्छामि। वहतं बलीवर्दौ वहतम्। (२) कथं ग्रामशकटै रुद्धो मार्गः। किमिदानीमत्र करिष्यामि। (३) अरे रे अपसरतापसरत। (४) किं भणथ एतत् कस्य प्रवहणमिति। एतद्राजश्यालकसंस्थानस्य प्रवहणमिति। तच्छीघ्रमपसरत। (५) कथमेषोऽपरःसभिकमिव मां प्रेक्ष्य सहसैव द्यूतपलायित इव द्यूतकरोऽपवार्यात्मानमन्यतोऽपक्रान्तः। तत्कः पुनरेषः। अथवा किं ममैतेन। त्वरितं गमिष्यामि। अरे रे ग्राम्या अपसरत। किं भणथ। मुहूर्तं तिष्ठ चक्रपरिवर्तनं देहीति। अरे रे राजश्यालकसंस्थानस्याहं शूरः। चक्रपरिवृत्तिं दास्यामि। अथवैष एकाकी तपस्वी। तदेवं करोमि। एतत्प्रवहणमार्यचारुदत्तस्य वृक्षवाटिकायाः पश्चद्वारके स्थापयामि। (६) एषोऽस्म्यागतः।

(७) आर्ये नेमिशब्द इव श्रूयते। तदागतं प्रवहणम्।

वसन्तसेना। [1]हञ्जे गच्छ तुवरदि मे हिअअं। ता आदेसेहि पक्खदुआरअं।

चेटी। [2]ऐदु एदु अज्जआ।

वसन्तसेना। (परिक्रम्य) [3]हञ्जे वीसम तुमं।

चेटी। [4]जं अज्जआ आणवेदि। (इति निष्क्रान्ता।)

वसन्तसेना। (दक्षिणाक्षिस्पन्दं सूचयित्वा प्रवहणमधिरुह्य च) [5]किं ण्णेदं। फुरदि दाहिणं लोअणं। अधवा चारुदत्तस्स ज्जेव्व दंसणं अणिमित्तं पमज्जिस्सदि।

(प्रविश्य) **स्थावरकश्चेटः**। [6]ओशालिदा मए शअडा। ता जाव गच्छामि (इति नाट्येनाधिरुह्य चालयित्वा स्वगतम्) [7]भालिके पवहणे। अधवा चक्कपलिवट्टिआए पलिस्शन्तश्श भालिके पवहणे पडिभाशेदि। भोदु गमिस्शं। जाध गोणा जाध।

(नेपथ्ये) [8]अरे रे दोवारिआ अप्पमत्ता सएसु सएसु गुम्मट्ठाणेसु होध। एसो अज्ज गोवालदारओ गुत्तिअं भञ्जिअ गुत्तिवालिअं वावादिअ बन्धणं मेदिअ परिब्भट्टो अवक्कमदि। ता गेण्हध गेण्हध।

(प्रविश्यापटीक्षेपेण संभ्रान्त एकचरणलग्ननिगडोऽवगुण्ठित आर्यकः परिक्रामति)

---

(१) हञ्जे गच्छ। त्वरते मे हृदयम्। तदादिश पक्षद्वारम्।

(२) एत्वेत्वार्या। (३) हञ्जे विश्राम्य त्वम्। (४) यदार्याज्ञापयति।

(५) किं न्विदम्। स्फुरति दक्षिणं लोचनम्। अथवा चारुदत्तस्यैव दर्शनमनिमित्तं प्रमार्जयिष्यति।

(६) अपसारिता मया शकटाः। तद्यावद् गच्छामि। (७) भारवत् प्रवहणम्। अथवा चक्रपरिवृत्त्या परिश्रान्तस्य भारवत् प्रवहणं प्रतिभासते। भवतु गमिष्यामि। यातं गावौ यातम्।

(८) अरे रे दौवारिका अप्रमत्ताः स्वेषु स्वेषु गुल्मस्थानेषु भवत। एषोऽद्य गोपालदारको गुप्तिं भङ्क्त्वा गुप्तिपालकं व्यापाद्य बन्धनं भित्त्वा परिभ्रष्टोऽपक्रामति। तद्गृह्यतां गृह्यताम्।

स्थावरकः। (स्वगतम्)। मैहन्ते णअलीए शम्भमे उप्पण्णे। ता तुलिदं तुलिदं गमिश्शं। (इति निष्क्रान्तः।)

आर्यकः।

हित्वाहं नरपतिबन्धनापदेशव्यापत्तिव्यसनमहार्णवं नराणाम्।
पादाम्रस्थितनिगडैकपाशकर्षी प्रभ्रष्टो गज इव बन्धनाद्धमामि ॥१

भो अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे बन्धनेन बद्धः। तस्माच्च प्रियसृहृच्छविलकप्रसादेन बन्धनात्परिभ्रष्टोऽस्मि। (अश्रूणि विसृज्य)

भाग्यानि मे यदि तदा मम कोऽपराधो
यद्वन्यनाग इव संयमितोऽस्मि तेन।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या
गम्यो नृपो बलवता सह को विरोधः ॥२

तत्कुत्र गच्छामि मन्दभाग्यः। (विलोक्य) इदं कस्यापि साधोरनावृतपक्षद्वारं गेहम्।

इदं गृहं भिन्नमनायतार्गलं विशीर्णसन्धिश्च महाकपाटः।
ध्रुवं कुटुम्बी व्यसनाभिभूतां दशां प्रपन्नो मम तुल्यभाग्यः ॥३
तदत्र तावत्प्रविश्य तिष्ठामि।

(नेपथ्ये) जोध गोणा जाध।

आर्यकः। (आकर्ण्य) अये प्रवहणमित एवाभिवर्तते।

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा तदभिगमनोपस्थितमिदम्।
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा-
द्विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥४

(ततः प्रवहणेन सह प्रविश्य)

---

(१) महान् नगर्यां संभ्रम उत्पन्नः। तत्त्वरितं त्वरितं गमिष्यामि।
(२) यातं गावौ यातम्।

वर्धमानकश्चेटः । [1]हीमाणहे । आणीदे मए जाणत्थलके । लदणिव णिवेदेहि अज्जआए वशन्तशेणाए अवत्थिदे शज्जे पवहणे । अहिलुहिअ पुप्फकलण्डअं जिण्णुज्जाणं गच्छदु अज्जआ ।

आर्यकः । (आकर्ण्य) गणिकाप्रवहणमिदं बहिर्यानं च । भवत्व-धिरोहामि । (इति स्वैरमुपसर्पति ।)

वर्धमानकः । (श्रुत्वा) [2]कधं णेउलशद्दे । ता आअदा क्खु अज्जआ । अज्जए इमे नश्शाकडुआ दइल्ला । ता पिट्टदो जेव्व आलुहदु अज्जआ । (आर्यकस्तथा करोति ।)

वर्धमानकः । [3]पादुप्फालचालिदाणं णेउलाणं वीशन्तो शद्दो । भलक्कन्ते अ पवहणे । तधा तक्केमि शम्पदं अज्जआए आलूढाए होदव्वं । ता गच्छामि । जाध गोणा जाध । (इति परिक्रामति ।)

(प्रविश्य) **वीरकः** । [4]अरे रे अरे जअ-जअमाण-चन्दणअ-मङ्गल-फुल्लभद्द-प्पमुहा

किं अच्छध वीसद्धा जो सो गोवालदारओ रुद्धो ।
भेत्तूण समं वच्चइ णरवइहिअअं च बन्धणं चावि ।।५

अले पुरत्थिमे पदोलीदुआरे चिट्ठ तुमं । तुमं पि पच्छिमे । तुमं पि

(१) हीमाणहे । आनीतं मया यानास्तरकम् । रदनिके निवेदयार्यायै वसन्तसेनायै । अवस्थितं सज्जं प्रवहणम् । अधिरुह्य पुष्पकरण्डकं जीर्णोद्यानं गच्छत्वार्या ।

(२) कथं नूपुरशब्दः । तदागता खल्वार्या । आर्ये इमौ नासिकारज्जु-कट्ठकौ बलीवर्दौ । तत्पृष्ठत एवारोहत्वार्या ।

(३) पादोत्कालचालितानां नूपुराणां विश्रान्तः शब्दः । भाराक्रान्तं च प्रवहणम् । तथा तर्कयामि सांप्रतमार्ययारूढया भवितव्यम् । तद्गच्छामि । यातं गावौ यातम् ।

(४) अरे रे अरे जय-जयमान-चन्दनक-मङ्गल-पुष्पभद्र-प्रमुखाः ।
किं स्थ विश्रब्धा यः स गोपालदारको रुद्धः ।
भित्वा समं व्रजति नरपतिहृदयं च बन्धनं चापि ॥
अरे पुरस्तात् प्रतोलीद्वारे तिष्ठ त्वम् । त्वमपि पश्चिमे । त्वमपि दक्षिणे ।

दक्खिणे । तुमं पि उत्तरे । जो वि एसो पाआरखण्डो एदं अहिरुहिअ चन्दणेण समं गदुअ अवलोएमि । एहि चन्दणअ एहि । इदो दाव ।

(प्रविश्य संभ्रान्तः) चन्दनकः । अरे रे वीरअ-विसल्ल-भीमङ्गअ-दण्ड-कालअ-दण्डसूरप्पमुहा ।

आअच्छध वीसत्था तुरिअं जत्तेह लहुं करेज्जाह ।
लच्छी जेण ण रण्णो पहवइ गोत्तन्तरं गन्तुं ॥६

अवि अ। उज्जाणेसु सहासु अ मग्गे णअरीएँ आवणे घोसं ।
तं तं जोहह तुरिआ सङ्का वा जाअए जत्थ ॥७
रे रे वीरअ किं किं दरिसेसि भणाहि दाव वीसत्थं ।
भेत्तूण अ बन्धणअं को सो गोवालदारअं हरइ ॥८
कस्सट्ठमो दिणअरो कस्स चउत्थो अ वट्टए चन्दो ।
छट्ठो अ भग्गवगहो भूमिसुओ पञ्चमो कस्स ॥९
भण कस्स जम्मछट्ठो जीवो णवमो तहेअ सूरसुओ ।
जीअन्ते चन्दणए को सो गोवालदारअं हरइ ॥१०

स्विमप्युत्तरे । योप्येष प्राकारखण्ड एतमधिरुह्य चन्दनेन समं गत्वावलोकयामि । एहि चन्दनक एहि । इतस्तावत् ।

(१) अरे रे वीरक-विशल्य-भीमाङ्गद-दण्डकाल-दण्डशूरप्रमुखाः ।
आगच्छत विश्वस्तास्त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥

अपि च । उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे ।
तं तमन्वेषयत त्वरितं शङ्का वा जायते यत्र ॥
रे रे वीरक किं किं दर्शयसि भण तावद्विश्रब्धम् ।
भित्त्वा च बन्धनकं कः स गोपालदारकं हरति ॥
कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्तते चन्द्रः ।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य ॥
भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः ।
जीवति चन्दनके कः स गोपालदारकं हरति ॥

वीरकः । भंड चन्दणआ

अवहरइ कोवि तुरिअं चन्दणअ सवामि तुज्झ हिअएण ।
जह अद्धुइदिणअरे गोवालअदारओ खुडिदो ॥११

वर्धमानकः । जाध गोणा जाध ।

चन्दनकः । (दृष्ट्वा) अरे रे पेक्ख पेक्ख ।

ओहाडिओ पवहणो वच्चइ मज्झेण राअमग्गस्स ।
एदं ताव विआरह कस्स कहिं पवसिओ पवहणो ॥१२

वीरकः । (अवलोक्य) अरे पवहणवाहआ मा दाव एदं पवहणं वाहेहि । कस्सकेरकं एदं पवहणं । को वा इध आरूढो । कहिं वा वच्चदि ।

वर्धमानकः । एसे क्खु पवहणे अज्जचालुदत्ताहकेलके । इध अज्जआ वशन्तशेणा आरूढा । पच्छाणं पुप्फकलण्डअं जिण्णुजाणं कीलिदुं चालुदत्तश्श णीअदि ।

वीरकः । (चन्दनकमुपसृत्य) एसो पवहणवाहओ भणादि । अज्ज चालुदत्तस्स पवहणं । वसन्तसेणा आरूढा । पुप्फकरण्डअं जिण्णुज्जाणं णीअदि त्ति ।

---

(१) भट चन्दनक ।

अपहरति कोऽपि त्वरितं चन्दनक शपे तव हृदयेन ।
यथार्धोदितदिनकरे गोपालकदारकः खुटितः ॥

(२) यातं गावौ यातम् । (३) अरे रे पश्य पश्य ।

अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य ।
एतं तावद्विचारय कस्य कुत्र प्रोषितं प्रवहणमिति ॥

(४) अरे प्रवहणवाहक मा तावदेतत् प्रवहणं वाहय । कस्यैतत् प्रवहणम् । को वेहारूढः । कुत्र वा व्रजति ।

(५) एतत् खलु प्रवहणमार्यचारुदत्तस्य । इहार्या वसन्तसेनारूढा । प्रस्थानं पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य नीयते ।

(६) एष प्रवहणवाहको भणति । आर्यचारुदत्तस्य प्रवहणम् वसन्तसेनारूढा पुष्पकरण्डकं जीर्णोद्यानं नीयत इति ।

चन्दनकः। [1]ता गच्छदु।

वीरकः। [2]अणवलोइदो जेव्व।

चन्दनकः। [3]अध इं।

वीरकः। [4]कस्स पच्चएण।

चन्दनकः। [5]अज्जचारुदत्तस्स।

वीरकः। [6]को अज्जचारुदत्तो। का वा वसन्तसेणा। जेण अणवलोइदं वच्चदि।

चन्दनकः। [7]अरे अज्जचारुदत्तं ण जाणसि। ण वा वसन्तसेणिअं। जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण जाणासि ता गअणे जोण्हासहिदं चन्दं पि तुमं ण जाणासि।

को तं गुणारविन्दं सीलमिअङ्कं जणो ण जाणादि।
आवण्णदुक्खमोक्खं चउसाअरसारअं रअणं ॥१३
दो जेव्व पूअणीआ इह णअरीए तिलअभूदा अ।
अज्जा वसन्तसेणा धम्मणिही चारुदत्तो अ ॥१४

वीरकः। [8]अरे चन्दणआ।

जाणामि चारुदत्तं वसन्तसेणं च सुट्ठु जाणामि।

---

(१) तद्गच्छतु। (२) अनवलोकित एव। (३) अथ किम्।

(४) कस्य प्रत्ययेन। (५) आर्यचारुदत्तस्य।

(६) क आर्यचारुदत्तः। का वा वसन्तसेना। येनानवलोकितं व्रजति।

(७) अरे आर्यचारुदत्तं न जानासि। न वा वसन्तसेनाम्। यद्यार्यचारुदत्तं वसन्तसेनां वा न जानासि तदा गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि।

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति।
आपन्नदुःखमोक्षं चतुःसागरसारं रत्नम्॥
द्वावेव पूजनीयाविह नगर्यां तिलकभूतौ च।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च॥

(८) अरे चन्दनक। जानामि चारुदत्तं वसन्तसेनां च सुष्ठु जानामि।
प्राप्ते च राजकार्ये पितरमप्यहं न जानामि॥

पत्ते अ राअकज्जे पिअरं पि अहं ण जाणामि ॥१५

आर्यकः । (स्वगतम्) अयं मे पूर्ववैरी । अयं मे पूर्वबन्धुः । यतः

एककार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥१६

चन्दनकः । तुमं[1] तन्तिलो सेणावई रण्णो पच्चइदो । एदे धारिदा मए बइल्ला । अवलोएहि ।

वीरकः । तुमं[2] पि रण्णो पच्चइदो बलवई । ता तुमं जेव्व अवलोएहि ।

चन्दनकः । मए[3] अवलोइदं तुए अवलोइदं भोदि ।

वीरकः । जं[4] तुए अवलोइदं तं रण्णा पालएण अवलोइदं ।

चन्दनकः । अरे[5] उण्णामेहि धुरं । (चेटस्तथा करोति ।)

आर्यकः । (स्वगतम्) अपि रक्षिणो मामवलोकयन्ति । अशस्त्रश्चास्मि मन्दभाग्यः । अथवा

भीमस्यानुकरिष्यामि बाहुः शस्त्रं भविष्यति ।
वरं व्यायच्छतो मृत्युर्न गृहीतस्य बन्धने ॥१७

अथवा साहसस्य तावदनवसरः ।

(चन्दनकः नाट्येन प्रवहणमारुह्यावलोकयति ।)

आर्यकः । शरणागतोऽस्मि ।

चन्दनकः । (संस्कृतमाश्रित्य) अभयं शरणागतस्य ।

आर्यकः ।

त्यजति किल तं जयश्रीर्जहति च मित्राणि बन्धुवर्गश्च ।
भवति च सदोपहास्यो यः खलु शरणागतं त्यजति ॥१८

---

(१) त्वं तन्त्रिलः सेनापती राज्ञः प्रत्ययितः । एतौ धारितौ मया बलीवर्दौ । अवलोकय ।

(२) त्वमपि राज्ञः प्रत्ययितो बलपतिः । तस्मात्त्वमेवावलोकय ।

(३) मयावलोकितं त्वयावलोकितं भवति ।

(४) यत्त्वयावलोकितं तद्राज्ञा पालकेनावलोकितम् ।

(५) अरे उन्नामय धुरम् ।

चन्दनकः । कधं अज्जओ गोवालदारओ सेणवित्तासिदो विअ पत्तरहो साउणिअस्स हत्थे णिवडिदो । (विचिन्त्य) एसो अणवराधो सरणाअदो । अज्जचारुदत्तस्स पवहणं आरूढो । पाणप्पदस्स मे अज्जसव्विलअस्स मित्तं । अण्णदो राअणिओओ । ता किं दाणिं एत्थ जुत्तं अणुट्ठिदुं । अधवा जं भोदु तं भोदु । पढमं जेव्व अभअं दिण्णं ।

[3]भीदाभअप्पदाणं देन्तस्स परोवआररसिअस्स ।
जइ होइ होउ णासो तह वि अ लोए गुणो जेव्व ॥१९

(सभयमवतीर्य)[4]दिट्ठो अज्जो (इत्यद्धोक्ते)[5]ण । अज्जआ वसन्तसेणा । तदो एसा भणादि जुत्तं णेदं सरिसं णेदं जं अहं अज्जचारुदत्तं अहिसारिदुं गच्छन्ती राअमग्गे परिभूदा ।

वीरकः । [6]चन्दणआ एत्थ मह संसओ समुप्पण्णो ।

चन्दनकः । [7]कधं दे संसओ ।

वीरकः । [8]सम्भमघग्घरकण्ठो तुमं पि जादोसि जं तुए भणिदं ।
दिट्ठो मए क्खु अज्जो पुणो वि अज्जा वसन्तसेणे त्ति ॥२०

एत्थ मे अप्पच्चयो ।

(१) कथमार्यको गोपालदारकः श्येनवित्रासित इव पत्ररथः शाकुनिकस्य हस्ते निपतितः । (२) एषोऽनपराधः शरणागतः । आर्यचारुदत्तस्य प्रवहण-मारूढः । प्राणप्रदस्य मे आर्यशर्विलकस्य मित्रम् । अन्यतो राजनियोगः । तत्किमिदानीमत्र युक्तमनुष्ठातुम् । अथवा यद्भवतु तद्भवतु । प्रथमेवाभयं दत्तम् । (३) भीताभयप्रदानं ददतः परोपकाररसिकस्य ।
यदि भवति भवतु नाशस्तथापि च लोके गुण एव ॥
(४) दृष्ट आर्यः । (५) न । आर्या वसन्तसेना । तत एषा भणति युक्तं नेदं सदृशं नेदं यदहमार्यचारुदत्तमभिसर्तुं गच्छन्ती राजमार्गे परिभूता ।
(६) चन्दनक अत्र मे संशयः समुत्पन्नः । (७) कथं ते संशयः ।
(८) संभ्रमघर्घरकण्ठस्त्वमपि जातोऽसि यत्त्वया भणितम् ।
दृष्टो मया खल्वार्यः पुनरप्यार्या वसन्तसेनेति ॥
अत्र मेऽप्रत्ययः ।

चन्दनकः । [१]अरे को अप्पच्चओ तुह । वअं दक्खिणत्ता अव्वत्तभासिणो खस-खत्ति-कडो-कडट्ठोविलअ-कण्णाट-कण्णप्पावरणअ-दविड-चोल-चीण-बब्बर-खेर-खान-मुख-मधुवातप्रभृतीनां म्लेच्छजातीनामनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामो दिट्ठो दिट्ठा वा अज्जो वा अज्जआ वा । किं शब्दविचारः । स्त्रीपुंनपुंसकव्याख्यानमप्रस्तुतम् ।

वीरकः । [२]णं अहं पि पलोएमि । राअअण्णा एसा । अहं रण्णो पच्चइदो ।

चन्दनकः । [३]तो किं अहं अप्पच्चओ संवुत्तो ।

वीरकः । [४]णं सामिणिओओ ।

चन्दनकः । (स्वगतम्) [५]अज्जगोवालदारओ अज्जचारुदत्तस्स पवहणं आहिरुहिअ अवक्कमदि त्ति जइ कहिज्जदि तदो अज्जचारुदत्तो रण्णा सासिज्जइ । ता को एत्थ उवाओ । (विचिन्त्य) [६]कण्णाटकलहप्पओअं करेमि (प्रकाशम्) [७]अरे वीरअ मए चन्दणकेण पलोइदं पुणोवि तुमं पलोएसि । को तुमम् ।

वीरकः । [८]अरे तुमं पि को ।

चन्दनकः । [९]पूइज्जन्तो माणिज्जन्तो । तुमं अप्पणो जादिं अणुसुमरेसि ।

---

(१) अरे कोऽप्रत्ययस्तव । वयं दाक्षिणात्या अव्यक्तभाषिणः । खश-खात्ति-कड-कडष्ठोविल-कर्णाट-कर्णप्रावरण-द्राविड-चोल-चीन-बर्बर-खेर-खान मुख-मधुघातप्रभृतीनां म्लेच्छजातीनामनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामो दृष्टो दृष्टा वा । आर्यो वार्या वा ।

(२) नन्वहमपि प्रलोकयामि । राजाज्ञैषा । अहं राज्ञः प्रत्ययितः ।

(३) तत् किमहमप्रत्ययः संवृत्तः । (४) ननु स्वामिनियोगः ।

(५) आर्यगोपालदारक आर्यचारुदत्तस्य प्रवहणमधिरुह्यापक्रामतीति यदि कथ्यते तदार्यचारुदत्तो राज्ञा शिष्यते । तत्कोत्रोपाय । (६) कर्णाटकलहप्रयोगं करोमि । (७) अरे वीरक मया चन्दनकेन प्रलोकितं पुनरपि त्वं प्रलोकयसि कस्त्वम् ।

(८) अरे त्वमपि कः ।

(९) पूज्यमानो मान्यमानः । त्वमात्मनो जातिमनुस्मर ।

वीरकः। (सक्रोधम्) [1]अरे का मह जादी।

चन्दनकः। [2]को भणउ।

वीरकः। [3]भणउ।

चन्दनकः। [4]अहवा ण भणउ।

जाणन्तो वि हु जादिं तुज्झ ण भणामि सीलविहवेण।
चिट्ठउ महच्चिअ मणे किं च कइत्थेण भग्गेण ॥२१

वीरकः। [5]णं भणउ भणउ। (चन्दनकः संज्ञां ददाति।)

वीरकः। [6]अरे किं णेदं।

चन्द०:। [7]सिण्णसिलाअलहत्थो पुरिसाणं कुच्चगण्ठिसण्ठवणो।
कत्तरिव वडहत्थो तुमं पि सेणावई जादो ॥२२

वीरकः। [8]अरे चन्दणआ तुमं पि माणिज्जन्तो अप्पणोकेरिकं जादिं ण सुमरेसि।

चन्दनकः। [9]अरे का मह चन्दणअस्स चन्दविसुद्धस्स जादी।

वीरकः। [10]को भणउ।

चन्दनकः। [11]भणउ भणउ। (वीरको नाट्येन संज्ञां ददाति।)

चन्दनकः। [12]अरे किं णेदं।

वीरकः। [13]अरे सुणाहि।

---

(१) अरे का मम जातिः। (२) को भणतु। (३) भणतु।
(४) अथवा न भणतु।

जानन्नपि हि जातिं तव न भणामि शीलविभवेन।
तिष्ठतु ममैव मनसि किं च कपित्थेन मग्नेन ॥

(५) ननु भणतु भणतु। (६) अरे किं न्विदम्।
(७) शीर्णशिलातलहस्तः पुरुषाणां कुब्जितग्रन्थिसंस्थापनः।
कर्तरीव्याप्तहस्तस्त्वमपि सेनापतिर्जातः ॥
(८) अरे चन्दनक त्वमपि मान्यमान आत्मनो जातिं न स्मरसि।
(९) अरे का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः (१०) को भणतु।
(११) भणतु भणतु। (१२) अरे किं न्विदम्।
(१३) अरे शृणु।

जादी तुज्झ विसुद्धा मादा भेरी पिदा वि दे पडहो।
दुम्मह करडअभादा तुमं पि सेणावई जादो ॥२३

चन्दनकः। (सक्रोधम्) [1]अहं चन्दणओ चम्मारओ। ता पलोएहि पवहणं।

वीरकः। [2]अरे पवहणवाहआ पडिवत्तावेहि पवहणं। पलोइस्सं।
(चेटस्तथा करोति। वीरकः प्रवहणमारोढुमिच्छति। चन्दनकः सहसा केशेषु गृहीत्वा पातयति पादेन ताडयति च।)

वीरकः। (सक्रोधमुत्थाय) [3]अरे अहं तुए वीसत्थो राआणत्तिं करेन्तो सहसा केसेसु गेण्हिअ पादेन ताडिदो। ता सुण रे। अहिअरणमज्झे जइ दे चउरङ्गं ण कप्पावेमि तदो ण होमि वीरओ।

चन्दनकः। [4]अरे राअउलं अहिअरणं वा वच्च। किं तुए सुणअसरिसेण। (वीरकस्तथेति निष्क्रान्तः।)

चन्दनकः। (दिशोऽवलोक्य)। [5]गच्छ रे पवहणवाहआ गच्छ। जइ को वि पुच्छेदि तदो भणेसि चन्दणअवीरएहिं अवलोइदं पवहणं वच्चइ। अज्जे वसन्तसेणे इमं च अहिण्णाणं दे देमि। (इति खड्गं प्रयच्छति।)

आर्यकः। (खड्गं गृहीत्वा सहर्षमात्मगतम्)

---

(१) जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः।
दुर्मुख करटकभ्राता त्वमपि सेनापतिर्जातः॥

(२) अहं चन्दनकश्चर्मकारः। तत् प्रलोकय प्रवहणम्।

(३) अरे प्रवहणवाहक परिवर्तय प्रवहणम्। प्रलोकयिष्यामि।

(४) अरे अहं त्वया विश्वस्तो राजाज्ञप्तिं कुर्वन् सहसा केशेषु गृहीत्वा पादेन ताडितः। तच्छृणु रे। अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि [कर्तयामि] तदा न भवामि वीरकः।

(५) अरे राजकुलमधिकरणं वा व्रज। किं त्वया शुनकसदृशेन।

(६) गच्छ रे प्रवहणवाहक गच्छ। यदि कोऽपि पृच्छति तदा भण चन्दनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति। आर्ये वसन्तसेने इदं चाभिज्ञानं ते ददामि।

अये शस्त्रं मया प्राप्तं स्पन्दते दक्षिणो भुजः ।
अनुकूलं च सकलं हन्त संरक्षितोऽप्यहम् ॥२४

चन्दनकः । [1]अज्जए
एत्थ मए विण्णविदा पच्चइदा चन्दणं पि सुमरेसि ।
ण भणामि एस लुद्धो णेहस्स रसेण बोल्लामो ॥२५

आर्यकः । चन्दनश्चन्द्रशीलाढ्यो दैवादद्य सुहृन्मम ।
चन्दनं भोः स्मरिष्यामि सिद्धादेशस्तथा यदि ॥२६

चन्दनकः ।
[2]अभअं तुह देउ हरो विण्हू बम्हा रवी अ चन्दो अ ।
हत्तूण सत्तुवक्खं सुम्भणिसुम्भे जधा देवी ॥२७

(चेटः प्रवहणेन निष्क्रान्तः ।)

चन्दनकः । (नेपथ्याभिमुखमवलोक्य) [3]अरे णिक्कमन्तस्स मे पिअव-अस्सो सव्विलओ पिट्ठदो जेव्व अणुलग्गो गदो । भोदु । पधाणदण्डधारओ वीरओ राअपच्चअआरो विरोधिदो । ता जाव अहंपि पुत्तभादुपडिबुदो एदं जेव्व अणुगच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

प्रवहणविपर्ययो नाम षष्ठोऽङ्कः ।

---

(१) आर्ये । अत्र मया विज्ञप्ता प्रत्ययिता चन्दनमपि स्मरसि ।
न भणाम्येष लुब्धः स्नेहस्य रसेन ब्रूमः ॥

(२) अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च ।
हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ॥

(३) अरे निष्क्रामतो मम प्रियवयस्यः शर्विलकः पृष्ठत एवानुलग्नो गतः । भवतु । प्रधानदण्डधारको वीरको राजप्रत्ययकारो विरोधितः । तद्यावदहमपि पुनर्भ्रातृपरिवृत एतमेवानुगच्छामि ।

सप्तमोऽङ्कः ।

(ततः प्रविशति चारुदत्तो मैत्रेयश्च ।)

मैत्रेयः । भोः पेक्ख पेक्ख पुप्फकरण्डअजिण्णुज्जाणस्स सस्सिरीअदां ।

चारुदत्तः । वयस्य एवमेतत् । तथा हि

वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि ।
शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति ॥१

मैत्रेयः । भो इमं असक्काररमणीअं सिलाअलं उवविसदु भवं ।

चारुदत्तः । (उपविश्य) वयस्य चिरयति वर्धमानकः ।

मैत्रेयः । भणिदो मए वड्ढमाणओ वसन्तसेणिअं गेण्हिअ लहुं लहुं आगच्छ त्ति ।

चारुदत्तः । तत् किं चिरयति ।

किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते
भग्नेऽक्षे परिवर्तनं प्रकुरुते छिन्नोऽथ वा प्रग्रहः ।
वर्त्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते
स्वैरं प्रेरितगोयुगः किमथ वा स्वच्छन्दमागच्छति ॥२

(प्रविश्य गुप्तार्यकप्रवहणस्थो) **वर्धमानकः** । जाध गोणा जाध ।

आर्यकः (स्वगतम्)

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात् सावशेषापसारः ।
अविदितमधिरूढो यामि साधोस्तु याने
परभृत इव नीडे रक्षितो वायसीभिः ॥३

---

(१) भोः पश्य पश्य पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकताम् ।

(२) भो इदमसंस्काररमणीयं शिलातलमुपविशतु भवान् ।

(३) भणितो मया वर्धमानको वसन्तसेनां गृहीत्वा लघु लघ्वागच्छेति ।

(४) यातं गावौ यातम् ।

अहो नगरात्सुदूरमपक्रान्तोऽस्मि। तत्किमस्मात् प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि। उताहो प्रवहणस्वामिनं पश्यामि। अथ वा कृतं वृक्षवाटिकागहनेन। अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते। तत्प्रत्यक्षीकृत्य गच्छामि।

स तावदस्माद्व्यसनार्णवोत्थितं निरीक्ष्य साधुः समुपैति निर्वृतिम्।
शरीरेमतद्गतभीदृशीं दशां धृतं मया तस्य महात्मनो गुणैः ॥४

वर्धमानकः। ईमं तं उज्जाणं। जाव उवशप्यामि।(उपसृत्य) अज्जामित्तेअ।

मैत्रेयः। भोः पिअं दे णिवेदेमि। वड्ढमाणओ मन्तेदि। आगदाए वसन्तसेणाए होदव्वं।

चारुदत्तः। प्रियं नः प्रियम्।

मैत्रेयः। दासीए उत्ता किं चिरइदो सि।

वर्धमानकः। अज्ज मित्तेअ मा कुप्प। जाणत्थलके विशुमलिदे त्ति कदुअ गदागदं कलेन्ते चिलइदे म्हि।

चारुदत्तः। वर्धमानक परिवर्तय प्रवहणम्। सखे मैत्रेय अवतारय वसन्तसेनाम्।

मैत्रेयः। किं णिअडेण से बद्धा गोडा जेण सअं ण ओदरेदि। (उत्थाय प्रवहणमुद्वाह्य) भो ण वसन्तसेणा। वसन्तसेणो क्खु एसो।

चारुदत्तः। वयस्य अलं परिहासेन। न कालमपेक्षते स्नेहः। अथ वा स्वयमेवावतारयामि। (इत्युत्तिष्ठति।)

आर्यकः। (दृष्ट्वा) अये अयमेव प्रवहणस्वामी। न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि। हन्त रक्षितोस्मि।

---

(१) इदं तदुद्यानं यावदुपसर्पामि। (२) आर्य मैत्रेय।

(३) भोः प्रिय ते निवेदयामि। वर्धमानको मन्त्रयते। आगतया वसन्तसेनया भवितव्यम्। (४) दास्याःपुत्र किं चिरायितोऽसि।

(५) आर्य मैत्रेय मा कुप्य। यानास्तरकं विस्मृतमिति कृत्वा गतागतं कुर्वंश्चिरायितोऽस्मि।

(६) किं निगडेन बद्धावस्याः पादौ येन स्वयं नावतरति। (७) भो न वसन्तसेना वसन्तसेनः खल्वेषः।

चारुदत्तः । (प्रवहणमधिरुह्य दृष्ट्वा च) अये तत्कोयम् ।

करिकरसमबाहुः सिंहपीनोन्नतांसः
पृथुतरसमवक्षास्ताम्रलोलायताक्षः ।
कथमिदमसमानं प्राप्त एवंविधो यो
वहति निगडयुग्मं पादलग्नं महात्मा ॥५

ततः को भवान् ।

आर्यकः । शरणागतो गोपालप्रकृतिरार्यकोऽस्मि ।

चारुदत्तः । किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः ।

आर्यकः । अथ किम् ।

चारुदत्तः । विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः ।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥६

(आर्यको हर्षं नाटयति ।)

चारुदत्तः । वर्धमानक चरणान्निगडमपनय ।

वर्धमानकः । [1]जं अज्जो आणवेदि । (तथा कृत्वा) [2]अज्ज अवणीदाइं णिअलाइं ।

आर्यकः । स्नेहमयान्यन्यानि दृढतराणि दत्तानि ।

मैत्रेयः । [3]संगच्छेहि निअडाइं । एसो वि मुक्को । सम्पदं अम्हे वाज्जिस्सामो ।

चारुदत्तः । धिक् । शान्तम् ।

आर्यकः । सखे चारुदत्त अहमपि प्रणयेनेदं प्रवहणमारूढः । तत् क्षन्तव्यम् ।

चारुदत्तः । अलंकृतोऽस्मि स्वयंग्राहप्रणयेन भवता ।

आर्यकः । अभ्यनुज्ञातो भवता गन्तुमिच्छामि ।

चारुदत्तः । गम्यताम् ।

आर्यकः । भवत्ववतरामि ।

---

(१) यदार्य आज्ञापयति । (२) आर्य अपनीतानि निगडानि ।
(३) संगच्छस्व निगडानि । एषोऽपि मुक्तः । सांप्रतं वयं व्रजिष्यामः ।

चारुदत्तः । सखे नावतारितव्यम् । प्रत्यग्रापनीतसंयमनस्य भवतो लघुसंचारा गतिः । सुलभपुरुषसंचारेऽस्मिन् प्रदेशे प्रवहणं विश्वासमुत्पादयति । तत्प्रवहणेनैव गम्यताम् ।

आर्यकः । यथाह भवान् ।

चारुदत्तः । क्षेमेण व्रज बान्धवान्

आर्यकः । ननु मया लब्धो भवान् बान्धवः ।

चारुदत्तः । स्मर्तव्योऽस्मि कथान्तरेषु भवता

आर्यकः । स्वात्मापि विस्मर्यते ।

चारुदत्तः । त्वां रक्षन्तु पथि प्रयान्तममराः

आर्यकः । संरक्षितोऽहं त्वया

चारुदत्तः । स्वैर्भाग्यैः परिरक्षितोऽसि

आर्यकः । ननु हे तत्रापि हेतुर्भवान् ॥७

चारुदत्तः । यत्नोद्यते पालके महती रक्षा वर्तते । तच्छीघ्रमपक्रामतु भवान् ।

आर्यकः । एवम् । पुनदर्शनाय । (इति निष्क्रान्तः ।)

चारुदत्तः । कृत्वैवं मनुजपतेर्महव्यलीकं
स्थातुं हि क्षणमपि न प्रशस्तमस्मिन् ।
दृष्ट्वा । मैत्रेय क्षिप निगडं पूराणकूपे
पश्येयुः क्षितिपतयो हि चारदृष्ट्या ॥८

(वामाक्षिस्पन्दनं सूचयित्वा) सखे मैत्रेय वसन्तसेनादर्शनोत्सुकोऽयं जनः । पश्य । अपश्यतोऽद्य तां कान्तां वामं स्फुरति लोचनम् ।
अकारणपरित्रस्तं हृदयं व्यथते मम ॥९

तदेहि । गच्छावः । (परिक्रम्य) कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम् । (विचार्य) प्रविशत्वयमनेन पथा । वयमप्यनेन पथा गच्छामः ।

(इति निष्क्रान्ताः सर्वे ।)

आर्यकापहरणं नाम सप्तमोऽङ्कः

अष्टमोऽङ्कः ।

(ततः प्रविशत्यार्द्रचीवरहस्तेः) भिक्षुः । अज्जा कलेध धम्मशंचअं ।

शंजम्मध णिअपोटं णिच्चं जग्गेध झाणपडहेण ।
विशमा इन्दिअचोला हलन्ति चिलशंचिदं धम्मं ॥१

अपि अ । अणिच्चदाए पेक्खिअ णवल दाव धम्माणं शलणम्हि ।

पञ्चज्जण जेण मालिदा इत्थिअ मालिअ गाम लक्खिदे ।
अबले अ चण्डाल मालिदे अवशं शे णल शग्ग गाहदि ॥२

शिल मुण्डिदे तुण्ड मुण्डिदे चित्त ण मुण्डिदे कीश मुण्डिदे ।
जाह उण अ चित्त मुण्डिदे शाहु शुट्ठु शिल ताह मुण्डिदे ॥३

गिहिदकशाआदेए एशे चीवले । जाव एदं लट्ठिअशालकाहकेलके उज्जाणे पविशिअ पोक्खलिणीए पक्खालिअ लहुं लहुं अवक्कमिश्शं । (परिक्रम्य तथा करोति ।)

(नेपथ्ये) [३]चिट्ठ ले दुट्ठशमणका चिट्ठ ।

भिक्षुः । (दृष्ट्वा सभयम्) ही अविद । हीमाणहे । [४]एशे शे लाअशाल-

---

(१) आर्याः कुरुत धर्मसंचयम् ।
संयच्छत निजोदरं नित्यं जागृत ध्यानपटहेन ।
विषमा इन्द्रियचौरा हरन्ति चिरसंचितं धर्मम् ॥
अपि च । अनित्यतया प्रेक्ष्य केवलं तावद्धर्माणां शरणमस्मि ।
पञ्चजना येन मारिताः स्त्रियं मारयित्वा ग्रामो रक्षितः ।
अबलश्च चाण्डालो मारितोऽवश्यं स नरः स्वर्गं गाहते ॥
शिरो मुण्डितं तुण्डं मुण्डितं चित्तं न मुण्डितं किं मुण्डितम् ।
यस्य पुनश्च चित्तं मुण्डितं साधु सुष्ठु शिरस्तस्य मुण्डितम् ॥
गृहीतकाषायोदयकमेतच्चीवरम् । यावदेतद्वाह्रियश्यालकस्योद्याने प्रविश्य पुष्करिण्यां प्रक्षाल्य लघु लघ्वपक्रमिष्यामि ।

(२) तिष्ठ रे दुष्टश्रमणक तिष्ठ ।

(३) भोः कष्टम् । एष स राज्यश्यालसंस्थानक आगतः । एकेन भिक्षु-

ण्ठाणे आअदे । एक्केण भिक्खुणा अवलाहे किदे अण्णं पि जहिं जहिं भिक्खुं पेक्खदि तहिं तहिं गोण ब्व णासं विन्धिअ ओवाहेदि । ता कहिं अशलणे शलणं गमिश्शं । अध वा भट्टालके जेव्व बुद्धे मे शलणे ।

(प्रविश्य सखड्गेन विटेन सह)

संस्थानकः । [1]चिट्ठ ले दुट्ठशमणका चिट्ठ । आवाणअमज्झपविट्ठश्श विअ लत्तमूलअश्श शीशं दे मोडइश्शं । (इति ताडयति ।)

विटः । काणेलीमातः न युक्तं निर्वेदधृतकषायं भिक्षुं ताडयितुम् । तत्किमनेन । इदं तावत् सुखोपगम्यमुद्यानं पश्यतु भवान् ।

अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म ।
हृदयमिव दुरात्मनामगुप्तं नवमिव राज्यमनिर्जितोपभोग्यम् ॥४

भिक्षुः । [2]शाअदं । पशीददु उवाशके ।

संस्थानकः । [3]भावे पेक्ख पेक्ख । अक्कोशदि मं ।

विटः । किं ब्रवीति ।

संस्थानकः । [4]उवाशके त्ति मं भणादि । किं हग्गे णाविदे ।

विटः । बुद्धोपासक इति भवन्तं स्तौति ।

संस्थानकः । [5]थुणु शमणका थुणु ।

भिक्षुः । [6]तुमं धण्णे तुमं पुण्णे ।

संस्थानकः । [7]भावे धण्णे पुण्णे त्ति मं भणादि । किं हग्गे शलावके कोट्ठके (कोम्भकाले) वा ।

णाअपराधे कृतेऽन्यमपि यत्र यत्र भिक्षुं पश्यति तत्र तत्र गामिव नासिकां विविद्ध्वापवाहयति तत्कुत्राशरणः शरणं गमिष्यामि । अथवा भट्टारक एव बुद्धो मे शरणम् ।

(१) तिष्ठ रे दुष्टश्रमणक तिष्ठ । आपानकमध्यप्रविष्टस्येव रक्तमूलकस्य शीर्षं ते भङ्क्ष्यामि । (२) स्वागतम् । प्रसीदतु उपासकः ।

(३) भाव पश्य पश्य । आक्रोशति माम् ।

(४) उपासक इति मां भणति । किमहं नापितः ।

(५) स्तुहि श्रमणक स्तुहि । (६) त्वं धन्यस्त्वं पुण्यः ।

(७) धन्यः पुण्य इति मां भणति । किमहं शरावकः कोष्ठकः (कुम्भ-

विटः । काणेलीमातः ननु धन्यस्त्वं पुण्यस्त्वामिति भवन्तं स्तौति ।

संस्थानकः । [१]भावे ता कीश एशे इध आगदे ।

भिक्षुः । [२]इदं चीवलं पक्खलिदुं ।

संस्थानकः । [३]अले दुट्ठशमणका एशे मम बहिणीवदिणा शव्वुज्जाणाणं पवले पुप्फकलण्डुज्जाणे दिण्णे । जहिं दाव शुणहका शिआला पाणिअं पिअन्ति । हग्गे वि पवलपुलिशे मणुश्शके ण ण्हाआमि । तहिं तुमं पुक्खलणीए पुलाणकुलुत्थजूशशाणाइं उग्गगन्धिआइं चीवलाइं पक्खालेशि । ता तुमं एक्कपहालिअं कलेमि ।

विटः । काणेलीमातः तथा तर्कयामि यथानेनाचिरप्रव्रजितेन भवितव्यम् ।

संस्थानकः । [४]कधं भावे जाणादि ।

विटः । किमत्र ज्ञेयम् । पश्य ।

अद्याप्यस्य तथैव केशविरहाद्भौरी ललाटच्छविः
कालस्यात्पतया च चीवरकृतः स्कन्धे न जातः किणः ।
नाभ्यस्ता च कषायवस्त्ररचना दूरं निगूढान्तरं
वस्त्रान्तश्च पटोच्छ्रयात्प्रशिथिलं स्कन्धे न संतिष्ठते ॥५

भिक्षुः । [५]उवासके एव्वं । अचिलपव्वजिदे हग्गे ।

संस्थानकः । [६]ता कीश तुमं जातमेत्तक जेव्व ण पव्वजिदे ।

(इति ताडयति ।)

भिक्षुः । [७]णमो बुद्धस्श ।

कारो) वा । (१) भाव तत्किमर्थमेष इहागताः ।

(२) इदं चीवरं प्रक्षालयितुम् ।

(३) अरे दुष्ट श्रमणक एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्करण्डोद्यानं दत्तम् । यत्र तावच्छुनकाः शृगालाः पानीयं पिबन्ति । अहमपि प्रवरपुरुषो मनुष्यको न स्नामि । तत्र त्वं पुष्करिण्यां पुराणकुलित्थयूषशवलान्युग्रगन्धीनि चीवराणि प्रक्षालयसि । ततः त्वामेकप्रहारिकं करोमि ।

(४) कथं भावो जानाति ।

(५) उपासक एवम् । अचिरप्रव्रजितोऽहम् ।

(६) तत् किमर्थं त्वं जातमात्र एव न प्रव्रजितः । (७) नमो बुद्धाय ।

विटः । किमनेन ताडितेन तपस्विना । मुच्यताम् । गच्छतु ।

संस्थानकः । [1]अले चिट्ठ दाव जाव शम्पधालेमि ।

विटः । केन सार्धम् ।

संस्थानकः । [2]अत्तणो हडक्केण ।

विटः । हन्त न गतः ।

संस्थानकः । [3]पुत्तका हडका भट्टके पुत्तके एशे शमणके अवि णाम किं गच्छदु किं चिट्ठदु । (स्वगतम्) [4]णावि गच्छदु णावि चिट्ठदु । (प्रकाशम्) भोदि शम्पधालिदं मए हडक्केण शह । एशे मह हडके भणादि ।

विटः । किं ब्रवीति ।

संस्थानकः । [5]मा वि गच्छदु मा वि चिट्ठदु । मा वि ऊशशदु मा वि णीशशदु । इध जेव्व झत्ति पडिअ मलेदु ।

भिक्षुः । [6]णमो बुद्धश्श । शलणागदेम्हि ।

विटः । गच्छतु ।

संस्थानकः । [7]णं शमएण ।

विटः । कीदृशः समयः ।

संस्थानकः । [8]तधा कद्दमं फेलदु जधा पाणिअं पङ्काइलं ण होदि । अधवा पाणिअं पुञ्जीकदुअ कद्दमं फेलदु ।

विटः । अहो मूर्खता ।

विपर्यस्तमनश्चेष्टैः शिलाशकलवर्ष्मभिः ।
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुंधरा ॥६

---

(१) अरे तिष्ठ तावद्यावत् संप्रधारयामि (२) आत्मनो हृदयेन ।

(३) पुत्रक हृदय भट्टारक पुत्रक एष श्रमणकोपि नाम किं गच्छतु किं तिष्ठतु । (४) नापि गच्छतु नापि तिष्ठतु । (५) भाव संप्रधारितं मया हृदयेन सह । एतन्मम हृदयं भणति । (६) मांपि गच्छतु मापि तिष्ठतु । मापि उच्छ्वासितु मापि निश्वसितु । इहैव झटिति पतित्वा म्रियताम् ।

(७) नमो बुद्धाय । शरणागतोस्मि । (८) ननु समयेन ।

(९) तथा कर्दमं क्षिपतु यथा पानीयं पङ्काविलं न भवति । अथवा पानीयं पुञ्जीकृत्य कर्दमं क्षिपतु ।

भिक्षुः । (नाट्येनाक्रोशति ।)

संस्थानकः । [1]किं भणादि ।

विटः । स्तौति भवन्तम् ।

संस्थानकः । [2]थुणु थुणु । पुणो वि थुणु ।

(तथा कृत्वा निष्क्रान्तो भिक्षुः ।)

विटः । काणेलीमातः पश्योद्यानस्य शोभाम् ।

अमी हि वृक्षाः फलपुष्पशोभिताः कठोरनिष्पन्दलतोपवेष्टिताः ।
नृपाज्ञया रक्षिजनेन पालिता नराः सदारा इव यान्ति निर्वृतिम् ॥७

संस्थानकः । [3]सुट्ठु भावे भणादि ।

बहुकुसुमविचित्तिदा अ भूमी कुसुमभरेण विणामिदा अ लुक्खा ।
दुमसिहरललदा अ लम्बमाणा पणसफला विअ वाणला ललन्ति ॥८

विटः । काणेलीमातः इदं शिलातलमध्यास्यताम् ।

संस्थानकः । [4]एसे म्हि आसिदे । (इति विटेन सहोपविशति ।) भावे अज्ज वि तं वसन्तसेणिअं सुमलामि । दुज्जणवअणं विअ हडक्कादो ण ओदलदि ।

विटः । (स्वगतम्) तथा निरस्तोऽपि स्मरति ताम् । अथवा ।

स्त्रीभिर्विमानितानां कापुरुषाणां विवर्धते मदनः ।
सत्पुरुषस्य स एव तु भवति मृदुर्नैव वा भवति ॥९

संस्थानकः । [5]भावे का वि वेला थावलकचेडश्श भणिदश्श पवहणं गेण्हिअ लहुं लहुं आअच्छे त्ति । अज्ज वि ण आअच्छदि त्ति । चिलम्हि

---

(१) किं भणति । (२) स्तुहि स्तुहि । पुनरपि स्तुहि ।

(३) सुष्ठु भावो भणति ।

बहुकुसुमविचित्रिता च भूमिः कुसुमभरेण विनमिताश्च वृक्षाः ।
द्रुमशिखरलतावलम्बमानाः पनसफलानीव वानरा ललन्ति ॥

(४) एषोऽस्म्यासितः । भाव अद्यापि तां वसन्तसेनां स्मरामि । दुर्जन-वचनमिव हृदयान्नावतरति ।

(५) भाव कापि वेला स्थावरकचेटस्य भणितस्य प्रवहणं गृहीत्वा लघु लघ्वागच्छेति । अद्यापि नागच्छतीति । चिरमस्मि बुभुक्षितः । मध्याह्ने न

चुभुक्खिदे । मज्झण्णे ण शक्कीअदि पादेहिं गन्तुं । ता पेक्ख पेक्ख ।

णहमज्झगदे शूले दुप्पेक्खे कुविदबाणलशलिच्छे ।
भूमी दढशंतत्ता हदपुत्तशदे व्व गन्धाली ॥१०

विटः । एवमेतत् ।

छायासु प्रतिमुक्तशष्पकवलं निद्रायते गोकुलं
तृष्णार्तैश्च निपीयते वनमृगैरुष्णं पयः सारसम् ।
संतापादतिशङ्कितैर्न नगरीमार्गो नरैः सेव्यते
तप्तां भूमिमपास्य च प्रवहणं मन्ये क्वचित् संस्थितम् ॥११

संस्थानकः । भावे

शिलशि मम णिलीणे भाव शुज्जश्श पादे
शउणिखगविहंगा लुक्खशाहाशु लीणा ।
णलपुलिशमनुश्शा उण्हदीहं शशन्ता
घलशलणणिशण्णा आदवं णिव्वहन्ति।।१२

भावे अज्ज वि शे चेडे णाअच्छदि । अत्तणो विणोदणणिमित्तं किं पि गाइश्शं । (इति गायति) भावे भावे शुदं तुए जं मए गाइदं ।

विटः । किमुच्यते । गन्धर्वो भवान् ।

संस्थानकः । कधं गन्धव्वे ण भविश्शं ।

शक्यते पादाभ्यां गन्तुम् । पश्य पश्य

नभोमध्यगतः सूरो दुष्प्रेक्ष्यः कुपितवानरसदृक्षः ।
भूमिर्दृढसंतता हतपुत्रशतेव गान्धारी ॥

(१) भाव । शिरसि मम निलीनो भाव सूर्यस्य पादः

शकुनिखगविहङ्गा वृक्षशाखासु लीनाः ।
नरपुरुषमनुष्या उष्णदीर्घं श्वसन्तो
गृहशरणनिषण्णा आतपं निर्वहन्ति ॥

भाव अद्यापि स चेटो नागच्छति । आत्मनो विनोदननिमित्तं किमपि गास्यामि । (२) भाव श्रुतं त्वया यन्मया गीतम् ।

(३) कथं गन्धर्वो न भविष्यामि ।

हिङ्गुज्जले जीलकभद्दमुत्थे वचाह गण्ठी शगुडा ह शुण्ठी।
एशे मए शेविद गन्धजुत्ती कधं ण हग्गे मधुलइशले त्ति ॥१३

भावे पुणो वि दाव गाइश्शं। (तथा करोति।) भावे भावे शुदं तुए जं मए गाइदं।

विटः। किमुच्यते गन्धर्वो भवान्।

संस्थानकः। [2]कधं गन्धव्वे ण भवामि।

हिङ्गुज्जले दिण्णमलीचचुण्णे वग्घालिदे तेल्लघिएहि मिश्शे।
भुत्ते मए पालहुदीअमंशे कधं ण हग्गे मधुलइशलोत्ति ॥१४

भावे अज्ज वि चेडे णाअच्छदि।

विटः। स्वस्थो भवतु भवान्। संप्रत्येवागमिष्यति।

(ततः प्रविशति प्रवहणाधिरूढा वसन्तसेना चेटश्च।)

संस्थानकः। [3]भीदे क्खु हग्गे। मज्झण्हिके शुज्जे। मा दाणिं कुविदे लाअशालशण्ठाणे हुविश्शदि। ता तुलिदं वहामि। जाध गोणा जाध।

वसन्तसेना। हँद्धी हद्धी। ण हु वड्ढमाणअस्स अअं सरसंजोओ। किं ण्णेदम्। किं ण हु अज्जचारुदत्तेण वाहणपरिस्समं परिहरन्तेण अण्णो मणुस्सो अण्ण पवहणं पेसिदं भविस्सदि। फुरदि दाहिणं लोअणं। वेवदि मे हिअअं।

हिङ्गूज्वला जीरकभद्रमुस्ता वचाया ग्रन्थिः सगुडा च शुण्ठी।
एषा मया सेविता गन्धयुक्तिः कथं नाहं मधुरस्वर इति ॥

भाव पुनरपि तावद्गास्यामि। (१) भाव श्रुतं त्वया यन्मया गीतम्।

(२) कथं गन्धर्वो न भवामि।

हिङ्गूज्वलं दत्तमरीचचूर्णं व्याघारितं तैलघृताभ्यां मिश्रम्।
भुक्तं मया पारभृतीयमांसं कथं नाहं मधुरस्वर इति।

भाव अद्यापि चेटो नागच्छति।

(३) भीतः खल्वहम्। माध्याह्निकः सूर्यः। मेदार्नी कुपितो राजश्याल-**संस्थान**को भविष्यति। तत्त्वरितं वहामि। यातं गावौ यातम्।

(४) हा धिक् हा धिक्। न खलु वर्धमानस्यायं स्वरसंयोगः। **किंन्विदम्। किं** न खल्वार्यचारुदत्तेन वाहनपरिश्रमं परिहरतान्यो मनुष्योऽन्यत्प्रवहणं प्रेषितं

सुण्णाओ दिसाओ । सव्वं जेव्व विसंठुलं पेक्खामि ।

संस्थानकः । (नेमिघोषमाकर्ण्य) भावे भावे आगदे पवहणे ।

विटः । कथं जानासि ।

संस्थानकः । [2]किं ण पेक्खदि भावे । बुड्ढसूअले विअ घुलघुलाअमाणे लक्खीअदि ।

विटः । (दृष्ट्वा) साधु लक्षितम् । अयमागतः ।

संस्थानकः । [3]पुत्तका थावलका चेडा आगले सि ।

स्थावः । [4]अंध इं ।

संस्थानकः । [5]पवहणे वि आगले ।

स्थावः । [6]अंध इं ।

संस्थानकः । [7]गोणा वि आगले ।

स्थावः । [8]अंध इं ।

संस्थानकः । [9]तुमं पि आगले ।

स्थावः । (सहासम्) [10]भट्टके अहं वि आगले ।

संस्थानकः । [11]तो पवेशेहि पवहणं ।

स्थावरकः । [12]कदलेण मग्गेण ।

संस्थानकः । [13]एदेण जेव्व पगालखण्डेण ।

स्थावरकः । [14]भट्टके गोणा मलेन्ति पवहणे वि भज्जेदि । **हग्गे वि चेडे** मलामि ।

भविष्यति । स्फुरति दक्षिणं लोचनम् । वेपते मे हृदयम् । शून्या दिशः । सर्वमेव विसंष्ठुलं पश्यामि । (१) भाव भाव आगतं प्रवहणम् ।

(२) किं न पश्यति भावः । वृद्धशूकर इव घुरघुरायमाणं लक्ष्यते ।

(३) पुत्रक स्थावरक चेट आगतोसि । (४) अथ किम् ।

(५) प्रवहणमप्यागतम् (६) अथ किम् । (७) गावावप्यागतौ ।

(८) अथ किम् । (९) त्वमप्यागतः । (१०) भट्टारक अहमप्यागतः ।

(११) तत्प्रवेशय प्रवहणम् । (१२) कतरेण मार्गेण ।

(१३) एतेनैव प्राकारखण्डेन ।

(१४) भट्टारक वृषभौ म्रियेते । प्रवहणमपि भज्यते । अहमपि चेटो म्रिये ।

संस्थानकः । [1]अले लाअशालके हग्गो । गोणा मले अवले कीणिश्शं । पवहणे भग्गे अवलं घडाइश्शं । तुमं मले अण्णे पवहणवाहके हुविश्शदि ।

स्थावरकः । [2]णेव्वं उपवण्णं हुविश्शदि । हग्गे अत्तणकेलके ण हुविश्शं ।

संस्थानकः । [3]अले शव्वं पि णश्शदु । पगालखण्डेण पवेशेहि पवहणं ।

स्थावरकः । [4]विभज्ज ले पवहणं । शमं शामिणा विभज्ज । अण्णे पवहणे मोदु । भट्टके गदुअ णिवेदेमि । (प्रविश्य) [5]कधं ण भग्गे । भट्टके एशे उवत्थिदे पवहणे ।

संस्थानकः । [6]णं छिण्णा गोणा । ण मला लज्ज । तुमं पि ण मले ।

स्थावरकः । [7]अध इं ।

संस्थानकः । [8]भाव आअच्छ । पवहणं पेक्खामो । भावे तुमं पि मे गुरु पलमगुरु । पेक्खीअशि शादलके अब्भन्तलकेत्ति पुलक्कलणीएत्ति । तुमं दाव पवहणं अग्गदो अहिलुह ।

विटः । एवं भवतु । (इत्यारोहति)

संस्थानकः । अधवा चिट्ठ तुमं । तुह बप्पकेलके पवहणे जेण तुमं अग्गदो अहिलुहशि । हग्गे पवहणशामी अग्गदो पवहणं अहिलुहामि ।

विटः । भवानेवं ब्रवीति ।

---

(१) अरे राजश्यालकोऽहम् । वृषभौ मृतावपरौ क्रेष्यामि । प्रवहणं भग्नमपरं कारयिष्यामि । त्वं मृतोऽन्यः प्रवहणवाहको भविष्यति ।

(२) सर्वमुपपन्नं भविष्यति । अहमात्मीयो न भविष्यामि ।

(३) अरे सर्वमपि नश्यतु । प्राकारखण्डेन प्रवेशय प्रवहणम् ।

(४) विभङ्ग्धि रे प्रवहणम् । समं स्वामिना विभङ्ग्धि । अन्यत् प्रवहणं भवतु । भट्टारकं गत्वा निवेदयामि । (५) कथं न भग्नम् । भट्टारक एतदुपस्थितं प्रवहणम् ।

(६) न च्छिन्नौ वृषभौ । न मृता रजवः । त्वमपि न मृतः । (७) अथ किम् ।

(८) भाव आगच्छ । प्रवहणं पश्यावः । भाव त्वमपि मे गुरुः परमगुरुः । प्रेक्ष्यसे सादरकोऽभ्यन्तरक इति पुरस्करणीय इति । त्वं तावत् प्रवहणमग्रतोऽधिरोह । (९) अथवा तिष्ठ त्वम् । तव पितुः प्रवहणं येन त्वमग्रतोऽधिरोहसि । अहं प्रवहणस्वामी । अग्रतः प्रवहणमधिरोहामि ।

संस्थानकः। जइ वि हग्गे एव्वं भणामि तधा वि तुए एशे आआले अहिलुह भट्टकेत्ति भणिदुं।

विटः। आरोहतु भवान्।

संस्थानकः। एशे शम्पदं अहिलुहामि। पुत्तका थावलक चेडा पलिवत्तावेहि पवहणं।

स्थावरकः। (परावर्त्य) अहिलुहदु भट्टालके।

संस्थानकः। (अधिरुह्यावलोक्य च शङ्का नाटयित्वा त्वरितमवतीर्य विटं कण्ठेऽवलम्ब्य) भावे भावे मलेशि मलेशि। पवहणाधिलूढा लक्खशी चोले वा पडिवशदि। ता जइ लक्खशी तदो उमेवि मूशे। अध चोले ता उमे वि खज्जे।

विटः। न भेतव्यम्। कुतोऽत्र वृषभयाने राक्षस्या अवसरः। मा नाम ते मध्याह्नार्कतापखिन्नदृष्टेः स्थावरकस्य सकञ्चुकां छायां दृष्ट्वा भ्रान्तिरुत्पन्ना।

संस्थानकः। पुत्तका थावलका चेडा जीवेशि।

स्थावरकः। अध इं।

स्थावरकः। भावे पवहणाहिं इत्थिआ पडिवशदि। ता अवलोएहि।

विटः। कथं स्त्री।

अवनताशिरसः प्रयाम शीघ्रं पथि वृषभा इव वर्षताडिताक्षाः।
मम हि सदसि गौरवप्रियस्य कुलजनदर्शनकातरं हि चक्षुः॥१५

वसन्तसेना। (सविस्मयमात्मगतम्) कधं मम णअणाणं आआसअरो जेव्व राअसालओ। ता संसइदम्हि मन्दभाआ। एसो दाणिं मम मन्दभाइ-

---

(१) यद्यप्यहमेवं भणामि तथापि तवैष आचारोऽधिरोह भट्टारक इति भणितुम्। (२) एष सांप्रतमधिरोहामि। पुत्रक स्थावरक चेट परिवर्तय प्रवहणम्।

(३) अधिरोहतु भट्टारकः।

(४) भाव भाव मृतोऽसि। प्रवहणाधिरूढा राक्षसी चौरो वा प्रतिवसति। तद्यदि राक्षसी तदोभावपि मुषितौ। अथ चौरस्तदोभावपि खादितौ।

(५) पुत्रक स्थावरक चेट जीवसि। (६) अथ किम्।

(७) भाव प्रवहणे स्त्री प्रतिवसति। तदवलोकय।

(८) कथं मम नयनयोरायासकर एव राजश्यालः। तत् संशयितास्मि मन्दभाग्या। एतदिदानीं मम मन्दभागिन्या ऊषरक्षेत्रपतित इव बीजमुष्टिर्निष्फ-

णीए ऊसरच्छेत्तपडिदो विअ बीअमुट्ठी णिप्फलो इध आगमणो संवुत्तो ता किं एत्थ करइस्सं ।

संस्थानकः । कादले क्खु एशे बुड्ढखोडे पवहणं णावलोएदि । भावे आलोएहि पवहणं ।

विटः । को दोषः । भवत्वेवं तावत् ।

संस्थानकः । कधं शिआला उड्डन्ति वाअशा वच्चन्ति । ता जाव भावे अक्खीहिं भक्खीअदि दन्तेहिं पेक्खीअदि ताव हग्गे पलाइश्शं ।

विटः । (वसन्तसेनां दृष्ट्वा सविषादमात्मगतम्) कथमये मृगी व्याघ्रमनुसरति । भोः कष्टम् ।

शरच्चन्द्रप्रतीकाशं पुलिनान्तरशायिनम् ।
हंसी हंसं परित्यज्य वायसं समुपस्थिता ॥१६

(जनान्तिकम्) **वसन्तसेने न युक्तमिदं नापि सदृशमिदम् ।**
पूर्वं मानादवज्ञाय द्रव्यार्थे जननीवशात् ।

वसन्तसेना । ण । (इति शिरश्चालयति)

विटः । अशौण्डीर्यस्वभावेन वेशभावेन मन्यते ॥१७

ननूक्तमेव मया भवतीं प्रति । 'सममुपचर भद्रे सुप्रियं चाप्रियं च' ।

वसन्तसेना । पवहणविपज्जासेण आगदा । सरणागदम्हि ।

विटः । न भेतव्यम् न भेतव्यम् । भवत्वेनं वञ्चयामि । (संस्थानकमुपगम्य) काणेलीमातः सत्यं राक्षस्येवात्र प्रतिवसति ।

संस्थानकः । भावे भावे जइ लक्खवशी पडिवशदि ता कीश ण तुमं मूशेदि । अध चोले ता किं तुमं ण भक्खिदे ।

लमिहागमनं संवृत्तम् । तत् किमत्र करिष्यामि ।

(१) कातरः खल्वेष वृद्धचेटः प्रवहणं नावलोकयति । भाव आलोकय प्रवहणम् । (२) कथं शृगाला उड्डयन्ते वायसा व्रजन्ति । तद्यावद्भावोऽक्षिभ्यां भक्ष्यते दन्तैः प्रेक्ष्यते तावदहं पलायिष्ये ।

(३) प्रवहणविपर्यासेनागता । शरणागताऽस्मि ।

(४) भाव भाव यदि राक्षसी प्रतिवसति तत् कथं न त्वां मुष्णाति ।

विटः। किमनेन निरूपितेन। यदि पुनरुद्यानपरंपरया पद्भ्यामेव नगरीमुज्जयिनीं प्रविशावस्तदा को दोषः स्यात्।

संस्थानकः। [1]एव्वं किदे किं भोदि।

विटः। एवं कृते व्यायामः सेवितो धुर्याणां च परिश्रमः परिहृतो भवति।

संस्थानकः। [2]एवं भोदु। थावलआ चेडा णेह पवहणं। अधवा चिट्ठ चिट्ठ। देवदाणं बम्हणाणं च अग्गदो चलणेण गच्छामि। णहि णहि। पवहणं अहिलुहिअ गच्छामि। जेण दूलदो मं पेक्खिअ भणिश्शन्ति एशे शे लट्ठिअशाले भट्टालके गच्छदि।

विटः। (स्वगतम्) दुष्करं विषमौषधीकर्तुम्। भवत्वेवं तावत्। (प्रकाशम्) काणेलीमातः एषा वसन्तसेना भवन्तमभिसारयितुमागता।

वसन्तसेना। [3]सन्तं पावं सन्तं पावं।

संस्थानकः। (सहर्षम्) [4]भावे मं पवलपुलिशं मणुश्शं वाशुदेवकं।

विटः। अथ किम्।

संस्थानकः। [5]तेण हि अपुव्वा शिली शमाशादिदा। तारिशं काले मए लोशाइदा। शम्पदं पादेशुं पडिअ पशादेमि।

विटः। साध्वभिहितम्।

संस्थानकः। [6]एशे पादेशुं पडेमि। (इति वसन्तसेनामुपसृत्य) अत्तिके।

अथ चौरस्तदा किं त्वं न भक्षितः। (१) एवं कृते किं भवति।

(२) एवं भवतु। स्थावरक चेट नय प्रवहणम्। अथवा तिष्ठ तिष्ठ। देवतानां ब्राह्मणानां चाग्रतश्चरणेन गच्छामि। नहि नहि प्रवहणमधिरुह्य गच्छामि। येन दूरतो मां प्रेक्ष्य भणिष्यन्ति एष स राष्ट्रियश्यालो भट्टारको गच्छति।

(३) शान्तं पापं शान्तं पापम्।

(४) भाव भाव मां प्रवरपुरुषं मनुष्यं वासुदेवकम्।

(५) तेन ह्यपूर्वा श्रीः समासादिता। तस्मिन् काले मया रोषिता। सांप्रतं पादयोः पतित्वा प्रसादयामि।

(६) एष पादयोः पतामि। मातः।

अम्बिके। शृणु मम विण्णत्तिं।

एशे पडेमि चलणेशु विशालणेत्ते
हत्थञ्जलिं दशणहे तव शुद्धदन्ते।
जं तं मए अवकिदं मदणातुलेण
तं खम्मिदाशि वलगत्ति तव म्हि दाशे ॥१८

वसन्तसेनाः। (सक्रोधम्) अवेहि। अणज्ज मन्तेसि।

(इति पादेन ताडयति।)

संस्थानकः। (सक्रोधम्)

जे चुम्बिदे अम्बिकमादुकेहिं गदे ण देवाण वि जे पणामं।
शे पाडिदे पादतलेण मुण्डे वणे शिआलेण जधा मदङ्गे ॥१९

अले थावलआ चेडा कहिं तुए एशा शमाशादिदा।

स्थावरकः। भट्टके गामशअलेहिं लुद्धे लाअमग्गे। तदो चालुदत्तश्श लुक्खवाडिआए पवहणं थाविअ तहिं ओदलिअ जाव चक्कपलिवट्टिअं करेमि ताव एशा पवहणविपज्जाशेण इह आलूढेत्ति तक्केमि।

संस्थानकः। कधं पवहणपलट्टणेण आगदा ण मं अहिशालिदुं। ता ओदल ओदल मम केलकादो पवहणादो। तुमं तं दलिद्दशत्थवाहपुत्तकं

अम्बिके। शृणु मम विज्ञप्तिम्।

एष पतामि चरणयोर्विशालनेत्रे हस्ताञ्जलिं दशनखे तव शुद्धदन्ति।
यत्तन्मयापकृतं मदनातुरेण तत्क्षामितासि वरगात्रि तवास्मि दासः ॥

(१) अपेहि। अनार्ये मन्त्रयसे।

(२) यच्चुम्बितमम्बिकामातृकाभिर्गतं देवानामपि यत्प्रणामम्।
तत्पातितं पादतलेन मुण्डं वने शृगालेन यथा मृताङ्गम् ॥

अरे स्थावरक चेट कुत्र त्वयैषा समासादिता।

(३) भट्टक ग्रामशकटै रुद्धो राजमार्गः। तदा चारुदत्तस्य वृक्षवाटिकायां प्रवहणं स्थापयित्वा तत्रावतीर्य यावच्चक्रपरिवृत्तिं करोमि तावदेषा प्रवहणविपर्यासेनेहारूढेति तर्कयामि।

(४) कथं प्रवहणविपर्यासेनागता न मामभिसारयितुम्। तदवतरावतर मदीयात् प्रवहणात्। त्वं तं दरिद्रसार्थवाहपुत्रकमभिसरसि। मदीयौ गावौ

अहिशालेशि । मम केलकाइं गोणाइं वाहेशि । ता ओदल ओदल गम्भदाशि ओदल ।

वसन्तसेना । [1]तं अज्जचारुदत्तं अहिसारेसि त्ति जं सच्चं अलंकिदम्हि इमिणा वअण्णेण । संपदं अ जं भोदु तं भोदुं ।

संस्थानकः । [2]एदेहिं दे दशणहुप्पलमण्डलेहिं
हत्थेहिं चाडुशदताडणलम्पडेहिं ।
कट्टामि दे वलतणुं णिअजाणकादो
केशेशु वालिदइअं वि जहा जडाऊ ॥२०

विटः । अग्राह्या मूर्धजेष्वेताः स्त्रियो गुणसमन्विताः ।
न लताः पल्लवच्छेदमर्हन्त्युपवनोद्भवाः ॥२१

तदुत्तिष्ठ त्वम् । अहमेनामवतारयामि । वसन्तसेने अवतीर्यताम् ।

वसन्तसेना । (अवतीर्यैकान्ते स्थिता ।)

संस्थानकः । (स्वगतम्) [3]जे शे मम वअणावमाणेण तदा लोशग्गी शन्धुच्छिदे अज्ज एदाए पादप्पहालेण अणेण पज्जलिदे । तं शम्पदं मालेमि णं । भोदु एव्वं दाव । (प्रकाशम्) [4]भावे भावे ।

जदिच्छशे लम्बदशाविशालं पावालअं शुत्तशदेहिं जुत्तम् ।
मंशं च खादुं तह तुट्टि कादुं चुहू चुहू चुक्कु चुहू चुहूत्ति ॥२२

वाहयसि । तदवतरावतर गर्भदासि । अवतर ।

(१) तमार्यचारुदत्तमभिसरसीति यत्सत्यमलंकृतास्म्यमुना वचनेन । सांप्रतं च यद्भवतु यद्भवतु ।

(२)एताभ्यां ते दशनखोत्पलमण्डलाभ्यां हस्ताभ्यां चाटुशतताडनलम्पटाभ्याम् ।
कर्षामि ते वरतनुं निजयानकात् केशेषु वालिदयितामिव यथा जटायुः ॥

(३) योऽसौ मम वचनावमानेन तदा रोषाग्निः संधुक्षितोद्यैतस्याः पादप्रहारेणानेन प्रज्वलितः । तत् सांप्रतं मारयाम्येनाम् । भवत्वेवं तावत् ।

(४) भाव भाव ।

यदीच्छसि लम्बदशाविशालं प्रावारकं सूत्रशतैर्युक्तम् ।
मांसं च खादितुं तथा तुष्टिं कर्तुं चुहू चुहू चुक्कु चुहू चुहू इति ॥

विटः । ततः किम् ।

संस्थानकः । [1]मम पिअं कलेहि ।

विटः । बाढं करोमि वर्जयित्वा त्वकार्यम् ।

संस्थानकः । [2]भावे अकज्जाह गन्धे वि णत्थि । लक्खलिआवि णत्थि ।

विटः । उच्यतां तर्हि ।

संस्थानकः । [3]मालेहि वशन्तशेणिअं ।

विटः । (कर्णौ पिधाय)

बालां स्त्रियं च नगरस्य विभूषणं च
वेश्यामवेशसदृशप्रणयोपचाराम् ।
एनामनागसमहं यदि घातयामि
केनोडुपेन परलोकनदीं तरिष्ये ॥२३

संस्थानकः । [4]अहं ते भेडकं दइश्शं । अण्णं च । विविक्ते उज्जाणे इध मालन्तं को तुमं पेक्खिश्शदि ।

विटः । पश्यन्ति मां दशदिशो वनदेवताश्च
चन्द्रश्च दीप्तकिरणश्च दिवाकरोऽयम् ।
धर्मानिलौ च गगनं च तथान्तरात्मा ।
भूमिस्तथा सुकृतदुष्कृतसाक्षिभूता ॥२४

संस्थानकः । [5]तेण हि पडन्तोवालिदं कदुअ मालेहि ।

विटः । मूर्ख अपध्वस्तोऽसि ।

संस्थानकः । [6]अधम्ममीलू एशे बुड्ढखोले । भोदु । थावलकं चेडं अणुणेमि । पुत्तका थावलका चेडा शोवण्णखडुआइं दइश्शं ।

स्थावरकः । [7]अहं पि पहिलिश्शं ।

---

(१) मम प्रियं कुरु । (२) भाव अकार्यस्य गन्धोऽपि नास्ति । लक्षणिकापि(!) नास्ति । (३) मारय वसन्तसेनाम् । (४) अहं ते भेडकं दास्यामि । अन्यच्च विविक्त उद्यान इह मारयन्तं कस्त्वां प्रेक्षिष्यते ।

(५) तेन हि पटान्तापवारितां कृत्वा मारय ।

(६) अधर्मभीरुरेष वृद्धकोलः । भवतु । स्थावरकं चेटमनुनयामि । पुत्रक स्थावरक चेट सुवर्णकटकानि दास्यामि । (७) अहमपि परिघास्यामि ।

संस्थानकः । सोवण्णं[1] दे पीठकं कालइस्सं ।
स्थावरकः । अहं[2] पि उवविशिस्सं ।
संस्थानकः । सव्वं[3] दे उच्छिट्ठं दइस्सं ।
स्थावरकः । अहं[4] पि खाइस्सं ।
संस्थानकः । सव्वचेडकाणं[5] महत्तलकं कलइस्सं ।
स्थावरकः । भट्टके[6] हुविस्सं ।
संस्थानकः । ताँ[7] मण्णेहि मम वअणं ।
स्थावरकः । भट्टके सव्वं कलेमि वज्जिअ अकज्जं ।
संस्थानकः । अकज्जाह[8] गन्धे वि णत्थि ।
स्थावरकः । भणादु[9] भट्टके ।
संस्थानकः । एणं[10] वशन्तशेणिअं मालेहि ।
स्थावरकः । पसीदिदु[11] भट्टके । इअं मए अणज्जेण अज्जा पवहणपरिवत्तणेण आणीदा ।
संस्थानकः । अले[12] चेडा तवावि ण पहवामि ।
स्थावरकः । पहवदि[13] भट्टके शलीलाह ण चालित्ताह । ता पशीदिदु पशीदिदु भट्टके । भाआमि क्खु अहं ।
संस्थानकः । तुमं[14] चेडे मम भविअ कश्श भाआशि ।
स्थावरकः । भट्टके[15] पललोअश्श ।

---

(१) सौवर्णं ते पीठकं कारयिष्यामि । (२) अहमप्युपवेक्ष्यामि ।
(३) सर्वं त उच्छिष्टं दास्यामि । (४) अहमपि खादिष्यामि ।
(५) सर्वचेटानां महत्तरकं कारयिष्यामि । (६) भट्टक भविष्यामि ।
(७) तन्मन्यस्व मम वचनम् । (८) भट्टक सर्वं करोमि वर्जयित्वाकार्यम् ।
(९) अकार्यस्य गन्धोऽपि नास्ति ।
(१०) भणतु भट्टकः । (११) एनां वसन्तसेनां मारय ।
(१२) प्रसीदतु भट्टकः । इयं मयानार्येणार्या प्रवहणपरिवर्तनेनानीता ।
(१३) अरे चेट तवापि न प्रभवामि । (१४) प्रभवति भट्टकः शरीरस्य न चारित्रस्य । तत्प्रसीदतु प्रसीदतु भट्टकः । बिभेमि खल्वहम् ।
(१५) त्वं चेटो मम भूत्वा कस्माद् बिभेषि । (१६) भट्टक परलोकात् ।

संस्थानकः । [1]के शे पललोऐ ।
स्थावरकः । [2]भट्टके शुकिददुक्किदश्श पलिणामे ।
संस्थानकः । [3]केलिशे शुकिदश्श पलिणामे ।
स्थावरकः । [4]जादिशे भट्टके बहुशोवण्णमण्डिदे ।
संस्थानकः । [5]दुक्किदश्श केलिशे ।
स्थावरकः । [6]जादिशे हग्गे पलपिण्डभक्खके भूदे । ता अकज्जं ण कलइस्शं ।
संस्थानकः । [7]अरे ण मालिश्शशि । (इति बहुविधं ताडयति ।)
स्थावरकः । [8]पिट्ठदु भट्टके मालेदु भट्टके अकज्जं ण कलइस्शं ।

जेण म्हि गब्भदासे विणिम्मिदे भाअधेअदोशेहिं ।
अहिअं च ण कीणिश्शं तेण अकज्जं पडिहलामि ॥२५

वसन्तसेना । [9]भाव शरणागदम्हि ।
विटः । काणेलीमातः मर्षय मर्षय । साधु स्थावरक साधु ।

अप्येष नाम परिभूतदशो दरिद्रः
प्रेष्यः परत्र फलमिच्छति नास्य भर्ता ।
तस्मादमी कथमिवाद्य न यान्ति नाशं
ये वर्धयन्त्यसदृशं सदृशं त्यजन्ति ॥२६

अपि च ।

रन्ध्रानुसारी विषमः कृतान्तो यदस्य दास्यं तव चेश्वरत्वम् ।
श्रियं त्वदीयां यदयं न भुङ्क्ते यदेतदाज्ञां न भवान् करोति ॥२७

---

(१) कः स परलोकः । (२) भट्टक सुकृतदुष्कृतस्य परिणामः ।
(३) कीदृशः सुकृतस्य परिणामः । (४) यादृशो भट्टको बहुसुवर्णमण्डितः । (५) दुष्कृतस्य कीदृशः । (६) यादृशोऽहं परपिण्डभक्षकः भूतः । तदकार्यं न करिष्यामि । (७) अरे न मारयिष्यसि ।
(८) ताडयतु भट्टको मारयतु भट्टकः । अकार्यं न करिष्यामि ।

येनासि गर्भदासो विनिर्मितो भागधेयदोषैः ।
अधिकं च न क्रेष्यामि तेनाकार्यं परिहरामि ।

(९) भाव शरणागतास्मि ।

संस्थानकः । (स्वगतम्) [1]अधम्माभिलुए वुड्ढखोडे । पलोओ**अमीए एत्थे** गब्भदासे । इग्गं लट्ठिअशाले कस्श भाआमि **वलपुलिशमणुश्शे** । (प्रकाशम्) [2]अले गब्भदासे चेडे गच्छ तुमं । ओवलके **पविशिअ वीशन्ते एअन्ते** चिट्ठ ।

स्थावरकः । [3]जं भट्टके आणवेदि । (वसन्तसेनामुपसृत्य) [4]**अज्जए एत्तिके मे** विहवे । (इति निष्क्रान्तः ।)

संस्थानकः । (परिकरं बध्नन्) [5]चिट्ठ वशन्तशेणिए चिट्ठ **मालइश्शं** ।

विटः । आः ममाग्रतो व्यापादयिष्यसि । (इति गले गृह्णाति)

संस्थानकः । (भूमौ पतति ।) [6]भावे भट्टकं मालीअदि । (**इति मोहं** नाटयति । चेतनां लब्ध्वा ।)

शैव्वकालं मए पुट्टे मंशेण अ घिएण अ ।
अज्ज कज्जे शमुप्पण्णे जादे मे वेलिए कधं ॥२.८

(**विचिन्त्य**) [7]भोदु । लद्धे मए उवाए । दिण्णा वुड्ढखोडेण शिलश्चालणशण्णा । ता एदं पेशिअ वशन्तशेणिअं मालइश्शं । एव्वं दाव । (प्रकाशम्) [8]**भावे** जं तुमं मए भणिदे तं कधं हगे एव्वं वड्ढकाहिं मल्लकप्पमाणाहिं **कुलाहिं जादे अकज्जं** कलेमि । एव्वं एदं अङ्गीकलावेदुं मए भणिदं ।

---

(१) अधर्मभीरुको वृद्धशृगालः । परलोकभीरुरेष गर्भदासः । अहं राष्ट्रियश्यालः कस्माद् बिभेमि वरपुरुषमनुष्यः ।

(२) अरे गर्भदास चेट गच्छ त्वम् । अपवरके प्रविश्य विश्रान्त **एकान्ते** तिष्ठ । (३) यद्भट्टक आज्ञापयति । (४) आर्ये एतावान् मे विभवः ।

(५) तिष्ठ वसन्तसेने तिष्ठ । मारयिष्यामि । (६) भावो भट्टकं मारयति ।

(७) सर्वकालं मया पुष्टो मांसेन च घृतेन च ।
अद्य कार्ये समुत्पन्ने जातो मे वैरिकः कथम् ॥

(८) भवतु लब्धो मया उपायः । दत्ता वृद्धशृगालेन शिरश्चालनसंज्ञा । तदेतं प्रेष्य वसन्तसेनां मारयिष्यामि । एवं तावत् । (९) भाव यत् त्वं मया भणितस्तत्कथमहमेवं बृहत्तरैर्मल्लकप्रमाणे कुले जातोऽकार्यं करोमि । एवमेतदङ्गीकारयितुं मया भणितम् ।

विटः । किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥२९

संस्थानकः । भावे एशा तव अग्गदो लज्जाअदि ण मं अङ्गीकलेदि । ता गच्छ । थावलअचेडे मए पिट्टिदे गदे वि । एशे पलाइअ गच्छदि । ता तं गेण्हिअ आअच्छदु भावे ।

विटः । (स्वगतम्)

अस्मत्समक्षं हि वसन्तसेना शौण्डीर्यभावान्न भजेत मूर्खम् ।
तस्मात्करोम्येष विविक्तमस्या विविक्तविश्रम्भरसो हि कामः ॥३०

(प्रकाशम्) एवं भवतु । गच्छामि ।

वसन्तसेना । (पटान्ते गृहीत्वा) णं भणामि सरणागदम्हि ।

विटः । वसन्तसेने न भेतव्यं न भेतव्यम् । काणेलीमातः वसन्तसेना तव हस्ते न्यासः ।

संस्थानकः । एव्वं । मम हत्थे एशा णाशेण चिट्ठदु ।

विटः । सत्यम् ।

संस्थानकः । शच्चं ।

विटः । (किञ्चिद्गत्वा) अथवा मयि गते नृशंसो हन्यादेनाम् । तदपवारितशरीरः पश्यामि तावदस्य चिकीर्षितम् । (इत्येकान्ते स्थितः ।)

संस्थानकः । भोदु मोडिश्शं । अधवा कवडकावडिके एशे बम्हणे वुड्ढखोडे कदावि ओवालिदशलीले गडिअ शिआले भविअ हुलुभुलिं कलेदि । ता एदश्श वञ्चणाणिमित्तं एव्वं दाव कलइश्शं । (कुसुमावचयं कुर्वन्नात्मानं मण्डयति ।) वाशू वाशू वशन्तशेणिए एहि ।

---

(१) भाव एषा तवाग्रतो लज्जते न मामङ्गीकरोति । तद्गच्छ । स्थावरकचेटो मया ताडितो गतोऽपि । एष प्रपलाय्य गच्छति तत्तं गृहीत्वागच्छतु भावः । (२) ननु भणामि शरणागताऽस्मि ।

(३) एवम् । मम हस्त एषा न्यासेन तिष्ठतु । (४) सत्यम् ।

(५) भवतु मोटयिष्यामि । अथवा कपटकापटिक एष ब्राह्मणो वृद्धशृगालः कदाप्यपवारितशरीरो गत्वा शृगालो भूत्वा कपटं करोति । तदेतस्य वञ्चनानिमित्तमेवं तावत् करिष्यामि । (६) वासु वासु वसन्तसेने एहि ।

विटः । अये कामी संवृत्तः । हन्त निर्वृतोऽस्मि । गच्छामि (इति निष्क्रान्तः ।)

संस्थानकः ।

सुवण्णअं देमि पिअं वदेमि पडेमि सीसेण सवेट्टणेण ।
तधा वि मं णेच्छसि सुद्धदन्ति किं सेवअं कट्ठमआ मणुस्सा ॥३१

वसन्तसेना । को एत्थ सन्देहो । (अवनतमुखी 'खलचरित' इत्यादि श्लोकद्वयं पठति ।)

खलचरित निकृष्ट जातदोषः कथमिह मां परिलोभसे धनेन ।
सुचरितचरितं विशुद्धदेहं न हि कमलं मधुपाः परित्यजन्ति ॥३२
यत्नेन सेवितव्यः पुरुषः कुलशीलवान् दरिद्रोऽपि ।
शोभा हि पण्स्त्रीणां सदृशजनसमाश्रयः कामः ॥३२

अवि अ । सहआरपादवं सेविअ ण पलासपादवं अङ्गीकरइस्सं ।

संस्थानकः । दीसीए धीए दलिद्दचालुदत्ताके सहआलपादवे कडे । हग्गे उण पलाशे भणिदे । किंशुके वि ण कडे । एव्वं तुमं गालिं मे देन्ती अज्जवि तं जेव्व चालुदत्ताकं सुमलेशि ।

वसन्तसेना । हिअअगदो जेव्व किं त्ति ण सुमरीअदि ।

संस्थानकः । अज्ज वि दे हिअअगदं तुमं च शमं जेव्व मोडेमि । ता दलिद्दशत्थवाहअमणुस्सकामुकिणि चिट्ठ चिट्ठ ।

---

(१) सुवर्णं ददामि प्रियं वदामि पतामि शीर्षेण सवेष्टनेन ।
तथापि मां नेच्छसि शुद्धदन्ति किं सेवकं कष्टमया मनुष्याः ॥

(२) कोऽत्र सन्देहः ।

(३) अपि च । सहकारपादपं सेवित्वा न पलाशपादपमङ्गीकरिष्यामि ।

(४) दास्याः पुत्रि दरिद्रचारुदत्तकः सहकारपादपः कृतः । अहं पुनः पलाशो भणितः । किंशुकोऽपि न कृतः । एवं त्वं मह्यं गालीं ददत्यद्यापि तमेव चारुदत्तकं स्मरसि ।

(५) हृदयगत एव किमिति न स्मर्यते ।

(६) अद्यापि ते हृदयगतं त्वां च सममेव मोटयामि । तद्दरिद्रसार्थवाहक-मनुष्यकामुकि तिष्ठ तिष्ठ ।

वसन्तसेना । भण भण। पुणो वि भण । सलाहणिआइं एदाइं अक्खराइं ।

संस्थानकः । पलित्ताअदु दासीए पुत्ते दलिद्दचालुदत्ताके तुमं ।

वसन्तसेना । परित्ताअदि जदि मं पेक्खदि ।

संस्थानकः । [१]किं शे शक्के वालिपुत्ते महिन्दे
लम्भापुत्ते कालणेमी शुबन्धू ।
रुद्दे राआ दोणपुत्ते जडाऊ
चाणक्के वा धुन्धुमाले तिशङ्कू ॥३४

अथवा । एदेवि दे ण लक्खन्ति ।

चाणक्केण जधा शीदा मालिदा भालदे जुगे ।
एव्वं दे मोडइश्शामि जडाऊ विअ दोवदिं ॥३५

(इति ताडयितुमुद्यतः ।)

वसन्तसेना । हा अत्ते कहिं सि । हा अज्जचारुदत्त एसो जणो असंपुण्णमणोरधो जेव्व विवज्जदि । ता उद्धं अक्कन्दइस्सं । अथवा वसन्तसेणा उद्धं अक्कन्ददि त्ति लज्जणीअं क्खु एदं । णमो अज्जचारुदत्तस्स ।

संस्थानकः । [२]अज्जवि गब्भदासि तरुश जेव्व पावरुश णामं गेण्हदि । (इति कण्ठे पीडयन्) [३]शुमल गब्भदासि शुमल ।

---

(१) भण भण पुनरपि भण श्लाघनीयान्येतान्यक्षराणि ।

(२) परित्रायतां दास्याः पुत्रश्चारुदत्तस्त्वाम् ।

(३) परित्रायते यदि मां प्रेक्षते ।

(४) किं स शक्रो वालिपुत्रो महेन्द्रो रम्भापुत्रः कालनेमिः सुबन्धुः ।
रुद्रो राजा द्रोणपुत्रो जटायुश्चाणक्यो वा धुन्धुमारस्त्रिशङ्कुः ॥

अथवा । एतेऽपि त्वां न रक्षन्ति ।

चाणक्येन यथा सीता मारिता भारते युगे ।
एवं त्वां मोटयिष्यामि जटायुरिव द्रौपदीम् ॥

(५) हा मातः कुत्रासि । हा आर्य चारुदत्त एष जनोऽसंपूर्णमनोरथ एव विपद्यते । तदूर्ध्वमाक्रन्दिष्यामि । अथवा वसन्तसेनोर्ध्वमाक्रन्दतीति लज्जनीयं खल्वेतत् । नम आर्यचारुदत्ताय । (६) अद्यापि गर्भदासी तस्यैव पापस्य नाम गृह्णाति । (७) स्मर गर्भदासि स्मर ।

वसन्तसेना । णमो अज्ज चारुदत्तस्स ।

संस्थानकः । मेल गन्मदाशि मल । (नाट्येन कण्ठे निपीडयन् मारयति । **वसन्तसेना** मूर्च्छिता पतति निश्चेष्टा ।)

संस्थानकः । (सहर्षम्)

एंदं दोशकलण्डिअं अविणअश्शावाशभूदं खलं
लत्तं तश्श किलागदश्श लमणे कालागदं आअदम् ।
किं एशे शमुदाहलामि णिअअं बाहूण शूलत्तणं
णीशाशे वि मले इअं व शुमला शीदा जधा भालदं ॥३६
ईच्छन्तं मम णेच्छशि त्ति गणिआ लोशेण मे मालिदा
शुण्णे पुप्फकलण्डके त्ति शहशा पाशेण उत्ताशिदा ।
शे वा वञ्चिद भादुके मम पिदा मादेव शा दोप्पदी
जे शे पेक्खदि णेदिशं ववशिदं पुत्ताह शूलत्तणं ॥३७

भोदु । शम्पदं वुड्ढखोडे आगमिश्शदि त्ति । ता ओशलिअ चिट्ठामि । (तथा करोति ।) (प्रविश्य चेटेन सह)

विटः । अनुनीतो मया स्थावरकश्चेटः । तद्यावत् काणेलीमातर पश्यामि । (परिक्रम्यावलोक्य च) अये मार्ग एव पादयो निपतितः । अनेन च पतता स्त्री व्यापादिता । भोः पाप किमिदमकार्यमनुष्ठितं त्वया । तवापि

---

(१) नम आर्यचारुदत्ताय। (२) म्रियस्व गर्भदासि म्रियस्व ।

(३) एतां दोषकरण्डिकामविनयस्यावासभूतां खलां
रक्तां तस्य किलागतस्य रमणे कालागतामागताम् ।
किमेष समुदाहरामि निजकं बाह्वोः शूरत्वं
निःश्वासेऽपि मृतोयं च सुमृता सीता यथा भारते ॥

(४) इच्छन्तं मां नेच्छसीति गणिका रोषेण मे मारिता
शून्यं पुष्पकरण्डकमिति सहसा पाशेनोत्त्रासिता ।
स वा वञ्चितो भ्रातृष्को मम पिता मातेव सा द्रौपदी
यः स पश्यति नेदृशं व्यवसितं पुत्रस्य शूरत्वम् ॥

भवतु । साम्प्रतं वृद्धशृगाल आगमिष्यतीति । तदपसृत्य तिष्ठामि ।

पापिनः पतनात् स्त्रीवधदर्शनेनार्तांव पातिता वयम्। आनिमित्तमेतत्। यत्सत्यं वसन्तसेनां प्रति शङ्कितं मे मनः। सर्वथा देवताः स्वस्ति करिष्यन्ति। (संस्थानकमुपसृत्य) काणेलीमातः एवं मयानुनीतः स्थावरकश्चेटः।

संस्थानकः। भावे शाअदं दे। पुत्तका थावलका चेडा तवावि शाअदं।

स्थावरकः। अधे इं।

विटः। मदीयं न्यासमुपनय।

संस्थानकः। कीदिशे णाशे।

विटः। वसन्तसेना।

संस्थानकः। गदो।

विटः। क।

संस्थानकः। भावश्श जेव्व पिट्ठदो।

विटः। (सवितर्कम्) न गता खलु सा तया दिशा।

संस्थानकः। तुमं कदमाए दिशाए गडे।

विटः। पूर्वया दिशा।

संस्थानकः। शा वि दक्खिणाए गडा।

विटः। अहं दक्षिणया।

संस्थानकः। शा वि उत्तलाए।

विटः। अत्याकुलं कथयसि। न शुध्यति मेऽन्तरात्मा। तत्कथय सत्यम्।

संस्थानकः। शेवामि भावश्श शीशं अत्तणकेलकेहिं पादेहिं। ता शप्पावेहि हिअअं। एशा मए मालिदा।

विटः। (सविषादम्) सत्यं त्वया व्यापादिता।

संस्थानकः। जइ मम वअणे ण पत्तिआआशि ता पेक्ख पढमं कहि-

---

(१) भाव स्वागतं ते। चेट पुनक स्थावरक तवापि स्वागतम्।

(२) अथ किम्। (३) कीदृशो न्यासः। (४) गता। (५) भावस्यैव पृष्ठतः। (६) त्वं कतमया दिशा गतः। (७) सापि दक्षिणया गता।

(८) साप्युत्तरया। (९) शपे भावस्य शीर्षमात्मायाश्चां पादाभ्याम्। तत् संस्थापय हृदयम्। एषा मया मारिता।

(१०) यदि मम वचने न प्रत्ययसे तत्पश्य प्रथमं राज्ञियश्यालसंस्थानस्य

अशिआलशण्ठाणाह शूलत्तणं । (इति दर्शयति ।)

विटः । हा हतोऽस्मि मन्दभाग्यः । (इति मूर्च्छितः पतति ।)

संस्थानकः । [१]ही ही उवलदे भावे ।

स्थावरकः । [२]शमश्शशदु शमश्शशदु भावे । अविचालिअं पवहणं आणन्तेण जेव्व मए पढमं मालिदा ।

विटः । (समाश्वस्य सकरुणम्) हा वसन्तसेने

दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रति-
र्हा हालंकृतभूषणे सुवदने क्रीडारसोद्भासिनि ।
हा सौजन्यनदि प्रहासपुलिने हा मादृशामाश्रये
हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः ॥३८

(सास्रम्) कष्टं भोः कष्टम् ।

किं नु नाम भवेत् कार्यमिदं येन त्वया कृतम् ।
अपापा पापकल्पेन नगरश्रीर्निपातिता ॥३९

(स्वगतम्) अये कदाचिदयं पाप इदमकार्यं मयि संक्रामयेत् । भवत्वितो गच्छामि । इति परिक्रामति । (सस्थानकमुपगम्य धारयति ।)

विटः । पाप मा मा स्प्राक्षीः । अलं त्वया । गच्छाम्यहम् ।

संस्थानकः । [३]अले वशन्तशेणिअं शअं जेव्व मालिअ मं दूशिअ कहिं पलाअशि । शंपदं ईदिशे हग्गे अणाधे पाविदे ।

विटः । अपध्वस्तोऽसि ।

संस्थानकः ।

[४]अत्थं शदं देमि शुवण्णअं दे कहावणं देमि शवोडिअं दे ।
एशे दुशद्दाण फलकमे मे शामाण्णए भोदु मणुश्शआणं ॥४०

स्रस्त्वम् । (१) ही ही उपरतो भावः । (२) समाश्वसितु समाश्वसितु भावः । अविचारितं प्रवहणमानयतैव मया प्रथमं मारिता । (३) अरे वसन्तसेनां स्वयमेव मारयित्वा मां दूषयित्वा कुत्र पलायसे । साप्रतमीदृशोऽहमनाथः प्राप्तः ।

(४) अर्थं शतं ददामि सुवर्णं ते कार्षापणं ददामि सवेष्टिकं ते ।
एष दुःशब्दानां फलकमो मे सामान्यको भवतु मनुष्यकाणाम् ॥

विटः । धिक् । तवैवास्तु ।

स्थावरकः । [1]शान्तं पावं । (शकारः हसति ।)

विटः । अप्रीतिर्भवतु विमुच्यतां हि हासो
धिक् प्रीतिं परिभवकारिकामनार्याम् ।
मा भूच्च त्वयि मम संगतं कदाचि-
दाच्छिन्नं धनुरिव निर्गुणं त्यजामि ॥४१

संस्थानकः । [2]भावे पशीद पशीद । एहि णअलीए पविशिअ क्रीडेम्ह ।

विटः । अपतितमपि तावत् सेवमानं भवन्तं
पतितमिव जनोऽयं मन्यते मामनार्यम् ।
कथमहमनुयायां त्वां हतस्त्रीकमेनं
पुनरपि नगरस्त्रीशङ्कितार्धोक्षिदृष्टम् ॥४२

(सकरुणम्) वसन्तसेने

अन्यस्यामपि जातौ मा वेश्या भूस्त्वं हि सुन्दरी ।
चारित्र्यगुणसंपन्ने जायेथा विमले कुले ॥४३

संस्थानकः । [3]मम केलके पुप्फकलण्डकजिण्णुज्जाणे वशन्तशेणिअं मालिअ कहिं पलाअशि । एहि । मम आवुत्तश्श अग्गदो ववहालं देहि । (इति धारयति ।)

विटः । आः तिष्ठ जाल्म । (इति खड्गमाकर्षति ।)

संस्थानकः । (सभयमपसृत्य ।) [4]किं ले भीदेशि । ता गच्छ ।

विटः । (स्वगतम्) न युक्तमवस्थातुम् । भवतु । यत्रार्यशर्विलकचन्दनकप्रभृतयः सन्ति तत्र गच्छामि । (इति निष्क्रान्तः ।)

---

(१) शान्तं पापम् ।

(२) भाव पसीद प्रसीद । एहि नगर्यां प्रविश्य क्रीडावः ।

(३) मदीयपुष्पकरण्डकजीर्णोद्याने वसन्तसेनां मारयित्वा कुत्र पलायसे । एहि । मम आवुत्तस्याग्रतो व्यवहारं देहि ।

(४) किं रे भीतोऽसि । तद्गच्छ ।

संस्थानकः । [1]णिधणं गच्छ । अले थावलका पुत्तका कीलिशे मए कडे ।
स्थावरकः । [2]भट्टके महन्ते अकजे कडे ।
संस्थानकः । [3]अले चेडे किं भणाशि अकजे कडे त्ति । भोदु । एव्वं दाव । (नानाभरणान्यवतार्य) [4]गेण्ह एदं अलंकारअं । मए ताव दिण्णे । जे-त्तिके वेले अलंकलेमि तेत्तिकं वेलं मम । अण्णं तव ।
स्थावरकः । [5]भट्टके जेव्व एदे शोहन्ति । किं मम एदेहिं ।
संस्थानकः । [6]ता गच्छ एदाइं गोणाइं गेण्हिअ मम केलकाए पाशादबा-लग्गपदोलिकाए चिट्ठ जाव हग्गे आअच्छामि ।
स्थावरकः । [7]जं भट्टके आणवेदि । (इति निष्क्रान्तः ।)
संस्थानकः । अत्तपलित्ताणे भावे गदे अदंशणं । चेडे वि पाशादबालग्ग-पदोलिकाए णिअलपूलिदं कदुअ थावइश्शं । एव्वं मन्ते लक्खिदे भोदि । ता गच्छामि । अधवा पेक्खामि दाव एदं किं एशा मला आदु पुणो वि मालइश्शं । (अवलोक्य) कैधं शुमला । भोदु । एदिणा पावालएण पच्छा-देमि णं । अधवा णामङ्किदे एशे । ता के वि अजपुलिशे पच्चहिजाणेदि । भोदु । एदिणा वादालीपुञ्छिदेण शुक्खपण्णपुडेण पच्छादेमि । (तथा कृत्वा

(१) निधनं गच्छ । अरे स्थावरक पुत्रक कीदृशं मया कृतम् ।
(२) भट्टक महदकार्यं कृतम् ।
(३) अरे चेट किं भणस्यकार्यं कृतमिति । भवत्वेवं तावत् ।
(४) गृहाणेममलंकारम् । मया तावदत्तः यावत्यां वेलायामलंकरोमि तावतीं वेलां मम । अन्या तव । (५) भट्टके एवैते शोभन्ते । किं ममैतैः ।
(६) तद् गच्छ । एतौ वृषभौ गृहीत्वा मदीयायां प्रासादबालाग्रप्रतोलि-कायां तिष्ठ यावदहमागच्छामि । (७) यद्भट्टक आज्ञापयति ।
(८) आत्मपरित्राणे भावो गतोऽदर्शनम् । चेटमपि प्रासादबालाग्रप्रतो-लिकायां निगडपूरितं कृत्वा स्थापयिष्यामि । एवं मन्त्रो रक्षितो भवति । तद्गच्छामि । अथवा पश्यामि तावदेनां किमेषा मृताऽथवा पुनरपि मारयि-ष्यामि । (९) कथं सुमृता । भवतु । एतेन प्रावारकेण प्रच्छादयाम्येनाम् । अथवा नामाङ्कितं एषः । तत्कोऽप्यार्यपुरुषः प्रत्यभिज्ञास्यति । भवतु । एतेन बातालीपुञ्छितेन शुष्कपर्णपुटेन प्रच्छादयामि ।

विचिन्त्य) [1]भोदु । एव्वं दाव । शम्पदं आधिअलणं गाच्छिअ ववहालं लिहावेमि जहा अत्थश्श कालणादो शत्थवाहचालुदत्ताकेण ममकेलकं पुप्फकलण्डकं जिण्णुजाणं पवेशिअ वशन्तशोणिआ वावादिदे त्ति ।

चालुदत्तविणाशाय कलेमि कवडं णवं ।
णअलीए विशुद्धाए पशुघादं व्व दालुणम् ॥४४

भोदु । [2]गैच्छामि । (इति निष्क्रम्य दृष्ट्वा सभयम्) । अविदमादिके । जेण जेण गच्छामि मग्गेण तेण जेव्व एशे दुट्टशमणके गहिदकशाओदकं चीवलं गेण्हिअ आअच्छदि । एशे मऐ णाशि च्छिअ वाहिदे कदवेले कदा वि मं पेक्खिअ एदेण मालिदे त्ति पआशइश्शदि । ता कधं गच्छामि । (अवलोक्य) [3]भोदु एदं अद्धपडिदं पगालखण्डं उलङ्घिअ गच्छामि ।

एशे म्हि तुलिदतुलिदे लङ्काणअलीए गआण गच्छन्ते ।
भमीए पाआले हणूमशिहले विअ महेन्दे ॥४५

(इति निष्क्रान्तः । प्रविश्य पटीक्षेपेण संवाहको)

भिक्षुः । [4]पक्खालिदे एशे मए चीवलखण्डे । किं णु हु शाहाए शुक्खावइश्शं । इध वाणला विलुप्पन्ति । किं णु हु भूमीए । धूलीदोशे भोदि ।

---

(१) भवतु । एवं तावत् । सांप्रतमधिकरणं गत्वा व्यवहारं लेखयामि यथाऽर्थस्य कारणात् सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रवेश्य वसन्तसेना व्यापादितेति ।

चारुदत्तविनाशाय करोमि कपटं नवम् ।
नगर्यां विशुद्धायां पशुघातमिव दारुणम् ॥

भवतु । गच्छामि । (२) अविदमादिके । येन येन गच्छामि मार्गेण तेनैवैष दुष्टश्रमणको गृहीतकषायोदकं चीवरं गृहीत्वागच्छति । एष मया नासां छित्त्वा वाहितः कृतवैरः कदापि मां प्रेक्ष्यैतेन मारितेति प्रकाशयिष्यति । तत्कथं गच्छामि । (३) भवतु । एतमर्धपतितं प्राकारखण्डमुल्लङ्घ्य गच्छामि ।

एषोऽहं त्वरितत्वरितो लङ्कानगर्यां गगने गच्छन् ।
भूम्यां पाताले हनूमच्छिखरे इव महेन्द्रः ॥

(४) प्रक्षालितमेतन्मया चीवरखण्डम् । किं नु खलु शाखायां शुष्कं करिष्यामि । इह वानरा विलुम्पन्ति । किं नु खलु भूम्याम् । धूलीदोषो

ता कहिं पशालिअ शुक्खावइश्शं। (दृष्ट्वा) [1]भोदु। इध वादालीपुञ्जिदे शुक्खवत्तशञ्चए पशालइश्शं। (तथा कृत्वा) [2]णमो बुद्धश्श। (इत्युपविशति) [3]भोदु धम्मक्खलाइं उदाहलामि। ('पञ्चजण जेण मालिदा' इत्यादि पूर्वोक्तं पठति।) [4]अधवा अलं मम एदेण शग्गेण। जाव ताए बुद्धोवासिआए पच्चुवआलं ण कलेमि जाए दशाणं शुवण्णकाणं किदे जूदिअलेहिं णिक्कीदे। तदो पहुदि ताए कीदं विअ अत्ताणअं अवगच्छामि। (दृष्ट्वा।) [5]किं णु हु पण्णोदले शमूशशदि। अधवा

वादादवेण तत्ता चीवलतोएण तिम्मिदा पत्ता।
एदे विथिण्णपत्ता मण्णे पत्ता विअ फुलन्ति ॥४६

(वसन्तसेना संज्ञां लब्ध्वा हस्तं दर्शयति।)

भिक्षुः। हा हा शुद्धालंकालभूशिदे इत्थिआहत्थे णिक्कमदि। कधं दुदिए वि हत्थे। (बहुविधं निर्वर्ण्य) [6]पञ्चभिआणामि विअ एदं हत्थं। अधवा किं विचालेण। शच्चं शे जेव्व हत्थे जेण मे अभअं दिण्णं। भोदु पेक्खिदव्वशं। (नाट्येनोद्घाट्य दृष्ट्वा प्रत्यभिज्ञाय च) [7]शा जेव्व बुद्धोवासिआ। (वसन्तसेना पानीयमाकाङ्क्षति।)

भिक्षुः। [8]कधं उदअं मग्गेदि। दूले च दिग्घिआ। किं दाणिं एत्थ

भवति। तत्कुत्र प्रसार्य शुष्कं करिष्यामि। (१) भवतु। इह वातालीपुञ्जिते शुष्कपत्रसञ्चये प्रसारयिष्यामि। (२) नमो बुद्धाय। (३) भवतु धर्माश्चराण्युदाहरामि। (४) अथवाऽलं ममैतेन स्वर्गेण। यावत्तस्या वसन्तसेनाया बुद्धोपासिकायाः प्रत्युपकारं न करोमि यया दशानां सुवर्णकानां कृते द्यूतकराभ्यां निष्क्रीतः। ततः प्रभृति तया क्रीतमिवात्मानमवगच्छामि। (५) किं नु खलु पर्णोदरे समुच्छ्वसिति। अथवा

वातातपेन तप्तानि चीवरनोयेन तिमितानि पत्राणि।
एतानि विस्तीर्णपत्राणि मन्ये पद्मा इव स्फुरन्ति॥

(६) हा हा शुद्धालंकारभूषितः स्त्रीहस्तो निष्क्रामति। कथं द्वितीयोऽपि हस्तः। (७) प्रत्यभिज्ञानामीव एतं हस्तम्। अथवा किं विचारेण। सत्यं स एव हस्तो येन मेऽभयं दत्तम्। भवतु। पश्यामि। (८) सैव बुद्धोपासिका।

(९) कथमुदकं याचते। दूरे च दीर्घिका। किमिदानीमत्र करिष्यामि।

कलइंसं। भोदु। एदं चीवलं शे उवलि **गालइंसं**। (तथा करोति। **वसन्तसेना** संज्ञां लब्ध्वोत्तिष्ठति। भिक्षुः पटान्तेन वीजयति।)

वसन्तसेना। अज्ज को तुमं।

भिक्षुः। किं मं ण सुमलेदि बुद्धोवासिआ दशसुवण्णणिक्कीदं।

वसन्तसेना। सुमरामि। ण उण जधा अज्जो भणादि। वरं अहं उवरदा जेव्व।

भिक्षुः। बुद्धोवासिए किं णोदं।

वसन्तसेना। (सनिर्वेदम्) जं सरिसं वेसभावस्स।

भिक्षुः। उट्ठेदु उट्ठेदु बुद्धोवासिआ एदं पादवशमीवजादं लदं ओलम्बिअ। (इति लतां नामयति। वसन्तसेना गृहीत्वोत्तिष्ठति।)

भिक्षुः। एंदश्शिं विहाले मम धम्मबहिणिआ चिट्ठदि। तहिं शमश्शशिदमणा भविअ उवासिआ गेहं गमिश्शदि। ता शेणं शेणं गच्छदु बुद्धोवासिआ। (इति परिक्रामतः। दृष्ट्वा) ओशलध अज्जा ओशलध। एशा तलुणी इत्थिआ। एशे भिक्खु त्ति। शुद्धे मम धम्मे।

हत्थशंजद मुहशंजद इन्दिअशंजदे शे क्खु माणुशे।
किं कलेदि तश्श लाअडले पललोअ हत्थे णिश्चले ॥४७

(इति निष्क्रान्ताः सर्वे।)

वसन्तसेनामोटनो नामाष्टमोऽङ्कः।

भवतु एतच्चीवरमस्या उपरि गालयिष्यामि। (१) आर्य कस्त्वम्।

(२) किं मां न स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतम्।

(३) स्मरामि। न पुनरर्थार्थो भणति। वरमहमुपरतैव।

(४) बुद्धोपासिके किं त्विदम्। (५) अत्यद्भुतं वेशभावस्य।

(६) उत्तिष्ठतूत्तिष्ठतु बुद्धोपासिका एतां पादपसमीपजातां लतामवलम्ब्या।

(७) एतस्मिन् विहारे मम धर्मभागिनी तिष्ठति। तत्र समाश्वस्तमना भूत्वोपासिका गेहं गमिष्यति। तच्छनैः शनैर्गच्छतु बुद्धोपासिका (८) अपसरत आर्या अपसरत। एषा तरुणी स्त्री। एष भिक्षुरिति। शुद्धो ममैष धर्मः।

हस्तसंयतो मुखसंयत इन्द्रियसंयतः स खलु मनुष्यः।
किं करोति तस्य राजकुलं परलोको हस्ते निश्चलः॥

नवमोऽङ्कः ।

(ततः प्रविशति शोधनकः ।)

शोधनकः । [1]आणत्तम्हि अधिअरणभोइएहिं । अरे सोहणआ ववहार-मण्डवं गदुअ आसणाइं सज्जीकरेहि त्ति । ता जाव अधिअरणमण्डवं सज्जिदुं गच्छामि । (परिक्रम्यावलोक्य च ।) [2]एदं अधिअरणमण्डवं । एस पविसामि । (प्रविश्य संमार्ज्यासनमाधाय) [3]विवित्तं कारिदं मए अधिअरणमण्डवं । विर-इदा मए आसणा । ता जाव अधिअरणिआणं उण णिवेदेमि । (परिक्रम्या-वलोक्य च ।) [4]कधं एसो रट्ठिअसालो दुट्ठदुज्जणमणुस्सो इदो एव्व आअ-च्छदि । ता दिट्ठिपधं परिहरिअ गमिस्सं । (इत्येकान्ते स्थितः । ततः प्रवि-शत्युज्ज्वलवेषधारी)

संस्थानकः । [5]ण्हादेऽहं शलिलजलेहिं पाणिएहिं
उज्जाणे उववणकाणणे णिशण्णे
णालीहिं शह जुवदीहिं इत्थिकाहिं
गन्धव्वेहिं शुविहिदेहिं अङ्गकेहिं ॥१

खणेण गण्ठी खण जूलके मे खणेण मे चञ्चलकुन्तले वा ।
खणेण मुक्के खण उद्धचूडे चित्ते विचित्ते हगे लाअशाले ॥२

---

(१) आज्ञप्तोऽस्मि अधिकरणभोजकैः । अरे शोधनक व्यवहारमण्डपं गत्वास-नानि सज्जीकुर्विति । तद्यावदधिकरणमण्डपं सज्जितुं गच्छामि । (२) एषोऽधि-करणमण्डपः । एष प्रविशामि । (३) विविक्तः कारितो मयाधिककरणमण्डपः । विरचितानि च मयासनानि । तद्यावदधिकरणिकानां निवेदयामि (४) कथमेष राष्ट्रियश्यालो दुष्टदुर्जनमनुष्य इत एवागच्छति । तद्दृष्टिपथं परिहृत्य गमिष्यामि ।

(५) स्नातोऽहं सलिलजलैः पानीयैरुद्यान उपवनकानने निषण्णः ।
नारीभिः सह युवतीभिः स्त्रीभिर्गन्धर्व इव सुविहितैरङ्गकैः ॥
क्षणेन ग्रन्थिः क्षणं जूटको मे क्षणन मे चञ्चलकुन्तला वा ।
क्षणेन मुक्ताः क्षणमूर्ध्वचूडाश्चित्रो विचित्रोऽहं राजश्यालः ॥

अवि अ । विशगण्ठिगब्भपविट्ठेण विअ कीडएण अन्तलं मग्गमाणेण पाविदं मए महदन्तलं । ता कश्श एदं किविणचेट्टिअं पाडइश्शं । (स्मृत्वा ।) आं[1] शुमलिदं मए । दलिद्दचालुदत्तश्श एदं किविणचेट्टिअं पाडइश्शं । अण्णं च । दलिद्दे क्खु शे । तश्श शव्वं शम्भावीअदि । भोदु । अधिअलणमण्डवं गदुअ अग्गदो ववहालं लिहावइश्शं । जधा । चालुदत्ताकेण वशन्तशेणेआ मोडिअ मालिदा । ता जाव अधिअलणमण्डवं जेव्व गच्छामि । (परिक्रम्यावलोक्य च ।) एदं[2] तं अधिअलणमण्डवं । एत्थ पविशामि । (प्रविश्यावलोक्य च ।) कधं[3] आशणाइं दिण्णाइं चिट्ठन्ति । दाव आअश्शन्ति अधिअलणभोइआ । एदश्शिं दुव्वचत्तले मुहुत्तअं उवविशिअ पडिवालइश्शं । (तथा स्थितः ।)

शोधनकः । (अन्यतः परिक्रम्य पुरो दृष्ट्वा ।) एदे[4] अधिअराणिआ आअच्छन्ति । ता जाव उपसप्पामि । (इत्युपसर्पति । ततः प्रविशति श्रेष्ठिकायस्थादिपरिवृतोऽधिकरणिकः ।)

अधिकरणिकः । भो भोः श्रेष्ठिकायस्थौ ।

श्रेष्ठिकायस्थौ । आणवेदु अज्जो ।

अधिकरणिकः । व्यवहारपराधीनतया दुष्करं खलु परचित्तग्रहणमधिकरणिकैः ।

छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं
स्वान् दोषान् कथयन्ति नाधिकरणे रागाभिभूताः स्वयम् ।

अपि च । विषग्रन्थिगर्भप्रविष्टेनेव कीटकेनान्तरं मार्गमाणेन प्राप्तं मया महदन्तरम् । तत्कस्येदं कृपणचेष्टितं पातयिष्यामि । (१) आं स्मृतम् । दरिद्रचारुदत्तस्यैतत्कृपणचेष्टितं पातयिष्यामि । अन्यच्च दरिद्रः खलु सः । तस्य सर्वं संभाव्यते । भवतु । अधिकरणमण्डपं गत्वाऽग्रतो व्यवहारं लेखयिष्यामि । यथा चारुदत्तेन वसन्तसेना मोटयित्वा मारिता । तद्यावदधिकरणमण्डपमेव गच्छामि । (२) एषोऽस्मदधिकरणमण्डपः । अत्र प्रविशामि (३) कथमासनानि दत्तानि तिष्ठन्ति । तावदागच्छन्त्यधिकरणभोजकाः । एतस्मिन् दूर्वाचत्वरे मुहूर्तमुपविश्य प्रतिपालयिष्यामि ।

(४) एतेऽधिकरणिका आगच्छन्ति । तद्यावदुपसर्पामि । (५) आज्ञापयत्वार्यः

तैः पक्षापरपक्षवर्धितबलैर्दोर्वैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥३

अपि च। छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान् दोषान् कथयन्ति नाधिकरणे सन्तोऽपि नष्टा ध्रुवम्।
ये पक्षापरपक्षदोषसहिताः पापानि संकुर्वते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥४

यतः। अधिकरणिकः खलु

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन-
स्तुल्यो मित्रपरस्वकेषु चरिते दृष्ट्वैव दत्तोत्तरः।
क्ली बान् पालयिता शठान् व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः ॥५

श्रेष्ठिकायस्थौ। [1]अज्जस्स वि णाम गुणे दोसो त्ति वुच्चदि। जइ एव्वं ता चन्दालोए वि अन्धआरो त्ति वुच्चदि।

अधिकरणिकः। भद्र शोधनक अधिकरणमण्डपस्य मार्गमादेशय।

शोधनकः। [2]एदु एदु अधिअरणभोइओ एदु। (इति परिक्रामन्ति।)

शोधनकः। [3]एदं अधिअरणमण्डवं। ता पविसन्तु अधिकरणभोइआ। (सर्वे च प्रविशन्ति।)

अधिकरणिकः। भद्र शोधनक बहिर्निष्क्रम्य ज्ञायतां कः कः कार्यार्थीति।

शोधनकः। [4]जं अज्जो आणवेदि। (इति निष्क्रम्य) [5]अज्जा अधिअरणिआ भणन्ति को को इध कज्जत्थी त्ति।

संस्थानकः। (सदर्पम्) [6]उवत्थिए अधिअलणिए। (साटोपं परिक्रम्य) [7]हंगे वलपुलिशमणुश्शे वाशुदेवे लट्ठिअशाले लाअशाले कज्जत्थी।

---

(१) आर्यस्यापि नाम गुणे दोष इति उच्यते। यद्येवं तदा चन्द्रालोकेऽप्यन्धकार इत्युच्यते। (२) एतेवेत्यधिकरणभोजक एतु।

(३) एषोऽधिकरणमण्डपः। तत्प्रविशन्त्वधिकरणभोजकाः।

(४) यदार्य आज्ञापयति। (५) आर्या अधिकरणिका भणन्ति कः क इह कार्यार्थीति। (६) उपस्थिता अधिकरणिकाः। (७) अहं वरपुरुषमनुष्यो

शोधनकः। (ससंभ्रमम्) [1]हीमादिके। पढमं जेव्व रट्ठिअसालो कज्जत्थी। मोदु। अज्ज मुहुत्तं चिट्ठ। दाव अधिअरणिआणं णिवेदेमि। (उपगम्य) [2]अज्जा एसो क्खु रट्ठिअसालो कज्जत्थी ववहारं उवत्थिदो।

अधिकरणिकः। कथं प्रथममेव राष्ट्रियश्यालः कार्यार्थी। यथा सूर्योदय उपरागो महापुरुषनिपातमेव कथयति। शोधनक व्याकुलेनाद्य व्यवहारेण भवितव्यम्। भद्र निष्क्रम्योच्यतां गच्छाद्य न दृश्यते तव व्यवहार इति।

शोधनकः। [3]जं अज्जो आणवेदि त्ति। (निष्क्रम्य संस्थानकमुपगम्य।) [4]अज्ज अधिअरणिआ भणन्ति। अज्ज गच्छ। ण दीसदि तव ववहारो।

संस्थानकः। (सक्रोधम्) [5]किं ण दीसदि मम ववहाले। जइ ण दीसदि तदो आउत्तं लाआणं पालअं बहिणीवदिं विण्णविअ बहिणिअं अत्तिकं च विण्णविअ एदं अधिअलणिअं फेलिअ एत्थ अण्णं अधिअलणिअं ठावइस्सं। (इति गन्तुमिच्छति।)

शोधनकः। [6]अज्ज रट्ठिअसालअ मुहुत्तअं चिट्ठ। दाव अधिअरणिआणं निवेदेमि। (अधिकरणिकमुपगम्य।) [7]एसो रट्ठिअसालो कुविदो भणादि। (इति तदुक्तं भणति।)

अधिकरणिकः। सर्वमस्य मूर्खस्य संभाव्यते। भद्र उच्यताम्। आगच्छ दृश्यते तव व्यवहारः।

वासुदेवो राष्ट्रियश्यालो राजश्यालः कार्यार्थी।

(१) हन्त। प्रथममेव राजश्यालः कार्यार्थी। भवतु। आर्य मुहूर्तं तिष्ठ तावदधिकरणिकानां निवेदयामि। (२) आर्यः एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः।

(३) यदार्य आज्ञापयति। (४) आर्य अधिकरणिका भणन्ति। अद्य गच्छ। न दृश्यते तव व्यवहारः।

(५) किं न दृश्यते मम व्यवहारः। यदि न दृश्यते तदा आवुत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य भगिनीं मातरं च विज्ञाप्यैतमधिकरणिकं दूरीकृत्यान्यमधिकरणिकमत्र स्थापयिष्यामि।

(६) आर्य राष्ट्रियश्याल मुहूर्तकं तिष्ठ। तावदधिकरणिकानां निवेदयामि। (७) एष राष्ट्रियश्यालः कुपितो भणति।

शोधनकः। (संस्थानकमुपगम्य।) [1]अज अधिअरणिआ भणन्ति। आअच्छ दीसदि तव ववहारो। ता पविसदु अज्जो।

संस्थानकः। [2]ही पढमं भणादि न दीशदि शंपदं दीशदि त्ति। ता णाम भीदभीदा अधिअलणभोइआ। जेत्तिअं हगे भणिश्शं तेत्तिअं पत्तिआवइश्शं। भोदु। पविशामि। (प्रविश्योपसृत्य।) [3]शुशुहं अम्हाणं तुम्हाणं पि शुहं देमि ण देमि च।

अधिकरणिकः। (स्वगतम्।) अहो स्थिरसंस्कारता व्यवहारार्थिनः। (प्रकाशम्।) उपविश्यताम्।

संस्थानकः। [4]आं। अत्तणकेलका मे भूमी। ता जहिं मे लोअदि तहिं उवविशामि। (श्रेष्ठिनं प्रति।) [5]एश उवविशामि। (शोधनकं प्रति।) [6]णं एत्थ उवविशामि। (इत्यधिकरणिकमस्तके हस्तं दत्त्वा।) [7]एश उवविशामि। (इति भूमावुपविशति।)

अधिकरणिकः। भवान् कार्यार्थी।

संस्थानकः। [8]अध इं।

अधिकरणिकः। तत्कार्यं कथय।

संस्थानकः। [9]कण्णे कज्जं कधइश्शं। एअवडके मल्लकप्पमाणाह कुले हगे जादे।

लाअशशुले मम विदा लाआ तादइश हो‌इ जामादा।

---

(१) आर्य अधिकरणिका भणन्ति। आगच्छ। दृश्यते तव व्यवहारः। तत्प्रविशत्वार्यः।

(२) प्रथमं भणन्ति न दृश्यते सांप्रतं दृश्यते इति। तन्नाम भीतभीता अधिकरणभोजकाः। यद्यदहं भणिष्यामि तत्तत् प्रत्याययिष्यामि। भवतु। प्रविशामि। (३) सुखमस्माकं युष्माकमपि सुखं ददामि न ददामि च।

(४) आं। आत्मीयैषा भूमिः। तत्र यत्र मह्यं रोचते तत्रोपविशामि। (५) एष उपविशामि। (६) नन्वत्रोपविशामि। (७) एष उपविशामि।

(८) अथ किम्।

(९) कर्णे कार्यं कथयिष्यामि। एवं बृहति मल्लकप्रमाणे कुलेऽहं जातः। राजश्वशुरो मम पिता राजा तातस्य भवति जामाता।

लाअशिआले हग्गे ममावि बहिणीवदी लाआ ॥६

अधिकरणिकः । सर्वं ज्ञायते ।

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥७

तदुच्यतां कार्यम् ।

संस्थानकः । ऐव्वं भणामि । अवलद्धाह वि ण अ मे किं पि कल-इश्शदि । तदो तेण बहिणीवदिणा परितुट्ठेण मे कीलिदुं लक्खिदुं शव्वु-आणाणं पवले पुप्फकलण्डकजिण्णुज्जाणे दिण्णे । तहिं च पेक्खिदुं अणुदिअहं शोशावेदुं शोधावेदुं पोट्टावेदुं लुणावेदुं गच्छामि । देव्वजोएण पेक्खामि ण पेक्खामि वा इत्थिआशलीलं णिवडिदं ।

अधिकरणिकः । अथ ज्ञायते का स्त्री विपन्नेति ।

संस्थानकः । [2]हंहो अधिअलणभोइआ किंत्ति ण आणामि तं तादृशीं णअलमण्डणं कञ्चणशदभूशणिअं । केण पि कुपुत्तेण अत्थकलवत्तश्श कालणादो शुणं पुप्फकलण्डकजिण्णुज्जाणं पवेशिअ बहुपाशबलक्कालेण वसन्तशेणिआ मालिदा । ण मए- (इत्यर्धोक्ते मुखमावृणोति ।)

अधिकरणिकः । अहो नगररक्षिणां प्रमादः । भोः श्रेष्ठिकायस्थौ । न मयेति व्यवहारपदं प्रथममभिलिख्यताम् ।

कायस्थः । [3]जं अज्जो आणवेदि । (तथा कृत्वा) [4]अज्ज लिहिदं ।

राजश्यालोऽहं ममापि भगिनीपती राजा ॥

(१) एवं भणामि । अपराद्धस्यापि न च मे किमपि करिष्यति । ततस्तेन भगिनीपतिना परितुष्टेन क्रीडितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरण्डकजीर्णोद्यानं दत्तम् । तत्र च प्रेक्षितुमनुदिवसं शुष्कं कारयितुं शोधयितुं पुष्टं कारयितुं लूनं कारयितुं गच्छामि । दैवयोगेन पश्यामि न पश्यामि वा स्त्रीशरीरं निपतितम् ।

(२) हंहो अधिकरणभोजकाः किमिति न जानामि तां तादृशीं नगरमण्डनं काञ्चनशतभूषणाम् । केनापि कुपुत्रेणार्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण वसन्तसेना मारिता न मया ।

(३) यदार्य आज्ञापयति । (४) आर्य लिखितम् ।

संस्थानकः । (स्वगतम्) [1]हीमादिके उत्तलाअन्तेण विअ पाअशापिण्डालकेण अज्ज मए अत्ता एव्व णिण्णाशिदो । भोदु । एव्वं दाव । (प्रकाशम्) अहो अधिअलणभोइआ णं भणामि मए जेव्व दिट्ठा । किं कोलाहलं कलेध । (इति पादेन लिखितं प्रोञ्छति ।)

अधिकरणिकः । कथं त्वया ज्ञातं यथा खल्वर्थनिमित्तं बाहुपाशेन व्यापादिता ।

संस्थानकः । [2]हंहो णूणं शुण्णशूणाए मोघट्ठाणाए णिशुवण्णकेहिं आहलणट्ठाणेहिं तक्केमि ।

श्रेष्ठिकायस्थौ । [3]जुज्जदि वि अ ।

संस्थानकः । (स्वगतम्) [4]दिट्ठिआ पत्युज्जीविदम्हि । आविदमादिके ।

श्रेष्ठिकायस्थौ । [5]भो कं एसो ववहारो अवलम्बदि ।

अधिकरणिकः । इह हि द्विविधो व्यवहारः ।

श्रेष्ठिकायस्थौ । [6]केरिसो ।

अधिकरणिकः । वाक्यानुसारेणार्थानुसारेण च । यस्तावद्वाक्यानुसारेण स खल्वर्थिप्रत्यर्थिभ्यः । यश्चार्थानुसारेण स चाधिकरणिकबुद्धिनिष्पाद्यः ।

श्रेष्ठिकायस्थौ । [7]ताँ वसन्तसेणामादरं अवलम्बदि ववहारो ।

अधिकरणिकः । एवमिदम् । भद्र शोधनक वसन्तसेनामातरमनुद्वेजयन्नाह्वय ।

शोधनकः । [8]तधा । (इति निष्क्रम्य गणिकामात्रा सह प्रविश्य) एदु एदु अज्जा ।

(१) हीमादिके त्वरां कुर्वाणेनेव पायसपिण्डारकेणाद्य मयात्मैव निर्णाशितः मवत्वेवं तावत् । अहो अधिकरणभोजका ननु भणामि मयैव दृष्टा । किं कोलाहलं कुरुत ।

(२) हंहो नूनं शून्यशून्यया मोघस्थानया ग्रीवालिकया निःसुवर्णकैराभरणस्थानैस्तर्कयामि । (३) युज्यत इव ।

(४) दिष्ट्या प्रत्युज्जीवितोऽस्मि । (५) भोः कमेष व्यवहारोऽवलम्बते ।

(६) कीदृशः ।

(७) तद्वसन्तसेनामातरमवलम्बते व्यवहारः । (८) तथा । एत्वेत्वार्या ।

वसन्तसेनामाता । गेंदा मे दारिआ मित्तघरअं अत्तणो जोव्वणं अणुभविदुं । एसो उण दीहाऊ भणादि आअच्छ अधिअरणिओ सद्दावेदि । ता मोहपरवसं विअ अत्ताणअं अवगच्छामि । हिअअं मे थरथरेदि । अज्ज आदेसेहि मे अधिअरणमण्डवस्स मग्गं ।

शोधनकः । एदु एदु अज्जा । (उभौ परिक्रामतः ।) एदं अधिअरणमण्डवं । एत्थ पविसदु अज्जा । (इत्युभौ प्रविशतः ।)

वसन्तसेनामाता । (उपसृत्य) सुदं तुम्हाणं भोदु भावमिस्साणं ।

अधिकरणिकः । भद्रे स्वागतम् । आस्यताम् ।

वसन्तसेनामाता । तधा । (इत्युपविष्टा ।)

संस्थानकः । (साक्षेपम्) आगदाशि बुड्ढकुट्टणि आगदाशि ।

अधिकरणिकः । अये त्वं किल वसन्तसेनाया माता ।

वसन्तसेनामाता । अध इं ।

अधिकरणिकः । अथेदानीं वसन्तसेना क्व गता ।

वसन्तसेनामाता । मित्तघरअं ।

अधिकरणिकः । किन्नामधेयं तस्या मित्रम् ।

वसन्तसेनामाता । (स्वगतम्) हैद्धी हद्धी । अदिलज्जणीअं क्खु एदं । (प्रकाशम्) जेणस्स पुच्छणीओ अअं अत्थो ण उण अधिअरणिअस्स ।

अधिकरणिकः । अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

श्रेष्ठिकायस्थौ । ववहारो पुच्छदि । णत्थि दोसो कधेहि ।

---

(१) गता मे दारिका मित्रगृहमात्मनो यौवनमनुभवितुम् । एष पुनर्दीर्घायुर्भणत्यागच्छ अधिकरणिक आह्वयति । तन्मोहपरवशमिवात्मानमवगच्छामि । हृदयं मे प्रकम्पते । आर्य आदिश मेऽधिकरणमण्डपस्य मार्गम् ।

(२) एत्वेत्वार्या । (३) एषोऽधिकरणमण्डपः । अत्र प्रविशत्वार्या ।

(४) सुखं युष्माकं भवतु भावमिश्राणाम् । (५) तथा ।

(६) आगतासि वृद्धकुट्टनि आगतासि । (७) अथ किम् । (८) मित्रगृहम् ।

(९) हा धिक् हा धिक् । अतिलज्जनीयं खल्विदम् । (१०) जनस्य प्रष्टव्योऽयमर्थः । न पुनरधिकरणिकस्य ।

(११) व्यवहारः पृच्छति । नास्ति दोषः । कथय ।

वसन्तसेनामाता । कधं ववहारो । जइ एव्वं ता सुणन्तु अज्जमिस्सा । सो क्खु सत्थवाहविणअदत्तस्स णत्तिओ साअरदत्तस्स तणओ सुगहिदणामहेओ अज्जचारुदत्तो णाम सेट्ठिचत्तरे पडिवसदि । तहिं मे दारिआ जोव्वणसुहमणुभवदि ।

संस्थानकः । [3]शुदं अज्जेहिं । लिहीअन्तु एदे अक्खला । चालुदत्तेण शह मम विवादे ।

श्रेष्ठिकायस्थौ । [3]चारुदत्तो मित्तो त्ति णत्थि दोसो ।

अधिकरणिकः । व्यवहारोऽयं चारुदत्तमवलम्बते ।

श्रेष्ठिकायस्थौ । [4]एव्वं विअ ।

अधिकरणिकः । धनदत्त वसन्तसेनार्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः । कथमार्यचारुदत्तोऽप्यस्माभिराह्वाययितव्यः । अथवा व्यवहारस्तमाह्वयति । भद्र शोधनक गच्छ । आर्यचारुदत्तं स्वैरमसंभ्रान्तमनुद्विग्नं सादरमाह्वाय प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति ।

शोधनकः । [5]जं अज्जो आणवेदि । (इति निष्क्रान्तः । चारुदत्तेन सह प्रविश्य च ।) [6]एदु एदु अज्जो ।

चारुदत्तः । (विचिन्त्य)

परिज्ञातस्य मे राज्ञा शीलेन च कुलेन च ।
यत्सत्यमिदमाह्वानमवस्थामभिशङ्कते ॥८

(सवितर्कं स्वगतम्)

ज्ञातो नु किं स खलु बन्धनविप्रयुक्तो
मार्गागतः प्रवहणेन मयापनीतः ।

(१) कथं व्यवहारः । यद्येवं तदा शृण्वन्त्वार्यमिश्राः । स खलु सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेय आर्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसति । तत्र मे दारिका यौवनसुखमनुभवति ।

(२) श्रुतमार्यैः । लिख्यन्तामेतान्यक्षराणि । चारुदत्तेन सह मम विवादः ।

(३) चारुदत्तो मित्रमिति नास्ति दोषः । (४) एवमिव ।

(५) यदार्य आज्ञापयति । (६) एत्वेत्वार्यः ।

चारेक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्त इव प्रयामि ॥९

अथवा किं विचारितेन । अधिकरणमण्डपमेव गच्छामि । भद्र शोधनक अधिकरणस्य मार्गमादेशय ।

शोधनकः । एदु एदु अज्जो । (इति परिक्रामतः ।)

चारुदत्तः । (सशङ्कम्) तत्किमपरम् ।

रूक्षस्वरं वासति वायसोऽयममात्यभृत्या मुहुराह्वयन्ति ।
सव्यं ज नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति ॥१०

शोधनकः । एदु एदु अज्जो सैरं असंभन्तं ।

चारुदत्तः । (परिक्रम्याग्रतोऽवलोक्य च)

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥११

(पुनरन्यतोऽवलोक्य) अये कथमयं सर्पः ।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः
स्फुरितविततजिह्वः शुष्कदंष्ट्राचतुष्कः ।
अभिपतति सरोषो जिह्मिताध्मातकुक्षि-
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥१२

अपि चेदम् । स्खलति चरणं भूमौ न्यस्तं न चार्द्रतमा मही
स्फुरति नयनं वामो बाहुर्मुहुश्च विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं न चात्र विचारणा ॥१३

सर्वथा देवताः स्वस्ति करिष्यन्ति ।

शोधनकः । एदु एदु अज्जो । इमं अधिअरणमण्डवं पविसदु अज्जो ।

चारुदत्तः । (प्रविश्य समन्तादवलोक्य) अहो अधिकरणमण्डपस्य

---

(१) एत्वेत्वार्यः । (२) एत्वेत्वार्यः स्वैरमसंभ्रान्तम् । (३) एत्वेत्वार्यः । इममधिकरणमण्डपं प्रविशत्वार्यः ।

परा श्रीः । इह हि ।

चिन्तासक्तानिमग्नमन्त्रिसलिलं दूतोर्मिशङ्काकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥१४

भवतु । (प्रविशन् शिरोघातमभिनीय सवितर्कम्) अहह इदमपरम् ।

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा ।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः ॥१५

तावत्प्रविशामि । (इति प्रविशति ।)

अधिकरणिकः । अयमसौ चारुदत्तः । य एषः ।

घोणोन्नतं मुखमपाङ्गविशालनेत्रं नैतद्धि भाजनमकारणदूषणानाम् ।
नागेषु गोषु तुरगेषु तथा नरेषु नह्याकृतिः सुसदृशं विजहाति
वृत्तम् ॥१६

चारुदत्तः । भो अधिकृतेभ्यः स्वस्ति । हंहो नियुक्ताः । अपि कुशलं भवताम् ।

अधिकरणिकः । (ससंभ्रमम्) स्वागतमार्यस्य । भद्र शोधनक आर्यस्यासनमुपनय ।

शोधनकः । (आसनमुपनीय) एदं आसणं । एत्थ उवविसदु अज्जो ।

(चारुदत्तः उपविशति ।)

संस्थानकः । (सक्रोधम्) आगदेशि ले इत्थिआघादआ आगदेशि । अहो णाए ववहाले । अहो धम्मे ववहाले । जं एदाह इत्थिआघादुकाह आशणे दीअदि । (सगर्वम्) भोदु णं दीअदु ।

अधिकरणिकः । आर्य चारुदत्त अस्ति भवतोऽस्या आर्याया दुहित्रा सह प्रसक्तिः प्रणयः प्रीतिर्वा ।

(१) एतदासनमत्रोपविशत्वार्यः । (२) आगस्तोऽसि रे स्त्रीघातक आगतोऽसि । अहो न्याय्यो व्यवहारः । अहो धर्म्यो व्यवहारः । यदेवास्मै स्त्रीघातकायासनं दीयते । (३) भवतु । ननु दीयताम् ।

चारुदत्तः । कस्याः ।

अधिकरणिकः । अस्याः । (इति वसन्तसेनामातरं दर्शयति ।)

चारुदत्तः । (उत्थाय) आर्ये अभिवादये ।

वसन्तसेनामाता । [1]जाद चिरं मे जीव । (स्वगतम्) [2]अअं सो चारुदत्तो । मुणिक्खित्तं क्खु दारिआए जोव्वणं ।

अधिकरणिकः । आर्य गणिका तव मित्रम् ।

(चारुदत्तो लज्जां नाटयति ।)

संस्थानकः । [3]लज्जाए भीलुदाए वा चालित्तं अलिए णिगूहिदुं ।
शअं मालिअ अत्थकालणाए णिगूहदि ण तं हि भट्टके ॥१७

श्रेष्ठिकायस्थौ । [4]अज्ज चारुदत्त भणाहि । अलं लज्जाए । ववहारो क्खु एसो ।

चारुदत्तः । (सलज्जम्) भो अधिकृताः । मया कथमीदृशं वक्तव्यं यथा गणिका मम मित्रमिति । अथवा यौवनमत्रापराध्यति न चारित्र्यम् ।

अधि० । व्यवहारः सविघ्नोऽयं त्यज लज्जां ह्रादं स्थिताम् ।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते॥१८

अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

चारुदत्तः । अधिकृत केन सह मम व्यवहारः ।

संस्थानकः । (साटोपम्) [5]अले मए शह ववहाले ।

चारुदत्तः । त्वया सह मम व्यवहारः सुदुस्सहः ।

संस्थानकः । [6]अले इत्थिआघादआ तं तादिशिं लअणशदभूशणिअं वशन्तशेणिअं मालिअ शम्पदं कवडकावडिके भविअ निगूहेशि ।

---

(१) जात चिरं मे जीव । (२) अयं स चारुदत्तः । सुनिक्षिप्तं खलु दारिकया यौवनम् । (३) लज्जयोत भीरुतया वा चारित्रमलं(!) निगूहितुम् ।
स्वयं मारयित्वाऽर्थकारणादिदानीं गूहति न तद्धि भट्टकः ॥
(४) आर्य चारुदत्त भण । अलं लज्जया । व्यवहारः खल्वेषः ।
(५) अरे मया सह व्यवहारः ।
(६) अरे स्त्रीघातक तां तादृशीं रत्नशतभूषणां वसन्तसेनां मारयित्वा सांप्रतं कपटकापटिको भूत्वा निगूहसि ।

चारुदत्तः । असंबद्धः खल्वसि ।

अधिकरणिकः । आर्यचारुदत्त अलमनेन । ब्रूहि सत्यम् । अपि गणिका तव मित्रम् ।

चारुदत्तः । एवमेव ।

अधिकरणिकः । आर्य वसन्तसेना क ।

चारुदत्तः । गृहं गता ।

श्रेष्ठिकायस्थौ । [1]कधं गदा । कदा गदा । गच्छन्ती वा केण अणुगदा ।

चारुदत्तः । (स्वगतम्) किं प्रच्छन्नं गतेति ब्रवीमि ।

श्रेष्ठिकायस्थौ । [2]अज्ज कधेहि ।

चारुदत्तः । गृहं गता । किमन्यद्ब्रवीमि ।

संस्थानकः । [3]मम केलकं पुप्फकलण्डकजिण्णुज्जाणं पवेशिअ अत्थणिमित्तं बाहुपाशबलक्कालेण मालिदा । अए शम्पदं वदशि घलं गदे त्ति ।

चारुदत्तः । आः असंबद्धप्रलापिन्

अभ्युक्षितोसि सलिलैर्न बलाहकानां
चाषाग्रपक्षसदृशं भृशमन्तराले ।
मिथ्यैतदाननमिदं भवतस्तथा हि
हेमन्तपद्मामिव निष्प्रभतामुपैति ॥१९

अधिकरणिकः । (जनान्तिकम्)

तुलनं चाद्रिराजस्य समुद्रस्य च तारणम् ।
ग्रहणं चानिलस्येव चारुदत्तस्य दूषणम् ॥२०

(प्रकाशम्) आर्यचारुदत्तः खल्वसौ । कथमिदमकार्यं करिष्यति । (घोणेत्यादि [९.१६] पठति ।)

संस्थानकः । [4]किं पक्खवादेण ववहाले दीशदि ।

---

(१) कथं गता । कदा गता । गच्छन्ती वा केनानुगता ।

(२) आर्य कथय ।

(३) मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्यार्थनिमित्तं बाहुपाशबलात्कारेण मारिता । अये सांप्रतं वदसि गृहं गतेति ।

(४) किं पक्षपातेन व्यवहारो दृश्यते ।

अधिकरणिकः। अपेहि मूर्ख।

वेदार्थान् प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ॥
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥२१

आर्यचारुदत्तः कथमयमकार्यं करिष्यति।

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं
दत्तानि येन हि धनान्यनपेक्षितानि।
स श्रेयसां कथमिवैकनिधिर्महात्मा
पापं करिष्यति धनार्थमवैरिजुष्टम् ॥२२

संस्थानकः। [1]किं पक्षवादेण ववहाले दीशदि।

वसन्तसेनामाता। [2]हेदास जो दाणिं णासीकदं सुवण्णभण्डअं रत्तिं चोरेहिं अवहदं त्ति तस्स कारणादो चदुस्समुद्दसारभूदं रअणावलिं देदि सो दाणिं अत्थकलुअत्तस्स कारणादो इमं अकज्जं करेदि। हा जादे एहि मे पुत्ति। (इति रोदिति।)

अधिकरणिकः। आर्यचारुदत्त किमसौ पद्भ्यां गता। उत प्रवहणेनेति।

चारुदत्तः। ननु मम प्रत्यक्षं न गता। तन्न जाने किं पद्भ्यां गतोत प्रवहणेनेति। (प्रविश्य सामर्षो।)

वीरकः। [3]पादप्पहारपरिभवविमाणणाबद्धगरुअवेरस्स।
अणुसोअन्तस्स इयं कधं पि रत्ती पभादा मे ॥२३

---

(१) किं पक्षपातेन व्यवहारो दृश्यते।

(२) हताश य इदानीं न्यासीकृतं सुवर्णभाण्डं रात्रौ चौरैरपहृतमिति तस्य कारणाच्चतुःसमुद्रसारभूतां रत्नावलीं ददाति स इदानीमर्थकल्यवर्तस्य कारणादिदमकार्यं करोति। हा जाते एहि मे पुत्रि।

(३) पादप्रहारपरिभवविमाननाबद्धगुरुकवैरस्य।
अनुशोचत इयं कथमपि रात्रिः प्रभाता मे ॥

ता जाव अधिअरणमण्डवं उवसप्पामि । (प्रवेष्टकेन) सुहं अज्जमिस्साणं ।

अधिकरणिकः । अये नगररक्षाधिकृतो वीरकः । वीरक किमागमनप्रयोजनम् ।

वीरकः । [2]ही ही बन्धणभेअणसंभमे अज्जकं अण्णेसन्तो ओव्वाडिदं पवहणं वच्चदि त्ति विआरं करन्तो अण्णेसन्तो 'अरे तुए वि आलोइदे मए वि आलोइदव्वो' त्ति भणन्तो जेव्व चन्दणमहत्तरएण पादेण ताडिदो म्हि । एदं सुणिअ अज्जमिस्सा पमाणं ।

अधिकरणिकः । भद्र जानीषे कस्य तत्प्रवहणमिति ।

वीरकः । [3]ईमस्स अज्जचारुदत्तस्स । वसन्तसेणा आरूढा पुप्फकरण्डकजिण्णुज्जाणं कीलिदुं णिअदि त्ति पवहणवाहएण कहिदं ।

संस्थानकः । [4]पुणो वि सुदं अज्जेहिं ।

अधिकरणिकः । एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥२४

वीरक पश्चादिह भवतो न्यायं द्रक्ष्यामः । य एषोऽधिकरणद्वार्यश्चास्तिष्ठति तमेनमारुह्य गत्वा पुष्पकरण्डकोद्यानं दृश्यतामस्ति तत्र काचिद्विवन्ना स्त्री न वेति ।

वीरकः । [5]जं अज्जो आणवेदि । (इति निष्क्रान्तः । प्रविश्य च) [6]गदोम्हि तहिं । दिट्ठं च मए इत्थिआकलेवरं सावदंहिं विलुप्पन्तं ।

श्रेष्ठिकायस्थौ । [7]कधं तुए जाणिदं इत्थिआकलेवरं त्ति ।

तद्यावदधिकरणमण्डपमुपसर्पामि । (१) सुखमार्यमिश्राणाम् ।

(२) ही ही बन्धनभेदनसंभ्रमे आर्यकमन्वेषयन्नपवारितं प्रवहणं व्रजतीति विचारं कुर्वन्नन्वेषयन् 'अरे त्वयाप्यालोकितं मयाप्यालोकितव्यमिति' भणन्नेव चन्दनमहत्तरकेण पादेन ताडितोऽस्मि । एतच्छ्रुत्वार्यमिश्राः प्रमाणम् ।

(३) अस्यार्यचारुदत्तस्य । वसन्तसेनारूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीयत इति प्रवहणवाहकेन कथितम् । (४) पुनरपि श्रुतमार्यैः ।

(५) यदार्य आज्ञापयति । (६) गतोऽस्मि तत्र । दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्यमानम् ।

(७) कथं त्वया ज्ञातं स्त्रीकलेवरमिति ।

वीरकः । सावसेसेहिं केसहत्थपाणिपादएहिं उवलक्खिदं मए ।

अधिकरणिकः । अहो धिग्वैषम्यं लोकव्यवहारस्य ।

यथा यथेदं निपुणं विचार्यते तथा तथा सङ्कटमेव दृश्यते ।
अहो सुसन्ना व्यवहारनीतयो मतिस्तु गौः पङ्कगतेव सीदति ॥२५

चारुदत्तः । (स्वगतम्) ।

यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवन्ति ॥२६

अधिकरणिकः । आर्यचारुदत्त सत्यमभिधीयताम् ।

चारुदत्तः । दुष्टात्मा परगुणमत्सरी मनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद्वदति मृषैव जातिदोषा-
त्तद्ग्राह्यं भवति न तद्विचारणीयम् ॥२७

अपि च। योऽहं लतां कुसुमितामपि पुष्पहेतो-
राकृष्य नैव कुसुमावचयं करोमि ।
सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे प्रगृह्य रुदतीं प्रमदां निहन्मि ॥२८

संस्थानकः । हंहो अधिअलणभोइआ किं तुम्हे पक्खवादेण ववहालं पेक्खध । जेण अज्ज वि एशे हदाशचालुदत्ते आशणे धालीअदि ।

अधिकरणिकः । भद्र शोधनक एवं क्रियताम् । (शोधनकस्तथा करोति ।)

चारुदत्तः । विचार्यतां भो अधिकृता विचार्यताम् । (इत्यासनादवतीर्य भूमावुपविशति ।)

संस्थानकः । (स्वगतम् । सहर्षं नर्तित्वा) ही । अणेण मए कडे पावे

---

(१) सावशेषैः केशहस्तपाणिपादैरुपलक्षितं मया ।

हंहो अधिकरणभोजकाः किं यूयं पक्षपातेन व्यवहारं पश्यत । येनाद्याप्येष हताशचारुदत्त आसने धार्यते ।

(२) ही अनेन मया कृतं पापमन्यस्य मस्तके निपतितम् । तद्यत्र चारुदत्त

अण्णश्श मत्थके निवडिदे । ता जहिं चालुदत्ताके उवविशदि तहिं हगे उवविशामि । (तथा कृत्वा) चालुदत्ता पेक्ख पेक्ख मं । ता भण भण मए मालिदे त्ति ।

चारुदत्तः । भो अधिकृताः ('दुष्टात्मा' इति पूर्वोक्तं [९-२७] पठति । सनिःश्वासं स्वगतम् ।)

मैत्रेय भोः किमिदमद्य ममोपघातो
हा ब्राह्मणि द्विजकुले विमले प्रसूता ।
हा रोहसेन न हि पश्यसि मे विपत्तिं
मिथ्यैव नन्दसि परव्यसनेन नित्यम् ॥२९

प्रेषितश्च मया तद्वार्तान्वेषणाय मैत्रेयो वसन्तसेनासकाशं शकटिकानिमित्तं च तस्य प्रदत्तान्यलंकरणानि प्रत्यर्पयितुम् । तत्कथं चिरयते ।

(ततः प्रविशति गृहीताभरणो विदूषकः ।)

मैत्रेयः । [१]पेसिदोम्हि अज्जचारुदत्तेण वसन्तसेणासआसं तहिं अलंकरणाइं गेण्हिअ । जधा । 'अजमित्तेअ वसन्तसेणाए वच्छो रोहसेणो अत्तणो अलंकारेण अलंकरिअ जणणीसआसं पेसिदो । इमस्स आहरणं दादव्वं ण उण गेण्हिदव्वं । ता समप्पेहि त्ति' । ता जाव वसन्तसेणासआसं जेव्व गच्छामि । (परिक्रम्यावलोक्य चाकाशे ।) [२]कैधं भावरेभिलो । भो भावरेभिल किंणिमित्तं तुमं उव्विग्गो उव्विग्गो विअ लक्खीअसि । (आकर्ण्य) [३]किं भणासि । पिअवअस्सो चारुदत्तो अधिअरणमण्डवं सद्दावीअदि त्ति । ता ण हु अप्पेण कज्जेण होदव्वं । (विचिन्त्य) [४]तो पच्छा वसन्तसेणासआसं गमिस्सं ।

उपविशति तत्राहमुपविशामि । (१) चारुदत्त पश्य पश्य माम् । तद् भण भण मया मारितेति ।

(२) प्रेषितोऽस्म्यार्यचारुदत्तेन वसन्तसेनासकाशं तत्रालंकरणानि गृहीत्वा । यथा । 'आर्यमैत्रेय वसन्तसेनया वत्सो रोहसेन आत्मनोऽलंकारेणालंकृत्य जननीसकाशं प्रेषितः । अस्या आभरणं दातव्यं न पुनर्ग्रहीतव्यम् । तत्समर्पय ।' इति । तद्यावत् वसन्तसेनासकाशमेव गच्छामि । (३) कथं भावरेभिलः । भो भाव रेभिल किंनिमित्तं त्वमुद्विग्न उद्विग्न इव लक्ष्यसे । (४) किं भणसि प्रियवयस्यश्चारुदत्तोऽधिकरणमण्डपमाहूयते इति । तन्न खल्वल्पेन कार्येण भवितव्यम् । (५) तत्पश्चा-

अधिअरणमण्डवं दाव गमिस्सं ।(परिक्रम्यावलोक्य च) ईदं *अधिअरणमण्डवं ।* ता जाव पविसामि । (प्रविश्य) सुंहं अधिअरणभोइआणं । कहिं मम पिअवअस्सो ।

अधिकरणिकः । नन्वेष तिष्ठति ।

मैत्रेयः । वँअस्स सोत्थि दे ।

चारुदत्तः । भविष्यति ।

मैत्रेयः । अँवि क्खेमं दे ।

चारुदत्तः । एतदपि भविष्यति ।

मैत्रेयः । भो वअस्स किंणिमित्तं उव्विग्गो उव्विग्गो विअ लक्खीअसि कुदो वा सद्दाइदो ।

चारुदत्तः । वयस्य

मया खलु नृशंसेन परलोकमजानता ।
स्त्री रतिर्वाविशेषेण शेषमेषोऽभिधास्यति ॥३०

मैत्रेयः । किं किम् ।

चारुदत्तः । (कर्णे) एवमेवम् ।

मैत्रेयः । कौ एव्वं भणादि ।

चारुदत्तः । (संज्ञया संस्थानकं दर्शयति ।) नन्वेष तपस्वी हेतुभूतः कृतान्तो मां व्याहरति ।

मैत्रेयः । (जनान्तिकम्) एँवं कीस ण भणीअदि गेहं गदेत्ति ।

चारुदत्तः । उच्यमानमप्यवस्थादोषान्न गृह्यते ।

द्वसन्तसेनासकाशं गमिष्यामि। अधिकरणमण्डपं तावद् गमिष्यामि। (१) अयमधिकरणमण्डपः । तद्यावत्प्रविशामि । (२) सुखमधिकरणभोजकानाम् । कुत्र मम प्रियवयस्यः ।

(३) वयस्य स्वस्ति ते ।

(४) अपि क्षेमं ते ।

(५) भो वयस्य किंनिमित्तमुद्विग्न उद्विग्न इव लक्ष्यसे । कुतो वाहूतः ।

(६) क एवं भणति । (७) एवं किमर्थं न भण्यते गृहं गतेति ।

मैत्रेयः। भो भो अज्जा। जेण दाव पुरट्ठावणविहारारामदेउलतडागकूवजूवेहिं अलंकिदा णअरी उज्जइणी सो अणीसो अत्थकल्लवत्तकारणादो एरिसं अकज्जं अणुचिट्ठदि त्ति। (सक्रोधम्) अरे रे काणेलीसुदा राअस्साअलसण्ठाणआ उस्सङ्कणआ किदजणदोसभण्डआ बहुसुवण्णमण्डिदमक्कडआ भण भण मम अग्गदो। जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पि आअट्ठिअ कुसुमावचअं ण करेदि कदा वि आअट्ठिदाए पल्लवच्छेदो भोदि त्ति सो कधं एरिसं अकज्जं उहअलोअविरुद्धं करेदि। चिट्ठ रे कुट्टणीउत्ता चिट्ठ जाव एदिणा तव हिअअकुडिलेण दण्डअट्ठेण मत्थअं दे सदखण्डं करेमि।

संस्थानकः। (सक्रोधम्) शृणन्तु शृणन्तु अज्जमिस्सा। चालुदत्ताकेण शह मम विवादे ववहाले वा। ता कीश एशे काकपदशीशमत्थका मम शिले शदखण्डे कलेदि। मा दाव ले दाशीए उत्ता दुट्ठबडुव्वका। (मैत्रेयो दण्डकाष्ठमुद्यम्य पूर्वोक्तं पठति। संस्थानकः सक्रोधमुत्थाय ताडयति। मैत्रेयः प्रतीपं ताडयति। अन्योन्यं ताडयतः। मैत्रेयस्य कक्षादेशादाभरणानि पतन्ति। तानि गृहीत्वा दृष्ट्वा ससाध्वसम्)

संस्थानकः। पेक्खन्तु पेक्खन्तु अज्जा। एदे क्खु ताए तवस्सिणीए केलका अलंकाला। (चारुदत्तमुद्दिश्य) ईमस्श अत्थकल्लवत्तस्श कालणादो

---

(१) भो भो आर्याः। येन तावत् पुरस्थापनविहारारामदेवालयतडागकूपयूपैरलंकृता नगर्युज्जयिनी सोऽनीशोऽर्थकल्यवर्त्तकारणादीदृशमकार्यमनुतिष्ठतीति। (२) अरे रे काणेलीसुत राजश्यालसंस्थानक उच्छृङ्गलक, कृतजनदोषभण्ड, बहुसुवर्णमण्डितमर्कटक, भण भण ममाग्रतः। य इदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामप्याकृष्य कुसुमावचयं न करोति कदाप्याकृष्टायाः पल्लवच्छेदो भवतीति। स कथमीदृशमकार्यमुभयलोकविरुद्धं करोति। तिष्ठ रे कुट्टिनीपुत्र तिष्ठ। यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करोमि।

(३) शृण्वन्तु शृण्वन्त्वार्यमिश्राः। चारुदत्तेन सह मम विवादो व्यवहारो वा। तत्किमर्थमेष काकपदशीर्षमस्तको मम शिरः शतखण्डं करोति। मा तावद् रे दास्याः पुत्र दुष्टबटुक। (४) पश्यन्तु पश्यन्त्वार्याः। एते खलु तस्यास्तपस्विन्या अलंकाराः। (५) अस्यार्थकल्यवर्त्तस्य कारणादेषा मारिता

एशा मालिदा वावादिदा अ ।

(अधिकृताः सर्वेऽधोमुखाः स्थिताः ।)

चारुदत्तः । (जनान्तिकम्)

अयमेवंविधे काले दृष्टो भूषणविस्तरः ।
अस्माकं भाग्यवैषम्यात्पतितः पतयिष्यति ॥३१

मैत्रेयः । भो कीस भूदत्थं ण णिवेदीअदि ।

चारुदत्तः । वयस्य

दुर्बलं नृपतेश्चक्षुर्नैतत्तत्त्वं निरीक्षते ।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् ॥३२

अधिकरणिकः । कष्टं भोः कष्टम् ।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः ।
ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥३३

श्रेष्ठिकायस्थौ । (विलोक्य वसन्तसेनामातरमुद्दिश्य) अवहिदा दाव अज्जा एदं सुवण्णभण्डअं अवलोएदु । सो जेव्व एसो ण वे त्ति ।

वसन्तसेनामाता । (अवलोक्य) सरिसो एसो ण उण सो ।

संस्थानकः । आं वुड्ढकुट्टणि अक्खीहिं मन्तिदं वाआए मूकिदम् ।

वसन्तसेनामाता । हदास अवेहि ।

श्रेष्ठिकायस्थौ । अप्पमत्तं कधेहि सो जेव्व एसो ण वेत्ति ।

वसन्तसेनामाता । अज्ज सिप्पिकुसलदाए ओवन्धेदि दिट्ठिं । ण उण सो ।

अधिकरणिकः । भद्रे अपि जानास्येतान्याभरणानि ।

व्यापादिता च ।

(१) भोः किमर्थं भूतार्थो न निवेद्यते ।

(२) अवहिता तावदार्येण सुवर्णालंकारमवलोकयतु । स एवैष न वेति ।

(३) सदृश एषः । न पुनः सः ।

(४) आं वृद्धकुट्टनि अक्षिभ्यां मन्त्रितं वाचा मूकितम् । (५) हताश अपेहि ।

(६) अप्रमत्तं कथय । स एव एष न वेति ।

(७) आर्य शिल्पिकुशलतया अवबध्नाति दृष्टिम् । न पुनः सः ।

वसन्तसेनामाता। [1]णं भणामि। ण हु ण हु अण्ण(ा)दो। अह कदा वि सिप्पिणा घडिदो भवे।

अधिकरणिकः। पश्य श्रेष्ठिन्

वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य।
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टम् ॥३४

श्रेष्ठिकायस्थौ। [2]अज्जचारुदत्तस्स केरकाणि एदाणि।

चारुदत्तः। न खलु न खलु।

श्रेष्ठिकायस्थौ। [3]ताँ कस्स।

चारुदत्तः। इहात्रभवत्या दुहितुः।

श्रेष्ठिकायस्थौ। [4]कधं एदाइं ताए विओअं गदाइं।

चारुदत्तः। एवं गतानि। आं। इदम्।

श्रेष्ठिकायस्थौ। [5]अज्जचारुदत्त एत्थ सच्चं वत्तव्वम्। पेक्ख पेक्ख।

सच्चेण सुहं क्खु लब्भइ सच्चालावि ण होइ पावए।
स च्चं त्ति दुवेवि अक्खरा मा सच्चं अलिएण गूहेहि॥३५

चारुदत्तः। आभरणान्याभरणानीति। न जाने। किंत्वस्मद्गृहादानीतानीति जाने।

संस्थानकः। [6]उज्जाणं पवेशिअ पढमं मालेशि। कवडकावडिआए शम्पदं णिगूहेशि।

---

(१) ननु भणामि। न खलु न खल्वज्ञातः। अथ कदापि शिल्पिना घटितो भवेत्। (२) आर्य चारुदत्तस्यैतानि।

(३) तदा कस्य। (४) कथमेतानि तस्या वियोगं गतानि।

(५) आर्य चारुदत्त अत्र सत्यं वक्तव्यम्। पश्य पश्य।

सत्येन सुखं खलु लभ्यते सत्यालापे न भवति पातकम्।
स त्यमिति द्वे अप्यक्षरे मा सत्यमलीकेन गूहय॥

(६) उद्यानं प्रवेश्य प्रथमं मारयसि। कपटकापटिकतया सांप्रतं निगूहसि।

अधिकरणिकः। आर्य चारुदत्त सत्यमभिधीयताम्।

इदानीं सुकुमारेऽस्मिन् निःशङ्कं कर्कशाः कशाः।
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः ॥३६

चारुदत्तः। अपापानां कुले जाते मयि पापं न विद्यते।
यदि संभाव्यते पापमपापेन च किं मया ॥३७

(स्वगतम्) न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम्। (प्रकाशम्) भोः किं बहुना।

मया किल नृशंसेन लोकद्वयमजानता।
स्त्री रतिश्च विशेषेण शेषमेषोऽभिधास्यति ॥३८

संस्थानकः। वावादिदा। अले तुमं पि भण मए वावादिदेत्ति।

चारुदत्तः। त्वयैवोक्तम्।

संस्थानकः। शुणेध शुणेध भट्टालका। एदेण मालिदा। एदेण जेव्व। शंशए छिण्णे। एदश्श दलिद्दचालुदत्तश्श शालीले दण्डे धालीअदु।

अधिकरणिकः। शोधनक यथाह राष्ट्रियः। भो राजपुरुषाः। गृह्यतामयं चारुदत्तः। (राजपुरुषा गृह्णन्ति।)

वसन्तसेनामाता। पसीदन्तु पसीदन्तु अज्जमिस्सा। ('जो दाव चोरेहिं अवहदस्स' इत्यादि पूर्वोक्तं [९·२२ स्याग्रे] पठति।) ता जदि वावादिदा मम दारिआ वावादिदा। जीवदु मे दीहाऊ। अण्णं च। अत्थिपच्चत्थिणं ववहारो। अहं अत्थिणी। ता मुञ्चध एदम्।

संस्थानकः। अवेहि गब्भदासि गच्छ। किं तव एदिणा।

अधिकरणिकः। आर्य गम्यताम्। हे राजपुरुषाः निष्क्रामयतैनाम्।

---

(१) व्यापादिता। अरे त्वमपि भण मया व्यापादितेति।

(२) शृणुत शृणुत भट्टारकाः एतेन मारिता। एतेनैव। संशयश्छिन्नः। एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो धार्यताम्।

(३) प्रसीदन्तु प्रसीदन्त्वार्यमिश्राः। ('यस्तावच्चौरैरुपहृतस्य' इत्यादि पठति) तद्यदि व्यापादिता मम दारिका व्यापादिता। जीवतु मे दीर्घायुः। अन्यच्च अर्थिप्रत्यर्थिनोर्व्यवहारः। अहमर्थिनी। तन्मुञ्चतैनम्।

(४) अपेहि गर्भदासि गच्छ। किं तवैतेन।

वसन्तसेनामाता। हा[1] जाद हा पुत्तअ। (इति रुदती निष्क्रान्ता।)

संस्थानकः। (स्वगतम्) कधं[2] मए एदस्स अत्तणो शलिशं। शम्पदं गच्छामि। (निष्क्रान्तः।)

अधिकरणिकः। आर्यचारुदत्त निर्णये वयं प्रमाणम्। शेषे तु राजा। तथापि शोधनक विज्ञाप्यतां राजा पालकः।

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत्।
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥३९

शोधनकः। जं[3] अज्जो आणवेदि। (इति निष्क्रम्य पुनः प्रविश्य सासम्) अज्जा[4] गदम्हि तहिं। राआ पालओ भणादि। जेण अत्थकलुवत्तस्स कारणादो वसन्तसेणा वावादिदा तं तहिं जेव्व आहरणाइं गले बन्धिअ डिण्डिमं ताडिअ दक्खिणमसाणं णइअ सूले भञ्जेध त्ति। जो को वि अवरो एरिसं अकज्जं अणुचिट्ठदि सो एदिणा सणिआरदण्डेण सासीअदि।

चारुदत्तः। अहो अविवेकोऽविमृश्यकारी राजा पालकः।

अथवा। **ईदृशे व्यवहाराग्रौ मन्त्रिभिः परिपातिताः।**
स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ॥४०

अपि च। **ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः।**
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥४१

सखे मैत्रेय गच्छ। मद्वचनादम्बामपाश्रिममभिवादयस्व। पुत्रं च मे रोहसेनं परिपालयस्व।

मैत्रेयः। मूले[5] छिण्णे कुदो पादवस्स पालणं।

---

(१) हा जात हा पुत्रक। (२) कृतं मयैतस्यात्मनः सदृशम्। सांप्रतं गच्छामि।

(३) यदार्य आज्ञापयति। (४) आर्याः गतोऽस्मि तत्र। राजा पालको भणति येनार्थकल्यवर्तस्य कारणाद् वसन्तसेना व्यापादिता तं तत्रैवाभरणानि गले बद्ध्वा डिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भङ्क्त्वेति। यः कोऽप्यपर ईदृशमकार्यमनुतिष्ठति स एतेन सनिकारदण्डेन शास्यते।

(५) मूले छिन्ने कुतः पादपस्य पालनम्।

चारुदत्तः । मा मैवम् ।

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः ।
मयि यो वै तव स्नेहो रोहसेने स युज्यताम् ॥४२

मैत्रेयः । भो वअस्स अहं ते पिअवअस्सो भविअ तुए विरहिदाइं पाणाइं धारेमि ।

चारुदत्तः । रोहसेनमपि तावद्दर्शय ।

मैत्रेयः । एव्वं जुजदि[2] ।

अधिकरणिकः । भद्र शोधनक अपसार्यतामयं बटुः । (शोधनकस्तथा करोति ।)

अधिकरणिकः । कः कोऽत्र भोः । चाण्डालानां दीयतामादेशः ।

(इति चारुदत्तं विसृज्य निष्क्रान्ताः सर्वे राजपुरुषाः ।)

शोधनकः । इदो[3] आअच्छदु अज्जो ।

चारुदत्तः । (सकरुणम् 'मैत्रेय भोः किमिदमद्य' । इत्यादि [९·२९] पठति । आकाशे ।)

विषसलिलतुलाग्निप्रार्थिते मे विचारे
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य ।
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥४३

अयमागतोऽस्मि । (इति निष्क्रान्ताः सर्वे ।)

व्यवहारो नाम नवमोऽङ्कः समाप्तः ।

---

(१) भो वयस्य अहं ते प्रियवयस्यो भूत्वा त्वया विरहितान् प्राणान् धारयामि । (२) एवं युज्यते ।

(३) इत आगच्छत्वार्यः ।

दशमोऽङ्कः ।

(ततः प्रविशति चाण्डालद्वयेनानुगम्यमानश्चारुदत्तः ।)

चाण्डालौ । [1]तक्किं ण कलअ कालण णववहबंधणअणे णिउणा ।
अइलेण शीशछेअणशूलालोवेशु कुशलम्ह ॥१

ओशलध अजा ओशलध । एशे अजचालुदत्ते

दिण्णकलवीडदामे गहिदे अम्हेहिं वज्झपुलिशेहिं ।
दीवे व्व मन्दणेहे थोअं थोअं खअं जादि ॥२

चारुदत्तः । (सविषादम्)

नयनसलिलसिक्तं पांशुरूक्षीकृताङ्गं
पितृवनसुमनोभिर्वेष्टितं मे शरीरम् ।
विरसमिह रटन्तो रक्तगन्धानुलिप्तं
बलिमिव परिभोक्तुं वायसास्त्वर्कयन्ति ॥३

चाण्डालौ । [2]ओशलध अजा ओशलध ।

किं पेक्खध छिज्जन्तं शप्पुलिशं कालपलशुधालाहिं ।
शुअणशउणाधिवाशं शज्जणपुलिशद्दुमं एदं ॥४

आअच्छ ले चालुदत्ता आअच्छ ।

---

(१) तत् किं न कलय (?) कारणं नववधबन्धनगणे निपुणाः ।
अचिरेण शीर्षच्छेदनशूलारोपेषु कुशलौ स्वः ॥

अपसरत आर्याः अपसरत । एष आर्यचारुदत्तः ।

दत्तकरवीरदामा गृहीत आवाभ्यां वध्यपुरुषाभ्याम् ।
दीप इव मन्दस्नेहः स्तोकं स्तोकं क्षयं याति ॥

(२) अपसरत आर्या अपसरत ।

किं पश्यत च्छिद्यमानं सत्पुरुषं कालपरशुधाराभिः ।
सुजनशकुनाधिवासं सज्जनपुरुषद्रुममेतम् ॥

आगच्छ रे चारुदत्त आगच्छ ।

चारुदत्तः । पुरुषभाग्यानामविचिन्त्याः खलु व्यापाराः । यदहमीदृशीं दशामनुप्राप्तः । **सर्वगात्रेषु विन्यस्तै रक्तचन्दनहस्तकैः** ।
पिष्टचूर्णावकीर्णश्च पुरुषोऽहं पशूकृतः ॥५
(अग्रतो निरूप्य) अहो तारतम्यं नराणाम् । (सकरुणम्)
अमी हि दृष्ट्वा मदुपप्लवमेतन्मर्त्यं धिगस्त्विति व्युपजातबाष्पाः ।
अशक्नुवन्तः परिरक्षितुं मां स्वर्गं लभन्तेति वदन्ति पौराः ॥६
चाण्डालौ । ओशलध अज्जा ओशलध । किं पेक्खध ।
इन्दे प्पवाहिअन्ते गोप्पशवे शङ्कमं च तालाणं ।
शुपुलिशपाणविपत्ती चत्तालि इमे ण दट्ठव्वा ॥७
एकश्चा० । हैण्डे आहीन्ता पेक्ख पेक्ख ।
णअलीपधाणभूदे वज्झीअन्ते कदन्तअण्णाए ।
किं लुअदि अन्तलिक्खे आदु अणब्भे पडदि वज्जे ॥८
द्वितीयश्चा० । अैले गोहा
ण अ लुअदि अन्तलिक्खे णेअ णअब्भे पडदि वज्जे ।
महिलाशमूहमेहे निवडदि णअणम्बु धाराहिं ॥९
अवि अ । **वज्झम्मि णीअमाणे जणश्श शव्वश्श लोदमाणश्श** ।
णअणशलिलेहिं शित्ते लच्छादो ण उण्णमइ लेणू ॥१०

---

(१) अपसरत आर्या अपसरत । किं पश्यथ ।
इन्द्रः प्रवाह्यमाणो गोप्रसवः संक्रमश्च ताराणाम् ।
सुपुरुषप्राणविपत्तिश्चत्वार इमे न द्रष्टव्याः ॥
(२) अरे आहीन्त पश्य पश्य ।
नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया ।
किं रोदित्यन्तरीक्षमथवानभ्रं पतति वज्रम् ॥
(३) अरे गोह
न च रोदित्यन्तरीक्षं नैवानभ्रं पतति वज्रम् ।
महिलासमूहमेघान्निपतति नयनाम्बु धाराभिः ॥
अपि च । वध्ये नीयमाने जनस्य सर्वस्य रुदतः ।
नयनसलिलैः सिक्तो रथ्यातो नोन्नमति रेणुः ॥

चारुदत्तः । (निरूप्य सकरुणम्)

एताः पुनर्हर्म्यगताः स्त्रियो मां वातायनार्धेन विनिःसृतास्याः ।
हा चारुदत्तेत्यभिभाषमाणा बाष्पं प्रणालीभिरिवोत्सृजन्ति ॥११

चाण्डालौ । आअच्छ[1] ले चालुदत्ता आअच्छ । इमं घोशणट्ठाणं । आहणेध डिण्डिमं । घोशेध घोशणं ।

उभौ । शुणाध[2] अजा शुणाध । एशे शत्थवाहविणअदत्तश्श णत्थिके शाअलदत्तश्श पुत्तके अजचालुदत्ते णाम । एदिणा किल अकज्जकालिणा गणिआ वसन्तशेणा अत्थकलुवत्तश्श कालणादो शुणं पुप्फकलण्डअजिणुजाणं पवेशिअ बाहुपाशबलक्कालेण मालिअत्ति एशे शलोत्ते गहिदे शअं अ पडिवण्णे । तदो लण्णा पालएण अम्हे आणत्ता एदं मालेदुं । जदि अवले ईदिशं उभअलोअविलुद्धं अकज्जं कलेदि तं पि लाआ पालए एव्वं जेव्व शाशदि ।

चारुदत्तः । (सनिर्वेदं स्वगतम्)

मखशतपरिपूतं गोत्रमुद्भासितं मे ।
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम मरणदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् । ॥१२

(उद्दिश्य कर्णौ पिधाय) हा प्रिये वसन्तसेने ।

शशिविमलमयूखशुभ्रदन्ति सुरुचिरविद्रुमसंनिभाधरौष्ठि ।
तव वदनभवामृतं निपीय कथमवशो ह्ययशोविषं पिबामि ॥१३

---

(१) आगच्छ रे चारुदत्त आगच्छ । इदं घोषणस्थानम् । आहत डिण्डिमम् । घोषयत घोषणाम् ।

(२) शृणुतार्याः शृणुत । एष सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य पुत्रक आर्यचारुदत्तो नाम । एतेन किलाकार्यकारिणा गणिका वसन्तसेनार्थकस्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेत्येष सलोष्त्रो गृहीतः स्वयं च प्रतिपन्नः । ततो राज्ञा पालकेन वयमाज्ञप्ता एतं मारयितुम् । यद्यपर ईदृशमुभयलोकविरुद्धमकार्यं करोति, तमपि राजा पालक एवमेव शास्ति ।

चाण्डालौ। [1]ओशलध अज्जा ओशलध।

एशे गुणलअणणिही शज्जणदुक्खाण उत्तलणशेदू।
अशुवण्णं मण्डणअं अवणीअदि अज्ज णअलीदो ॥१४

अण्णं च। शव्वे क्खु होइ लोए लोए शुहशाण्ठिदाण तत्तिल्ला।
विणिवडिदाण णलाणं पिअआली दुल्लहो होदि ॥१५

चारुदत्तः। (सर्वतोऽवलोक्य)

अमी हि वस्त्रान्तनिरुद्धवक्त्राः प्रयान्ति मे दूरतरं वयस्याः।
परोऽपि बन्धुः समसंस्थितस्य मित्रं न कश्चिद्विषमस्थितस्य ॥१६

चाण्डालौ। [2]ओशालणं कदं। विवित्तं लाअमग्गं। ता आणेध एदं दिण्णवज्झचिण्हं।

चारुदत्तः। (निःश्वस्य 'मैत्रेय भोः किमिदमद्य' इत्यादि [९-२९] पठति) (नेपथ्ये) [3]हा ताद हा पिअवअस्स।

चारुदत्तः। (आकर्ण्य सकरुणम्) भोः स्वजातिमहत्तर। इच्छाम्यहं भवतः सकाशात्प्रतिग्रहं कर्तुम्।

चाण्डालौ। [4]किं अम्हाणं हत्थादो पडिग्गहं कलेशि।

चारुदत्तः। शान्तं पापम्। नापरीक्ष्यकारी दुराचारः पालक इव चाण्डालः। तत्परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये।

चाण्डालौ। [5]एव्वं कलीअदु।

(नेपथ्ये। [6]हा ताद हा आवुक।)

चारुदत्तः (श्रुत्वा सकरुणं 'भोः स्वजातिमहत्तर' इत्यादि पठति।)

(१) अपसरत आर्या अपसरत।

एष गुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः।
असुवर्णमण्डनकमपनीयतेऽद्य नगरीतः ॥

अन्यच्च। सर्वः खलु भवति लोके लोकः सुखसंस्थितानां चिन्तायुक्तः।
विनिपतितानां नराणां प्रियकारी दुर्लभो भवति ॥

(२) अपसारणं कृतम्। विविक्तो राजमार्गः। तदानयतैनं दत्तवध्यचिह्नम्। (३) हा तात हा प्रियवयस्य। (४) किमस्माकं हस्तात् प्रतिग्रहं करोषि। (५) एवं क्रियताम्। (६) हा तात हा पितः।

चाण्डालौ । अले पउला खणं अन्तलं देध । एशे अजचालुदत्ते पुत्तमुहं पेक्खदु । (नेपथ्याभिमुखम्) अज इदो इदो । आअच्छ ले दालआ आअच्छ । (ततः प्रविशति रोहसेनमादाय मैत्रेयः ।)

मैत्रेयः । तुवरदु तुवरदु भद्दमुहो । पिदा दे मारिदुं णीअदि ।

रोहसेनः । हा आउक हा ताद ।

मैत्रेयः । हा पिअवअस्स कहिं मए तुमं पेक्खिदव्वो ।

चारुदत्तः । (पुत्रं मित्रं च वीक्ष्य) हा पुत्र हा मैत्रेय । (सकरुणम्) भोः कष्टम् । चिरं खलु भविष्यामि परलोके पिपासितः ।

अत्यल्पमिदमस्माकं निवापोदकभोजनम् ॥१७

किं पुत्राय प्रयच्छामि । (आत्मानमवलोक्य । यज्ञोपवीतं दृष्ट्वा ।) आं इदं तावदस्ति मम च

अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
देवतानां पितॄणां च भागो येन प्रदीयते ॥१८

(इति यज्ञोपवीतं ददाति ।)

एकश्चाण्डालः । आअच्छ ले चालुदत्ता आअच्छ ।

द्वितीयः । अले अजचालुदत्तं णिलुववदेण णामेण आलवेशि । अले पेक्ख । अब्भुदए अवशाणे तहे अ लत्तिंदिवं अहदमग्गा ।

उद्दामे व्व किशोली णिअदी क्खु पडिच्छिदुं जादि॥१९

अण्णं च । शुक्खा ववदेशा शे किं पणमिअ मत्थए ण काअव्वं ।

---

(१) हे पौराः क्षणमन्तरं दत्त । एष आर्यचारुदत्तः पुत्रमुखं पश्यतु ।

(२) आर्य इत इतः । आगच्छ रे दारक आगच्छ ।

(३) त्वरतां त्वरतां भद्रमुखः । पिता ते मारयितुं नीयते ।

(४) हा तात हा पितः । (५) हा प्रियवयस्य कुत्र मया त्वं द्रष्टव्यः ।

(६) आगच्छ रे चारुदत्त आगच्छ ।

(७) अरे आर्यचारुदत्तं निरुपपदेन नाम्ना आलपसि । अरे पश्य ।

अभ्युदयेऽवसाने तथैव रात्रिंदिवमहतमार्गा ।
उद्दामेव किशोरी नियतिः खलु प्रत्येषितुं याति ॥

अन्यच्च । शुष्का व्यपदेशा अस्य किं प्रणम्य मस्तके न कर्तव्यम् ।

लाहुगहिदे वि चन्दे ण वन्दणीए जणपदस्श ॥२०

रोहसेनः । [1]अले अले चाण्डाला कहिं आवुकं णेध ।

चारुदत्तः । वत्स ।

अंसेन बिभ्रत्करवीरमालां स्कन्धेन शूलं हृदयेन शोकम् ।
आघातमद्याहमनुप्रयामि शामित्रमालब्धुमिवाध्वरेऽजः ॥२१

चाण्डालः । [2]दालआ

ण हु अम्हे चाण्डाला चाण्डालउलम्मि जादपुव्वा वि ।
जे अहिभवन्ति शाहुं ते पावा ते अ चाण्डाला ॥२२

रोहसेनः । [3]ता कीस मालेध आवुकं ।

चाण्डालः । [4]दीहाओ अत्त लाअणिओओ क्खु अवलज्झदि । ण हु अम्हे ।

रोहसेनः । [5]वावाधेद मं । मुञ्चध आवुकं ।

चाण्डालः । [6]दीहाओ एवं भणन्ते चिलं मे जीव ।

चारुदत्तः । (सास्रं पुत्रं कण्ठे गृहीत्वा)

इदं तत्स्नेहसर्वस्वं सममाढ्यदरिद्रयोः ।
अचन्दनमनौशीरं हृदयस्यानुलेपनम् ॥२३

('अंसेन बिभ्रत्' । इत्यादि [१०-२१] पुनः पठति । अवलोक्य स्वगतम्
'अमी हि वस्त्रान्तनिरुद्धवक्त्राः' । इत्यादि [१०-१६] पुनः पठति ।)

मैत्रेयः । [7]भो भद्दमुहा मुञ्चध पिअवअस्सं चारुदत्तं मं वावादेध ।

चारुदत्तः । शान्तं पापम् । (दृष्ट्वा स्वगतम्) । अद्यावगच्छामि ।

राहुगृहीतोऽपि चन्द्रो न वन्दनीयो जनपदस्य ॥

(१) अरे रे चाण्डालाः । कुत्र मम पितरं नयथ ।

(२) दारक न खलु वयं चाण्डालाश्चाण्डालकुले जातपूर्वा अपि ।
येऽभिभवन्ति साधुं ते पापास्ते च चाण्डालाः ॥

(३) तत् किमर्थं मारयत पितरम् ।

(४) दीर्घायुः । अत्र राजनियोगः खल्वपराध्यति न खलु वयम् ।

(५) व्यापादयत माम् । मुञ्चत पितरम् । (६) दीर्घायुः । एवं भणन्तश्चिरं मे जीव । (७) भो भद्रमुखाः । मुञ्चत प्रियवयस्यं मां व्यापादयत ।

(समसंस्थितस्य । इत्यादि [१०-१६] पठति । प्रकाशम् । 'एताः पुनर्हर्म्यगताः स्त्रियो माम्' [१०-११] । इत्यादि पुनः पठति ।)

चाण्डालः । ओशलध अजा ओशलध ।

किं पेक्खध शप्पुलिशं अजशवशेण प्पणट्ठजीवाशं ।
कूवम्मि खुडिदपाशं कंचणकलशं व्व डुब्बन्तं ॥२४

चारुदत्तः । (सकरुणं 'शशिविमलमयूख' [१०-१३] । इत्यादि पठति ।)

अपरश्चा० । अले पुणोवि घोशेहि (१) ।

चाण्डालः । (तथा करोति ।)

चारुदत्तः । प्राप्तोऽहं व्यसनकृतां दशामनार्यां
यत्रेदं फलमपि जीवितावसानम् ।
एषा च व्यथयति घोषणा मनो मे
श्रोतव्यं यदिदमसौ त्वया हतेति ॥२५

(ततः प्रविशति प्रासादस्थो बद्धः स्थावरकः ।)

स्थावरकः । (घोषणामाकर्ण्य सवैक्लव्यम्) कधं अपावे चालुदत्ते वावादीअदि । हग्गे णिअलेण शामिणा बन्धिदे । भोदु । आक्कन्दामि । शुणाध अजा शुणाध । अत्थि दाणिं मए पावेण पवहणपडिवत्तेण पुप्फकलण्डअजिण्णुजाणं वशन्तशेणा णीदा । तदो मम शामिणा मं ण कामेशि त्ति कदुअ बाहुपाशबलक्कालेण मालिदा ण उण एदिणा अज्जेण । कधं विदूलदाए ण को वि शुणादि । ता किं कलेमि । अत्ताणअं पातेमि (विचिन्त्य)

(१) अपसरतार्या अपसरत ।

किं पश्यत सत्पुरुषमयशोवशेन प्रनष्टजीवाशम् ।
कूपे खण्डितपाशं काञ्चनकलशमिव मज्जन्तम् ॥

(२) अरे पुनरपि घोषय ।

(३) कथमपापश्चारुदत्तो व्यापाद्यते । अहं निगडेन स्वामिना बद्धः । भवतु । आक्रन्दामि । शृणुत आर्याः शृणुत । अस्तीदानीं मया पापेन प्रवहणपरिवर्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता । ततो मम स्वामिना मां न कामयत इति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेनार्येण । कथं विदूरतया न कोऽपि शृणोति । तत् किं करोमि । आत्मानं पातयामि ।

जइ एव्वं कलेमि तदा अज्जचालुदत्ते ण वावादीअदि । भोदु । इमादो पासादबालग्गपदोलिकादो एदिणा जिण्णगवक्खेण अत्ताणअं णिक्खिवामि । वलं हग्गे उवलदे ण उण एशे कुलउत्तविहगाणं वासपादवे अज्जचालुदत्ते । एव्वं जइ विवज्जामि लद्धे मए पललोए । (इत्यात्मानं पातयित्वा) [2]ही ही ण उवलदम्हि । भग्गे मे दण्डाणिअले । ता चाण्डालघोशं शमण्णेशामि । (दृष्ट्वोपसृत्य) [3]हंहो चाण्डाला अन्तलं अन्तलं ।

चाण्डालौ । [4]अले के अन्तलं मग्गेदि ।

(स्थावरकः शुणाध इति पूर्वोक्तं पठति ।)

चारुदत्तः । अये । कोऽयमेवंविधे काले कालपाशस्थिते मयि ।
अनावृष्टिहते शस्ये द्रोणमेघ इवोदितः ॥२६

भो श्रुतं भवद्भिः । न भीतो मरणादस्मि केवलं दूषितं यशः ।
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमो भवेत् ॥२७

अन्यच्च । तेनास्म्यकृतवैरेण क्षुद्रेणात्यल्पबुद्धिना ।
शरेणेव विषाक्तेन दूषितेनापि दूषितः ॥२८

चाण्डालौ । [5]थावलअ अवि शच्चं भणाशि ।

स्थावरकः । [6]शच्चं । हग्गे वि मा कश्श वि कधइश्शशि त्ति पासादबालग्गपदोलिकाए दण्डणिअलेण बन्धिअ णिक्खित्ते ।

संस्थानकः । (प्रविश्य । सहर्षम्)

[7]मंशेण तिक्खाविलकेण भत्ते शाकेण शूपेण शमच्छकेण ।

---

(१) यद्येवं करोमि तदार्यचारुदत्तो न व्यापाद्यते । भवतु । अस्याः प्रासादबालाग्रप्रतोलिकात एतेन जीर्णगवाक्षेणात्मानं निक्षिपामि । वरमहमुपरतो न पुनरेष कुलपुत्रविहगानां वासपादप आर्यचारुदत्तः । एवं यदि विपद्ये लब्धो मया परलोकः । (२) ही नोपरतोऽस्मि। भग्नो मे दण्डनिगडः । तच्चाण्डालघोषं समन्विष्यामि । (३) हंहो चाण्डालाः । अन्तरमन्तरम् ।

(४) अरे कोऽन्तरं याचते । (५) स्थावरक अपि सत्यं भणसि ।

(६) सत्यम् । अहमपि मा कस्यापि कथयिष्यसीति प्रासादबालाग्रप्रतोलिकायां दण्डनिगडेन बद्धा निक्षिप्तः ।

(७) मांसेन तिक्ताम्लेन भक्तं शाकेन सूपेन समत्स्यकेन ।

भुत्तं मए अत्तणअस्श गेहे शालिश्श कूलेण गुलोदणेण ॥२९

(कर्णे दत्त्वा) [1]भिण्णकंशखञ्जणाए चाण्डालवाआए शलशंजोए । जधा अ एशे उक्खालिदे वज्झडिण्डिमशद्दे पडहाणं अ शुणीअदि तधा तकेमि दलिद्दचालुदत्ताके वज्झट्ठाणं णीअदि त्ति । ता पेक्खिश्शं । शत्तुविनाशे णाम महन्ते हलअश्श पलिदोशे होदि । शुदं अ मए जे वि किल शत्तुं वावादअन्तं पेक्खदि तश्श अण्णरिंश जम्मन्तले अक्खिलोगे ण होदि । मए क्खु विशगण्ठिगब्भपविट्ठेण विअ कीडएण किं पि अन्तलं मग्गमाणेण उप्पाडिदे ताह दलिद्दचालुदत्ताह विणाशे । शम्पदं अत्तणकेलिकाए पाशादबालग्गपदोलिकाए अहिलुहिअ अत्तणो पडक्कमं पेक्खामि । (तथा कृत्वा दृष्ट्वा च) [2]ही एदाह दलिद्दचालुदत्ताह वज्झं णीअमाणाह एशे वड्ढे जणशम्मद्दे । जं वेलं अम्हालिशे पवडे वडमाणुश्शे वज्झं णीअदि तं वेलं कीदिशं भवे । (निरीक्ष्य) [3]कैधं एशे शे णववलद्दके विअ मण्डिदे दक्खिणं दिशं णीअदि । अध किंणिमित्तं मम केलिकाए पाशादबालग्गपदोलिकाए शमीवे घोशणा णिवडिदा निवालिदा अ । (विलोक्य) कैधं थावलके चेडे वि णत्थि इध । मा णाम तेण इदो गदुअ मन्तभेदे कडे भविश्शदि । ता जाव णं अण्णेशामि ।

भुक्तं मया आत्मन एव गेहे शालेः कूरेण गुडौदनेन ॥

(१) भिन्नकास्यवत्खञ्जणायाश्चाण्डालवाचायाः स्वरसंयोगः । यथा चैष उत्खालितो वध्यडिण्डिमशब्दः पटहानां च श्रूयते तथा तर्कयामि दरिद्रचारुदत्तको वध्यस्थानं नीयत इति । तत्प्रेक्षिष्ये । शत्रुविनाशो नाम महान् हृदयस्य परितोषो भवति । श्रुतं च मया यो हि किल शत्रुं व्यापाद्यमानं पश्यति तस्यान्यस्मिन् जन्मान्तरेऽक्षिरोगो न भवति । मया खलु विषग्रन्थिगर्भप्रविष्टेनैव कीटकेन किमप्यन्तरं मृगयमाणेनोत्पादितस्तस्य दरिद्रचारुदत्तस्य विनाशः । सांप्रतमात्मीयायां प्रासादबालाग्रप्रतोलिकायामधिरुह्यात्मनः पराक्रमं पश्यामि । (२) ही एतस्य दरिद्रचारुदत्तस्य वध्यमानस्य एतावाक्रन्दसंमर्दः । यस्यां वेलायामस्मादृशः प्रवरो वरमनुष्यो वध्यं नीयते तस्यां वेलायां कीदृशं भवेत् । (३) कथमेष स नवबलीवर्द इव मण्डितो दक्षिणां दिशं नीयते । अथ किंनिमित्तं मदीयायाः प्रासादबालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता निवारिता च । (४) कथं स्थावरकश्चेटोऽपि नास्तीह । मा नाम तेनेतो गत्वा

(इत्यवतीर्योपसर्पति।)

स्थावरकः। (दृष्ट्वा) [१]भट्टालका एशे शे आगडे।

चाण्डालौ। [२]ओशलध देध मग्गं दालं ढक्केध होध तुण्हीआ।
अविणअतिक्खविशाणे दुट्ठबइल्ले इदो एदि ॥३०

संस्थानकः। [३]अले अले अन्तलं अन्तलं देध। (उपसृत्य।) [४]पुत्तका थावलका चेडा एहि गच्छम्ह।

स्थावरकः। [५]ही अणज्ज। वशन्तशेणिअं मालिअ ण पलितुट्टेशि। शम्पदं पणइजणकप्पपादवं अज्जचालुदत्तं मालइदुं ववशिदे शि।

संस्थानकः। [६]ण हि लदणकुम्भशलिशे हगे इत्थिअं वावादेमि।

सर्वे। [७]अहो तुए मारिदा। ण अज्जचारुदत्तेण।

संस्थानकः। [८]के एव्वं भणादि।

सर्वे। (चेटमुद्दिश्य) [९]णं एसो साहू।

संस्थानकः। (अपवार्य सभयम्) अविदमादिके अविदमादिके। [१०]कधं थावलके चेडे शुट्ठु ण मए शङ्कदे। एशे क्खु मम अकज्जशश शक्खी। (विचिन्त्य) [११]एव्वं दाव कलइश्शं। (प्रकाशम्) [१२]अलिअं भट्टालका हो। एशो चेडे शुवण्णचोलिआए मए गहिदे पिट्टिदे मालिदे बद्धे अ। ता किदवेले

मन्त्रभेदः कृतो भविष्यति। तद्यावदेनमन्विष्याभि।

(१) भट्टारकाः एष स आगतः।

(२) अपसरत दत्त मार्गं द्वारं पिधत्त भवत तूष्णीकाः।
अविनयतीक्ष्णविषाणो दुष्टबलीवर्द इत एति॥

(३) अरे अरे अन्तरमन्तरं दत्त। (४) पुत्रक स्थावरक चेटक एहि गच्छावः।

(५) ही अनार्य वसन्तसेनां मारयित्वा न परितुष्टोऽसि। सांप्रतं प्रणयिजनकल्पपादपमार्यचारुदत्तं मारयितुं व्यवसितोऽसि।

(६) न हि रत्नकुम्भसदृशोऽहं स्त्रियं व्यापादयामि। (७) अहो त्वया मारिता। न चारुदत्तेन। (८) क एवं भणति। (९) नन्वेष साधुः।

(१०) कथं स्थावरकश्चेटः सुष्ठु न मया संयतः। एष खलु ममार्कार्यस्य साक्षी। (११) एवं तावत् करिष्यामि (१२) अलीकं भट्टारकाः। अहो एष चेटः सुवर्णचोरिकया मया गृहीतस्ताडितो मारितो बद्धश्च। तत्कृतवैर

एशे जं भणादि किं शव्वं शच्चं। (अपवारितकेन चेटस्य कटकं प्रयच्छति। स्वैरकम्।) पुत्तका थावलका चेडा एदं गेण्हिअ अण्णधा भणाहि।

स्थावरकः। (गृहीत्वा।) [२]पेक्खध पेक्खध भट्टालका हो। शुवण्णेण मं पलोभेदि।

संस्थानकः। (कटकमाच्छिद्य।) [३]ऐशे शे शुवण्णके जश्श कालणादो मए बद्धे। (सक्रोधम्) [४]हंहो चाण्डाला मए क्खु एशे शुवण्णभण्डाले णिउत्ते शुवण्णं चोलअन्ते मालिदे पिट्टिदे। ता जदि ण पत्तिआअध ता पिट्ठिं दाव पेक्खध।

चाण्डालौ। (दृष्ट्वा।) [५]शोहणं भणादि। विडत्ते चेडे किं ण प्पडवदि।

स्थावरकः। [६]हीमादिके। ईदिशे दाशभावे जं शच्चं कंपि ण पत्तिआइ-अदि। (सकरुणम्) [७]अज्ज चालुदत्त एत्तिके मे विहवे। (इति पादयोः पतति।)

चारुदत्तः। (सकरुणम्)

उत्तिष्ठ भोः पतितसाधुजनानुकम्पिन्
निष्कारणोपगतबान्धव धर्मशील।
यत्नः कृतोऽपि सुमहान्मम मोक्षणाय
दैवं न संवदति किं न कृतं त्वयाद्य॥ ३१

चाण्डालौ। [८]भट्टके पिट्ठिअ एदं चेडं णिक्खालेहि।

संस्थानकः। [९]णिश्शल ले। (इति निष्कामयति) [१०]अले चाण्डाला किं बिलम्बेध। मालेध एदं।

एष यद्भणति किं सर्वं सत्यम्। (१) पुत्रक स्थावरक चेट एतद्गृहीत्वान्यथा भण। (२) पश्यत पश्यत भट्टारका हो। सुवर्णेन मां प्रलोभयति।

(३) एतत् तत्सुवर्णकं यस्य कारणान्मया बद्धः। (४) हंहो चाण्डालाः मया खल्वेष सुवर्णभाण्डारे नियुक्तः सुवर्णं चोरयन् मारितस्ताडितः। तद्यदि न प्रत्ययध्वं तदा पृष्ठं तावत् पश्यत।

(५) शोभनं भणति। वितत्तश्चेटः किं न प्रलपति।

(६) हन्त ईदृशो दासभावो यत् सत्यं कमपि न प्रत्याययति। (७) आर्य-चारुदत्त एतावान् मे विभवः। (८) भट्टक ताडयित्वैतं चेटं निष्कासय।

(९) निष्काम रे। (१०) अरे चाण्डालाः किं विलम्बध्वं मारयतैनम्।

चाण्डालौ। जदि तुवलाशि ता शअं जेव्व मालेहि।

रोहसेनः। अले चाण्डाला मं मारेध। मुञ्चध आवुकं।

संस्थानकः। शपुत्तं जेव्व एदं मालेध।

चारुदत्तः। सर्वमस्य मूर्खस्य संभाव्यते। तद्गच्छ पुत्र मातुः समीपम्।

रोहसेनः। किं मए गदेण कादव्वम्।

चारुदत्तः। आश्रमं वत्स गन्तव्यं गृहीत्वाद्यैव मातरम्।
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि ॥३२

तद्वयस्य गृहीत्वैनं व्रज।

मैत्रेयः। भो वअस्स एव्वं तुए जाणिदं तुए विणा अहं पाणाइं धारेमि त्ति।

चारुदत्तः। वयस्य स्वाधीनजीवितस्य न युज्यते तव प्राणपरित्यागः।

मैत्रेयः। (स्वगतम्) जुत्तं णेदं। तधा वि ण सक्कुणोमि पिअवअस्सविरहिदो पाणाइं धारेदुं त्ति। ता बम्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्सं अणुगामिस्सं। (प्रकाशम्) भो वअस्स परापेमि एदं लहुं। (इति सकण्ठग्रहं पादयोः पतति। दारकोऽपि रुदन् पतति।)

संस्थानकः। अले णं भणामि शपुत्ताकं चारुदत्ताकं वावादेध त्ति। (चारुदत्तो भयं नाटयति।)

चाण्डालौ। अले णहि अम्हाणं ईदिशी लाआणत्ती जधा शपुत्तं चालुदत्तं वावादेध त्ति। ता णिक्कम ले दालआ णिक्कम। (इति निष्क्रामयतः।)

---

(१) यदि त्वरयसे तदा स्वयमेव मारय।

(२) अरे चाण्डालाः मां मारयत मुञ्चत पितरम्।

(३) सपुत्रमेवैतं मारयत। (४) किं मया गतेन कर्तव्यम्।

(५) भो वयस्य एवं त्वया ज्ञातं त्वया विनाहं प्राणान् धारयामीति।

(६) युक्तं त्विदम्। तथापि न शक्नोमि प्रियवयस्यविरहितः प्राणान् धारयितुमिति। तद् ब्राह्मण्यै दारकं समर्प्य प्राणपरित्यागेनात्मनः प्रियवयस्यमनुगमिष्यामि। (७) भो वयस्य परापयामि एतं लघु।

(८) अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतेति।

(९) न अस्माकमीदृशी राजाज्ञप्तिर्यथा सपुत्रं चारुदत्तं व्यापादयतेति।

चाण्डालौ । [1]इमं तइअं घोषणट्ठाणं । ताडेध डिण्डिमं । (पुनर्घोषयतः ।)

संस्थानकः । (स्वगतम्) [2]कधं एशे ण पत्तिआअन्ति पौला । **(प्रकाशम्)** [3]हंहो चालुदत्ता वडुव्वका ण पत्तिआअदि एशे पौलजणे । ता अत्तणकेलिकाए जीहाए भणाहि मए वशन्तशेणिआ मालिदेत्ति । **(चारुदत्तस्तूष्णीमास्ते)**

संस्थानकः । [4]अँले चण्डालगोहे ण भणादि चालुदत्तवडुव्वके । ता भणावेध इमिणा जजलवंशखण्डेण शङ्खलेण तालिअ तालिअ ।

चाण्डालः । (प्रहारमुद्यम्य) भो चालुदत्त भणाहि ।

चारुदत्तः । (सकरुणम्)

प्राप्यैतद्व्यसनमहार्णवप्रपातं न त्रासो न च मनसोऽस्ति मे विषादः ।
एको मां दहति जनापवादवह्निर्वक्तव्यं यदिह मया हता प्रियेति ॥३३

संस्थानकः (पुनस्तथैव ।)

चारुदत्तः । भो भोः पौराः ('मया खलु नृशंसेन' इत्यादि [९-३०] पुनः पठति ।)

संस्थानकः । [5]वावादिदा ।

चारुदत्तः । एवमस्तु ।

चाण्डालः । [6]अँले तव अत्त वज्झवालिआ ।

द्वितीयः । [7]अँले तव ।

प्रथमः । [8]अँले लेक्खअं कलेम्ह । (इति बहुविधं लेखकं कृत्वा ।)

प्रथमः । [9]अँले जदि मम केलिका वज्झवालिआ ता चिट्ठदु दाव मुहुत्तअं ।

तन्निष्काम रे दारक निष्काम ।

(१) इदं तृतीयं घोषणस्थानम् । ताडयत डिण्डिमम् ।

(२) कथमेते न प्रत्ययन्ते पौराः । हंहो चारुदत्त वटुक न प्रत्ययते **एष पौरजनः** । तदात्मीयया जिह्वया भण मया वसन्तसेना मारितेति ।

(३) अरे चाण्डालमनुष्य न भणति चारुदत्तवटुकः । तद्भणयतानेन जर्जरवंशखण्डेन संखलेन ताडयित्वा ताडयित्वा ।

(४) भोश्चारुदत्त भण । (५) व्यापादिता ।

(६) अरे तवात्र वध्यपालिका । (७) अरे तव । (८) अरे लेखं कुर्मः ।

(९) अरे यदि मदीया वध्यपालिका तदा तिष्ठतु तावन्मुहूर्तकम् ।

द्वितीयः । [1]किंनिमित्तं ।

प्रथमः । [2]अले भणिदो म्हि पिदुणा शग्गं गच्छन्तेण । जधा पुत्त वीरअ जइ तुह वज्झवाली होदि मा शहश त्ति वावादआशि वज्झं ।

द्वितीयः । [3]अले किंनिमित्तं ।

प्रथमः । [4]कदावि कोवि शाहू अत्थं दहअ वज्झं मोआवेदि । कदावि लण्णो पुत्ते भोदि । तेण वद्धावेण शव्ववज्झाणं मोक्खे होदि । कदावि हत्थी बन्धं खण्डेदि तेण शम्भमेण वज्झे मुक्के होदि । कदावि लाअपलिवत्ते होदि तेण शव्ववज्झाणं मोक्खे होदि ।

संस्थानकः । [5]किं किं लाअपलिवत्ते होदि ।

चाण्डालः । [6]अले वज्झवालिआए लेक्खअं कलेम्ह ।

संस्थानकः । [7]अले शिग्घं मालेध चालुदत्ताकं ।

(इत्युक्त्वा चेटं गृहीत्वैकान्ते स्थितः ।)

चाण्डालः । [8]अज्जचालुदत्त लाअणिओओ क्खु अवलज्झदि ण क्खु अम्हे चाण्डाला । ता शुमलेहि जं शुमलिदव्वं ।

चारुदत्तः । प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात् कथंचित् ।
सुरपतिभवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव ॥३४

---

(१) किंनिमित्तम् ।

(२) अरे भणितोऽस्मि पित्रा स्वर्गं गच्छता । यथा पुत्र वीरक यदि तव वध्यपाली भवति मा सहसेति व्यापादय वध्यम् । (३) अरे किंनिमित्तम् ।

(४) कदापि कोऽपि साधुरर्थं दत्त्वा वध्यं मोचयति । कदापि राज्ञः पुत्रो भवति तेन वृद्धिमहोत्सवेन सर्ववध्यानां मोक्षो भवति । कदापि हस्ती बन्धं खण्डयति तेन संभ्रमेण वध्यो मुक्तो भवति । कदापि राजपरिवर्तो भवति तेन सर्ववध्यानां मोक्षो भवति । (५) किं किं राजपरिवर्तो भवति । (६) अरे वध्यपालिकाया लेखं कुर्मः । (७) अरे शीघ्रं मारयत चारुदत्तम् । (८) आर्यचारुदत्त राजनियोगः खल्वपराध्यति न खलु वयं चाण्डालाः । तत् स्मर यत् स्मर्तव्यम् ।

भोः क्व तावन्मया गन्तव्यम्।

चाण्डालः। (अग्रतो दर्शयित्वा) अले एदं दीशदि दक्खिणमशाणं। जं पेक्खिअ वज्झा झत्ति पाणाइं मुञ्चन्ति। पेक्ख पेक्ख।

अद्धं कलेवलं पडिवत्तं कट्टन्ति दीहगोमाओ।
अद्धं पि शूललग्गं वेशं विअ अट्टहाशशश ॥३५

चारुदत्तः। हा हतोऽस्मि मन्दभाग्यः। (इति सावेगमुपविशति।)

संस्थानकः। णं दाव गमिश्शं। चालुदत्तकं वावादअन्तं दाव पेक्खामि। (परिक्रम्य दृष्ट्वा) कधं उववित्ते।

चाण्डालः। चालुदत्ता किं भीदेशि।

चारुदत्तः। (सहसोत्थाय) मूर्ख! 'न भीतो मरणादस्मि केवलं दूषितं यशः'। इत्यादि [१०-२७] पुनः पठति।)

चाण्डालः। अज्ज चालुदत्त गअणदले पडिवशन्ता चन्दशुज्जा वि विपत्तिं लहन्ति। किं उण जणा मलणभीलुआ माणवा वा। लोए कोवि उट्ठिदो पलदि कोवि पडिदोवि उट्ठेदि।

उट्ठन्तपडन्ताह वशणपाडिआ शवशश उण अत्थि।
एदाइं हिअए कदुअ शन्धालेहि अत्ताणअं ॥३६

(चाण्डालं प्रति।) एदं चउट्ठं घोशणट्ठाणं ता उग्घोशम्ह। (पुनस्तथैवोद्घोषयतः।)

---

(१) अरे एतद् दृश्यते दक्षिणश्मशानं यत्रेक्ष्य वध्या झटिति प्राणान् मुञ्चन्ति। पश्य पश्य। अर्धं कलेवरं प्रतिवृत्तं कर्षन्ति दीर्घगोमायवः।
अर्धमपि शूललग्नं वेश इवाट्टहासस्य ॥

(२) न तावद्गमिष्यामि चारुदत्तं व्यापाद्यमानं तावत् पश्यामि। (३) कथमुपविष्टः। (४) चारुदत्त किं भीतोऽसि।

(५) आर्यचारुदत्त गगनतले प्रतिवसन्तौ चन्द्रसूर्यावपि विपत्तिं लभेते किं पुनर्जना मरणभीरुका मानवा वा। लोके कोऽप्युत्थितः पतति कोऽपि पतितोऽप्युत्तिष्ठते। उत्तिष्ठत्यततो वसनपातिका शवस्य पुनरस्ति।
एतानि हृदये कृत्वा संधारयात्मानम् ॥

(६) एतच्चतुर्थं घोषणस्थानम्। तदुद्घोषयावः।

चारुदत्तः। हा प्रिये वसन्तसेने। ('शशिशकलमयूख' [१०-१३] इत्यादि पुनः पठति।) (ततः प्रविशति ससंभ्रमा वसन्तसेना भिक्षुश्च।)

भिक्षुः। [१]हीमाणहे। अट्ठाणपलिश्शन्तं शमश्शाशिअ वशन्तशेणिअं णअन्ते अणुग्गहिदम्हि पव्वजाए। उवाशिके कहिं तुमं णइश्शं।

वसन्तसेना। [२]अज्जचारुदत्तस्स ज्जेव्व गेहं। तस्स दंसणेण मअलाञ्छणस्स विअ कुमुदिणिं आणन्देहि मं।

भिक्षुः। (स्वगतम्) [३]कैदलेण मग्गेण पविशामि। (विचिन्त्य) [४]लाअमग्गेण ज्जेव्व पविशामि। उवाशिके एहि इमं लाअमग्गं। (आकर्ण्य) [५]किं णु हु एशो लाअमग्गे महन्ते कलअले शुणीअदि।

वसन्तसेना। (अग्रतो निरूप्य) [६]कधं पुरदो महाजणसमूहो। अज्ज जाणाहि दाव किण्णेदं त्ति। विसमभरक्कन्ता विअ वसुन्धरा एअवासोण्णदा उज्जइणी वट्टदि।

चाण्डालः। [७]इमं अ पच्छिमं घोशणट्ठाणं। ता तालेध डिण्डिमं। उग्घोशेध घोशणं। (तथा कृत्वा) [८]भो चालुदत्त पडिवालेहि। मा भाआहि। लहुं जेव्व मालीअशि।

चारुदत्तः। भगवत्यो देवताः।

भिक्षुः। (श्रुत्वा ससंभ्रमम्) [९]उवाशिके तुमं किल चालुदत्तेण मालिदाशि त्ति चालुदत्ते मालिदुं णीअदि।

---

(१) आश्चर्यम्। अस्थानपरिश्रान्तां समाश्वास्य वसन्तसेनां नयन्नगृहीतोऽस्मि प्रव्रज्यया। उपासिके कुत्र त्वां नेष्यामि। (२) आर्यचारुदत्तस्यैव गेहम्। तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीमानन्दय माम्।

(३) कतरेण मार्गेण प्रविशामि। (४) राजमार्गेणैव प्रविशामि। उपासिके एहीमं राजमार्गम्। (५) किं नु खल्वेष राजमार्गे महान् कलकलः श्रूयते।

(६) कथं पुरतो महान् जनसमूहः। आर्य जानीहि तावत् किं न्विदमिति। विषमभराक्रान्तेव वसुन्धरैकवासोन्नतोज्जयिनी वर्तते।

(७) इदं च पश्चिमं घोषणस्थानम्। तत्ताडयत डिण्डिम्। उद्घोषयत घोषणाम्। (८) भोश्चारुदत्त प्रतिपालय। मा विभीहि। लघ्वेव मार्यसे।

(९) उपासिके त्वं किल चारुदत्तेन मारितासीति चारुदत्तो मारयितुं नीयते।

वसन्तसेना। (ससंभ्रमम्) हंद्धी हद्धी। कधं मम मन्दभाइणीए कदे अज्जचारुदत्तो वावादीअदि। भो तुरिदं तुरिदं आदेसेहि मग्गं।

भिक्षुः। तुवलदु तुवलदु बुद्धोवासिआ अज्जचालुदत्तं जीअन्तं शमश्शाशिदुं। अजा अन्तलं अन्तलं देध।

वसन्तसेना। अन्तरं अन्तरं।

चाण्डालः। अज्जचालुदत्त शामिणिओओ अवलज्झदि। ता शुमलेहि जं शुमलिदव्वं।

चारुदत्तः। किं बहुना। ('प्रभवति'। इत्यादि [१०-३४] पठति)

चाण्डालः। (खड्गमाकृष्य) अज्जचालुदत्त उत्ताणे भविअ शमं चिट्ठ। एकप्पहालेण मालिअ तुमं शग्गं णेम्ह। (चारुदत्तस्तथा तिष्ठति।)

चाण्डालः। (प्रहर्तुमीहते। खड्गपतनं हस्तादभिनयन्) हीं कधं।

आअट्टिदे शलोशं मुट्ठीए मुट्ठिणा गहीदे वि।
धलणीए कीश पडिदे दालुणके अशणिशण्णिहे खग्गे ॥३७

जधा एदं शंवुत्तं तधा तक्केमि ण विवज्जदि अज्जचालुदत्ते त्ति। भअवदि शज्झवाशिणि पशीद पशीद। अवि णाम चालुदत्तश्श मोक्खे भवे। तदो अणुगिहिदं तुए चाण्डालउलं भवे।

---

(१) हा धिक् हा धिक्। कथं मम मन्दभागिन्याः कृत आर्यचारुदत्तो व्यापाद्यते। भोः। त्वरितं त्वरितमादिश मार्गम्।

(२) त्वरतां त्वरतां बुद्धोपासिकार्यचारुदत्तं जीवन्तं समाश्वासयितुम्। आर्या अन्तरमन्तरं दत्त। (३) अन्तरमन्तरम्।

(४) आर्यचारुदत्त स्वामिनियोगोऽपराध्यति। तत् स्मर यत् स्मर्तव्यम्।

(५) आर्य चारुदत्त उत्तानो भूत्वा समं तिष्ठ। एकप्रहारेण मारयित्वा त्वां स्वर्गं नयावः।

(६) आकृष्टः सरोषं मुष्टौ मुष्टिना गृहीतोऽपि।
धरण्यां किमर्थं पतितो दारुणकोऽशनिसंनिभः खड्गः॥

यथैतत्संवृत्तं तथा तर्कयामि न विपद्यत आर्यचारुदत्त इति। भगवति सह्यवासिनि प्रसीद प्रसीद। अपि नाम चारुदत्तस्य मोक्षो भवेत्। तदानुगृहीतं त्वया चाण्डालकुलं भवेत्।

अपरः । जेधाण्णत्तं अणुचिट्ठम्ह ।

प्रथमः । भोदु । एव्वं कलेम्ह । (इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः । चारुदत्तः 'प्रभवति' । इत्यादि [१०-३४] पुनः पठति ।)

भिक्षुर्वसन्तसेना च । (दृष्ट्वा) अज्जा मा दाव मा दाव । अज्जा एसा अहं मन्दभाइणी जाए कारणादो एसो वावादीअदि ।

चाण्डालः । (दृष्ट्वा)

तुलिदं का उण एशा अंशपडन्तेण चिउलभालेण ।
मा मेत्ति वाहलन्ती उट्ठिदहत्था इदो एदि ॥३८

वसन्तसेना । अज्जचारुदत्त किण्णेदं । (इत्युरसि पतति ।)

भिक्षुः । अज्जचालुदत्त किण्णेदं । (इति पादयोः पतति ।)

चाण्डालः । (सभयमपसृत्य) कधं वसन्तशेणा । णं क्खु अम्हेहिं शाहू ण वावादिदे ।

भिक्षुः । (उत्थाय) अले जीवदि चालुदत्ते ।

चाण्डालः । जीवदि वश्शशदं ।

वसन्तसेना । (सहर्षम्) पेच्चुजीविदम्हि ।

चाण्डालः । तो जाव एदं वुत्तन्तं लाइणो जण्णवाडगदश्श णिवेदेम्ह ।
(इति निष्क्रामतः ।)

संस्थानकः । (वसन्तसेनां दृष्ट्वा सत्रासम्) हीमादिके । [११]केण गब्भ

---

(१) यथाज्ञप्तमनुतिष्ठावः । (२) भवतु । एवं कुर्वः ।

(३) आर्या मा तावन्मा तावत् । आर्या एषाहं मन्दभागिनी यस्याः कारणादेष व्यापाद्यते ।

(४) त्वरितं का पुनरेषांसे पतता चिकुरभारेण ।
मा मेति व्याहरन्त्युत्थितहस्तेत एति ॥

(५) आर्य चारुदत्त किंन्विदम् ।

(६) कथं वसन्तसेना । ननु खल्वस्माभिः साधुर्न व्यापादितः ।

(७) अरे जीवति चारुदत्तः । (८) जीवति वर्षशतम् ।

